ATHARVA-VEDA SAṀHITĀ

Volume IV

अथर्ववेद संहिता

...द प्रतिष्ठान, नई दिल्ली

ATHARVA-VEDA SAṀHITĀ

अथर्ववेद संहिता

ATHARVA-VEDA SAṀHITĀ

अथर्ववेद संहिता

With
English Translation
by
Svami Satya Prakash Sarasvati

Vol. 4

Kāṇḍa XI - XV

चतुर्थो भागः

काण्ड ११-१५

Veda Pratishthana

Arya Samaj Mandir Marg
New Delhi - 110 001

Atharva - Veda, Vol. IV

Publishers:
Veda Pratishthana,
Arya Samaj, Mandir Marg,
New Delhi - 110001 (India).

Distributors :

1. **Veda Pratishthana**
   Arya Samaj, Mandir Marg
   New Delhi - 1.

2. **D.A.V. College Committee Office**
   Chitra Gupta Road
   New Delhi - 110055.

3. **M/s Govindram Hasanand**
   4408 Nai-Sarak, Delhi - 110006.

4. **Dayanand Veda Peeth**
   1E/6 Svami Ram Tirth Nagar
   New Delhi - 110055.

5. **M/s S.Chand and Co. Ltd.**
   Ram Nagar, New Delhi - 110055.

6. **M/s Surya Trading Corporation**
   3, Jauhari Tola, Allahabad.

7. **Vijnana Parishad**
   Maharshi Dayanand Marg
   Allahabad - 211002.

Printers :
Surya Trading Corporation
3, Jauhari Tola, Allahabad.
Phones :- 51165, 603684

Contents

Preface

The history of the Veda Pratishthana takes us back to 1973. Padma Bhushan Col. Veda Ratan Mohan, the son of Sri Narendra Mohan of the distinguished Narendra Mohan Foundations died on July 28, 1973 at an unripe age of 53, and according to the family traditions there was held a Shanti ceremony at the residence of the deceased. At this ceremony, Pandit Prakash Vir Shastry was also present.

Sri Shastry casually asked Sri Narendra Mohan, what it was that prompted the elders of the family to name this infant of theirs as Veda Ratan Mohan - evidently the name indicates a unique regard of the family to the sanctity of and reverence to the Vedas, the most ancient book of man's library.

During this conversation, Sri Prakash Vir Shastry suggested to the members of the family to undertake and subsidize some project to popularize the Vedic teachings, On behalf of the Narendra Mohan Foundations, Major Sri Kapil Mohan, the younger brother of the late Veda Ratan Mohan agreed to finance munificently this venture, and it was unanimously agreed upon to present to the public standard English translations of all the four Vedas. This is, in short, the history of the foundation of the Veda Pratishthana. Dr. Govardhan Lal Dutta, a distinguished educationist and head of the Veda Pratishthana requested Svami Satya Prakash, to undertake the Chief Editorship of the publication project and appointed Pt. Satyakam Vidyalankar to assist Svami Ji in this work. The work started immediately and the work of editing, translating and publishing the entire Ṛg-veda into thirteen decent volumes could be finished in a period of full ten years (1977-1987). These thirteen volumes cover 4938 pages.

After the sad death of Sri Prakash Vir Shastry (born 1923, died Nov. 23, 1977 in a tragic railway accident) and also of Dr. Govardhan Lal Dutta, the Veda Pratishthana has been fortunate to have Dr. L.M. Singhvi as its President. These days he has gone on his new assignment to the United Kingdom to serve as the High Commissioner for India.

The Veda Pratishthana took up the English translations of the Yajur-veda and Sāma-veda. Sri Udai Vir Viraj assisted Svami Satya Prakash in the Yajur-veda and Pandit Satyakam Vidyalankar in the translation of the Sāma-veda, but on account of certain difficulties in their printing, we shall yet take some time in presenting them to our public. We regret to announce the death of Pandit Satya Kam Vidyalankar and Sri Ram Saran Das Ahuja. Selfless devotion of Mr.Ahuja to the Pratishthana has been a matter of pride to all of us.

Svami Satya Prakash is also now 86 years old and feeble. He has left Delhi for his cottage Ṛtambhara at the Vijñana Parishad, Allahabad. The English Translation of the Atharva-veda in several books has been assisted by Sri Udayavir Viraj, a distinguished graduate of Gurukul Kangri and the printing of the Atharva-veda has been entrusted to M/s Surya Trading Corporation whose singular devotion to this work could make the entire printing possible in such a short time. We are highly indebted to Dr. Vimalesh, the Ex-Principal D.A.V. College, Allahabad for his critical and excellent assistance in this publication and to Shri Chandra Bhan Singh for the excellent typing work.

R.N. Sehgal
The Veda Pratishthana
Arya Samaj, Mandir Marg
New Delhi - 110001

Kāṇḍa - XI

एकादशं काण्डम्

अथैकादशं काण्डम् ॥

(१) प्रथमं सूक्तम्

(१-३७) सप्तत्रिंशदृचस्यास्य सूक्तस्य ब्रह्मा ऋषिः। ब्रह्मौदनो देवता। (१) प्रथमर्चोनुष्टुब्गर्भा भुरिक्पङ्क्तिः, (२, ५) द्वितीयापञ्चम्योर्बृहतीगर्भा विराट्त्रिष्टुप्, (३) तृतीयायाश्चतुष्पदा शाक्वरगर्भा जगती, (४, १५-१६, ३१) चतुर्थीपञ्चदशी-षोडश्येकत्रिंशीनां भुरिक्त्रिष्टुप्, (६) षष्ठ्या उष्णिक्, (७, १२-१४, १९, २२-२३, २८, ३०, ३२-३४) सप्तम्या द्वादश्यादितृचस्यैकोनविंशीद्वाविंशीत्रयोविंश्यष्टाविंशीत्रिंशीनां द्वात्रिंश्यादितृचस्य च त्रिष्टुप्, (८) अष्टम्या विराड्गायत्री, (९) नवम्याः शाक्वरातिजागतगर्भा जगती, (१०) दशम्याः पुरोऽतिजगती विराड्जगती, (११) एकादश्या जगती, (१७, २१, २४-२६, ३७) सप्तदश्येकविंश्योश्चतुर्विंश्यादितृचस्य सप्तत्रिंश्याश्च विराड्जगती, (१८) अष्टादश्या अतिजागतगर्भा परातिजागता विराडतिजगती, (२०) विंश्या अतिजागतगर्भा परशाक्वरा चतुष्पदा भुरिग्जगती, (२७) सप्तविंश्या अतिजागतगर्भा जगती, (२९) एकोनत्रिंश्या भुरिग्विराड्जगती, (३५) पञ्चत्रिंश्याश्चतुष्पदा ककुम्मत्युष्णिक्, (३६) षट्त्रिंश्याश्च पुरोविराट्त्रिष्टुप् छन्दांसि ॥

अग्ने जायस्वादितिर्नाथितेयं ब्रह्मौदनं पचति पुत्रकामा।
सप्तऋषयो भूतकृतस्ते त्वा मन्थन्तु प्रजया सहेह ॥१॥
कृणुत धूमं वृषणः सखायोद्रोघाविता वाचमच्छ।
अयमग्निः पृतनाषाट् सुवीरो येन देवा असहन्त दस्यून् ॥२॥
अग्नेजनिष्ठा महते वीर्याय ब्रह्मौदनाय पक्तवे जातवेदः।
सप्तऋषयो भूतकृतस्ते त्वाजीजनन्नस्यै रयिं सर्ववीरं नि यच्छ ॥३॥

अग्ने। जायस्व। अदितिः। नाथिता। इयम्। ब्रह्मऽओदनम्। पचति। पुत्रऽकामा।
सप्तऽऋषयः। भूतऽकृतः। ते। त्वा। मन्थन्तु। प्रऽजया। सह। इह ॥ १ ॥
कृणुत। धूमम्। वृषणः। सखायः। अद्रोघऽअविता। वाचम्। अच्छ।
अयम्। अग्निः। पृतनाषाट्। सुऽवीरः। येन। देवाः। असहन्त। दस्यून् ॥ २ ॥
अग्ने। अजनिष्ठाः। महते। वीर्याय। ब्रह्मऽओदनाय। पक्तवे। जातऽवेदः।
सप्तऽऋषयः। भूतऽकृतः। ते। त्वा। अजीजनन्। अस्यै। रयिम्। सर्वऽवीरम्। नि। यच्छ ॥३॥

Brahmaudana
Accompanying a rice-dish offering

XI.1.1 O Agni, be thou born; (indestructible) Aditi here, suppliant, cooks a brahman-rice-dish, adorable-sons; the seven - seers being makers, let them churn you, here together with progeny.

XI.1.2 Make ye smoke, O ye showerers, companions, ye that are aided by the unhateful (?), unto speech, this Agni fight-overpowering, having good heroes, by whom the gods over-powered the barbarians.

XI.1.3 O Agni, thou hast been born unto great heroism, unto the cooking of the brahman-rice-dish, O Jātavedas; the seven Saptarśhi seers being makers - they have given thee birth; do thou confirm to this woman wealth with all heroes.

समिद्धो अग्ने समिधा समिध्यस्व विद्वान्देवान्यज्ञियाँ एह वक्षः ।
तेभ्यो हविः श्रपयं जातवेद उत्तमं नाकमधि रोहयेमम् ॥४॥
त्रेधा भागो निहितो यः पुरा वो देवानां पितॄणां मर्त्यानाम् ।
अंशाञ्जानीध्वं वि भजामि तान्वो यो देवानां स इमां पारयाति ॥५॥
अग्ने सहस्वानभिभूरभीदसि नीचो न्युब्ज द्विषतः सपत्नान् ।
इयं मात्रा मीयमाना मिता च सजातांस्ते बलिहृतः कृणोतु ॥६॥
साकं सजातैः पयसा सहैध्युदुब्जैनां महते वीर्याय ।
ऊर्ध्वो नाकस्याधि रोह विष्टपं स्वर्गो लोक इति यं वदन्ति ॥७॥
इयं मही प्रति गृह्णातु चर्म पृथिवी देवी सुमनस्यमाना ।
अथ गच्छेम सुकृतस्य लोकम् ॥८॥
एतौ ग्रावाणौ सयुजा युङ्ग्धि चर्मणि निर्भिन्ध्यंशून्यजमानाय साधु ।
अवघ्नती नि जहि य इमां पृतन्यव ऊर्ध्वं प्रजामुद्भरन्त्युदूह ॥९॥

समऽइद्धः । अग्ने । समऽइधा । सम् । इध्यस्व । विद्वान् । देवान् । यज्ञियान् । आ । इह । वक्षः ।
तेभ्यः । हविः । श्रपयन् । जातऽवेदः । उत्ऽतमम् । नाकम् । अधि । रोहय । इमम् ॥ ४ ॥

त्रेधा । भागः । निऽहितः । यः । पुरा । वः । देवानाम् । पितॄणाम् । मर्त्यानाम् ।
अंशान् । जानीध्वम् । वि । भजामि । तान् । वः । यः । देवानाम् । सः । इमाम् । पारयाति ॥५॥

अग्ने । सहस्वान् । अभिऽभूः । अभि । इत् । असि । नीचः । नि । उब्ज । द्विषतः । सऽपत्नान् ।
इयम् । मात्रा । मीयमाना । मिता । च । सऽजातान् । ते । बलिऽहृतः । कृणोतु ॥ ६ ॥

साकम् । सऽजातैः । पयसा । सह । एधि । उत् । उब्ज । एनाम् । महते । वीर्याय ।
ऊर्ध्वः । नाकस्य । अधि । रोह । विष्टपम् । स्वःऽगः । लोकः । इति । यम् । वदन्ति ॥७॥

इयम् । मही । प्रति । गृह्णातु । चर्म । पृथिवी । देवी । सुऽमनस्यमाना ।
अथ । गच्छेम । सुऽकृतस्य । लोकम् ॥ ८ ॥

एतौ । ग्रावाणौ । सऽयुजा । युङ्ग्धि । चर्मणि । निः । भिन्धि । अंशून् । यजमानाय ।
साधु । अवऽघ्नती । नि । जहि । ये । इमाम् । पृतन्यवः । ऊर्ध्वम् । प्रऽजाम् । उत्ऽभरन्ती । उत् । ऊह ॥ ९ ॥

XI.1.4 Kindled, O Agni, be thou kindled with kindling (samidh); mayest thou bring hither, knowing, the worshipful gods; for them cooking (śra) the oblation, O Jātavedas, make thou this man to ascend to the highest firmament (nāka).

XI.1.5 Threefold is set down the share that is yours of old, of gods, of fathers, of mortals; know ye the portions (anśa); I share them out to you; that one that is the gods, shall set this woman across.

XI.1.6 O Agni, powerful, overcoming, thou overcomest; put down (our) hating rivals; let this measure (mātrā) being measured, and measured, make (thy) fellows tribute-bringers to thee.

XI.1.7 In company with thy fellows, be thou united with milk; urge her up unto great heroism; ascend aloft to the summit (viṣṭap) of the firmament (nāka) which they call by the name heavenly world.

XI.1.8 Let this great one (mahī) accept the hide, the divine earth, with favouring mind, then may we go to the world of the well-done.

XI.1.9 Join thou on the hide these two allied stones, split apart the shoots (anśu) successfully for the sacrificer; smiting down, smite them that would fight her; bearing up thy progeny aloft, lift up.

गृहाण ग्रावाणौ सकृतौ वीर हस्त आ ते देवा यज्ञिया यज्ञमगुः ।
त्रयो वरा यतमांस्त्वं वृणीषे तास्ते समृद्धीरिह राधयामि ॥१०॥
इयं ते धीतिरिदमु ते जनित्रं गृह्णातु त्वामदितिः शूरपुत्रा ।
परा पुनीहि य इमां पृतन्यवोऽस्यै रयिं सर्ववीरं नि यच्छ ॥११॥
उपश्वसे द्रुवये सीदता यूयं वि विच्यध्वं यज्ञियासस्तुषैः ।
श्रिया समानानति सर्वान्त्स्यामाधस्पदं द्विषतस्पादयामि ॥१२॥
परेहि नारि पुनरेहि क्षिप्रमपां त्वा गोष्ठोऽध्यरुक्षद्भराय ।
तासां गृह्णीताद्यतमा यज्ञिया असन्विभाज्य धीरीतरा जहीतात् ॥१३॥
एमा अगुर्योषितः शुम्भमाना उत्तिष्ठ नारि तवसं रभस्व ।
सुपत्नी पत्या प्रजया प्रजावत्या त्वागन्यज्ञः प्रति कुम्भं गृभाय ॥१४॥
ऊर्जो भागो निहितो यः पुरा व ऋषिप्रशिष्टाप आ भरैताः ।
अयं यज्ञो गातुविन्नाथवित्प्रजाविदुग्रः पशुविद्वीरविद्वो अस्तु ॥१५॥

गृहाण । ग्रावाणौ । सऽकृतौ । वीर । हस्ते । आ । ते । देवाः । यज्ञियाः । यज्ञम् । अगुः ।
त्रयः । वराः । यतमान् । त्वम् । वृणीषे । ताः । ते । समऽऋद्धीः । इह । राधयामि ॥१०॥
इयम् । ते । धीतिः । इदम् । ऊं इति । ते । जनित्रम् । गृह्णातु । त्वाम् । अदितिः । शूरऽपुत्रा ।
परा । पुनीहि । ये । इमाम् । पृतन्यवः । अस्यै । रयिम् । सर्वऽवीरम् । नि । यच्छ ॥ ११ ॥
उपऽश्वसे । द्रुवये । सीदत । यूयम् । वि । विच्यध्वम् । यज्ञियासः । तुषैः ।
श्रिया । समानान् । अति । सर्वान् । स्याम । अधःऽपदम् । द्विषतः । पादयामि ॥ १२ ॥
परा । इहि । नारि । पुनः । आ । इहि । क्षिप्रम् । अपाम् । त्वा । गोऽस्थः । आधि । अरुक्षत् । भराय ।
तासाम् । गृह्णीतात् । यतमाः । यज्ञियाः । असन् । विऽभाज्य । धीरी । इतराः । जहीतात् ॥१३॥
आ । इमाः । अगुः । योषितः । शुम्भमानाः । उत् । तिष्ठ । नारि । तवसम् । रभस्व ।
सुऽपत्नी । पत्या । प्रऽजया । प्रजाऽवती । आ । त्वा । अगन् । यज्ञः । प्रति । कुम्भम् । गृभाय ॥
ऊर्जः । भागः । निऽहितः । यः । पुरा । वः । ऋषिऽप्रशिष्टा । अपः । आ । भर । एताः ।
अयम् । यज्ञः । गातुऽवित् । नाथऽवित् । प्रजाऽवित् । उग्रः । पशुऽवित् । वीरऽवित् । वः । अस्तु ।

XI.1.10 Seize in thy hand, O hero, the two joint-acting (sakṛt) stones; the worshipful divinities have come to thy sacrifice; three boons, whichsoever thou choosest -- those successes do I here make successful (samṛdhī) for thee.

XI.1.11 This (is) thy thought (? dhīti) and this thy place of birth; let Aditi, of hero-sons, seize thee; cleanse away them that would fight her; confirm to her wealth with all heroes.

XI.1.12 Sit ye in the wooden blower (upaśvasa); be ye winnowed, worshipful ones, from the husks. By fortune (dviṣataḥ) may we surpass all (our) equals; I make (our) haters to fall under foot.

XI.1.13 Go away, woman, come back quickly; the stall (goṣṭha) of the waters hath ascended thee for bearing; seize then of them, whichever shall be worshipful; having shared out wisely (dhīrītrā), then leave the others.

XI.1.14 These maidens (yoṣit) have come, adorning themselves; stand up, woman take hold of the mighty one; well-spoused with husband, progeny possessing with progeny (prajāvatyā), to thee hath come the sacrifice; recieve thou the vessel.

XI.1.15 The portion of refreshment (ūrj) set down, which (is) yours of old; do thou, instructed by the seer, bring these waters; let this sacrifice be for you progress-gaining (gātu-vid), refuge-gaining (progeny gaining) (prajāvit), formidable, cattle-gaining (paśuvid), hero-gaining (vīrvit).

अग्ने चरुर्यज्ञियस्त्वाध्यरुक्षच्छुचिस्तपिष्ठस्तपसा तपैनम् ।
आर्षेया दैवा अभिसंगत्य भागमिमं तपिष्ठा ऋतुभिस्तपन्तु ॥१६॥
शुद्धाः पूता योषितो यज्ञिया इमा आपश्चरुमव सर्पन्तु शुभ्राः ।
अदुः प्रजां बहुलान्पशून्नः पक्तौदनस्य सुकृतामेतु लोकम् ॥१७॥
ब्रह्मणा शुद्धा उत पूता घृतेन सोमस्यांशवस्तण्डुला यज्ञिया इमे ।
अपः प्र विशत प्रति गृह्णातु वश्चरुरिमं पक्त्वा सुकृतामेत लोकम् ॥१८॥
उरुः प्रथस्व महता महिम्ना सहस्रपृष्ठः सुकृतस्य लोके ।
पितामहाः पितरः प्रजोपजाहं पक्ता पञ्चदशस्ते अस्मि ॥१९॥
सहस्रपृष्ठः शतधारो अक्षितो ब्रह्मौदनो देवयानः स्वर्गः ।
अमूंस्त आ दधामि प्रजया रेषयैनान्बलिहाराय मृडतान्मह्यमेव ॥२०॥
उदेहि वेदिं प्रजया वर्धयैनां नुदस्व रक्षः प्रतरं धेह्येनाम् ।
श्रिया समानानति सर्वान्त्स्यामाधस्पदं द्विषतस्पादयामि ॥२१॥

अग्ने । चरुः । यज्ञियः । त्वा । अधि । अरुक्षत् । शुचिः । तपिष्ठः । तपसा । तप । एनम् ।
आर्षेयाः । दैवाः । अभिऽसंगत्य । भागम् । इमम् । तपिष्ठाः । ऋतुऽभिः । तपन्तु ॥ १६ ॥
शुद्धाः । पूताः । योषितः । यज्ञियाः । इमाः । आपः । चरुम् । अव । सर्पन्तु । शुभ्राः ।
अदुः । प्रऽजाम् । बहुलान् । पशून् । नः । पक्ता । ओदनस्य । सुऽकृताम् । एतु । लोकम् ॥
ब्रह्मणा । शुद्धाः । उत । पूताः । घृतेन । सोमस्य । अंशवः । तण्डुलाः । यज्ञियाः । इमे ।
अपः । प्र । विशत । प्रति । गृह्णातु । वः । चरुः । इमम् । पक्त्वा । सुऽकृताम् । एत । लोकम् ॥
उरुः । प्रथस्व । महता । महिम्ना । सहस्रऽपृष्ठः । सुऽकृतस्य । लोके ।
पितामहाः । पितरः । प्रऽजा । उपऽजा । अहम् । पक्ता । पञ्चऽदशः । ते । अस्मि ॥ १९ ॥
सहस्रऽपृष्ठः । शतऽधारः । अक्षितः । ब्रह्मऽओदनः । देवऽयानः । स्वःऽगः । अमून् ।
ते । आ । दधामि । प्रऽजया । रेषय । एनान् । बलिऽहाराय । मृडतात् । मह्यम् । एव ॥२०
उत्ऽएहि । वेदिम् । प्रऽजया । वर्धय । एनाम् । नुदस्व । रक्षः । प्रऽतरम् । धेहि । एनाम् ।
श्रिया । समानान् । अति । सर्वान् । स्याम् । अधःऽपदम् । द्विषतः । पादयामि ॥ २१ ॥

XI.1.16 O Agni, the worshipful pot (caruḥ) hath ascended thee; bright, very hot, do thou heat it with heat; let those of the seers, those of the gods, gathering unto their share very hot, heat this with the seasons (ṛtubhiḥ).

XI.1.17 Let these cleansed, purified, worshipful maidens, the waters, beauteous ones, creep down to the pot; they have given us abundant progeny, cattle; let the cooker of the rice-dish go to the world of the well-doers.

XI.1.18 Cleansed with prayer (brahmaṇa) and purified with ghee (ghṛta) shoots of Soma (are) these worshipful rice-grains, enter ye the waters, let the pot receive you; having cooked this, go ye to the world of the well-doers.

XI.1.19 Spread thyself broad, with great greatness, thousand-backed in the world of the well-done; grandfathers, fathers, progeny, descendants (upajā), I am thy fifteen-fold cooker.

XI.1.20 Thousand-backed, hundred-streamed, unexhausted, (is) the brāhman-rice-dish, god-travelled, heaven-going; them yonder I assign to thee; lessen (?) thou them with progeny; be gracious then to me (as) bringer of tribute.

XI.1.21 Go thou up to the sacrificial hearth; increase her with progeny; push (away) the wild demon; set her further forward; by fortune may we surpass all (our) equals; I make (our) haters to fall under foot.

अभ्यावर्तस्व पशुभिः सहैनां प्रत्यङेनां देवताभिः सहैधि ।
मा त्वा प्रापच्छपथो माभिचारः स्वे क्षेत्रे अनमीवा वि राज ॥२२॥
ऋतेन तष्टा मनसा हितैषा ब्रह्मौदनस्य विहिता वेदिरग्रे ।
अंसद्रीं शुद्धामुप धेहि नारि तत्रौदनं सादय दैवानाम् ॥२३॥
अदितेर्हस्तां स्रुचमेतां द्वितीयां सप्तऋषयो भूतकृतो यामकृण्वन् ।
सा गात्राणि विदुष्योदनस्य दर्विर्वेद्यामध्येनं चिनोतु ॥२४॥
शृतं त्वा हव्यमुप सीदन्तु दैवा निःसृप्याग्नेः पुनरेनान्प्र सीद ।
सोमेन पूतो जठरे सीद ब्रह्मणामार्षेयास्ते मा रिषन्प्राशितारः ॥२५॥
सोम राजन्त्संज्ञानमा वपैभ्यः सुब्राह्मणा यतमे त्वोपसीदान् ।
ऋषीनार्षेयांस्तपसोधि जातान्ब्रह्मौदने सुहवा जोहवीमि ॥२६॥
शुद्धाः पूता योषितो यज्ञिया इमा ब्रह्मणां हस्तेषु प्रपृथक्सादयामि ।
यत्काम इदमभिषिञ्चामि वोहमिन्द्रो मरुत्वान्त्स ददादिदं मे ॥२७॥

अभिऽआवर्तस्व । पशुऽभिः । सह । एनाम् । प्रत्यङ् । एनाम् । देवताभिः । सह । एधि ।
मा । त्वा । प्र । आपत् । शपथः । मा । अभिऽचारः । स्वे । क्षेत्रे । अनमीवा । वि । राज ॥
ऋतेन । तष्टा । मनसा । हिता । एषा । ब्रह्मऽओदनस्य । विऽहिता । वेदिः । अग्रे ।
अंसद्रीम् । शुद्धाम् । उप । धेहि । नारि । तत्र । ओदनम् । सादय । दैवानाम् ॥ २३ ॥
अदितेः । हस्ताम् । स्रुचम् । एताम् । द्वितीयाम् । सप्तऽऋषयः । भूतऽकृतः । याम् । अकृण्वन् ।
सा । गात्राणि । विदुषी । ओदनस्य । दर्विः । वेद्याम् । अधि । एनम् । चिनोतु ॥ २४ ॥
शृतम् । त्वा । हव्यम् । उप । सीदन्तु । दैवाः । निःऽसृप्य । अग्नेः । पुनः । एनान् । प्र । सीद ।
सोमेन । पूतः । जठरे । सीद । ब्रह्मणाम् । आर्षेयाः । ते । मा । रिषन् । प्रऽअशितारः ॥ २५ ॥
सोम । राजन् । समऽज्ञानम् । आ । वप । एभ्यः । सुऽब्राह्मणाः । यतमे । त्वा । उपऽसीदान् ।
ऋषीन् । आर्षेयान् । तपसः । अधि । जातान् । ब्रह्मऽओदने । सुऽहवा । जोहवीमि ॥ २६ ॥
शुद्धाः । पूताः । योषितः । यज्ञियाः । इमाः । ब्रह्मणाम् । हस्तेषु । प्रऽपृथक् । सादयामि ।
यत्ऽकामः । इदम् । अभिऽसिञ्चामि । वः । अहम् । इन्द्रः । मरुत्वान् । सः । ददात् । इदम् । मे ॥

XI.1.22 Turn thou toward her together with cattle; be opposite to her together with the divinities; let not curse attain thee, nor wicked craft (abhicāra) bear rule (vi-rāj) in thine own field (kṣetra), free from disease.

XI.1.23 Fashioned by righteousness (ṛta) set by mind, this was ordained in the beginning the sacrificial hearth of the brāhman rice-dish; apply, O woman, the cleansed shoulder-bearer (?); on that set the rice-dish of them of the gods.

XI.1.24 Aditi's hand, this second ladle (sruc), which the seven-seers, being makers, made -- let that spoon, knowing the members of the rice-dish, collect it upon the sacrificial hearth.

XI.1.25 Let them of the gods sit by thee, a cooked (śṛta) oblation; having crept out of the fire, sit thou forward again to them; purified by soma, sit thou in the belly of the worshipers; let not them of the seers, partakers (prāśitār) of thee, suffer harm.

XI.1.26 O king Soma, strew harmony for them, for whatsoever good Brāhmans shall sit by thee; with good call, I call loudly to the brāhman-rice-dish,the seers, them of the seers, born from penance (tapas).

XI.1.27 These cleansed purified worshipful maidens I seat in separate succession in the hands of the priests (brāhman); with what desire I now pour you on, may resplendent Indra here with the Maruts (cloud bearing wind) grant me that.

इदं मे ज्योतिरमृतं हिरण्यं पक्वं क्षेत्रात्कामदुघा म एषा ।
इदं धनं नि दधे ब्राह्मणेषु कृण्वे पन्थां पितृषु यः स्वर्गः ॥२८॥
अग्नौ तुषाना वप जातवेदसि परः कम्बूकाँ अप मृड्ढि दूरम् ।
एतं शुश्रुम गृहराजस्य भागमथो विद्म निर्ऋतेर्भागधेयम् ॥२९॥
श्राम्यतः पचतो विद्धि सुन्वतः पन्थां स्वर्गमधि रोहयैनम् ।
येन रोहात्परमापद्य यद्वय उत्तमं नाकं परमं व्योम ॥३०॥
बभ्रेरध्वर्यो मुखमेतद्वि मृड्ढ्याज्याय लोकं कृणुहि प्रविद्वान् ।
घृतेन गात्रानु सर्वा वि मृड्ढि कृण्वे पन्थां पितृषु यः स्वर्गः ॥३१॥
बभ्रे रक्षः समदमा वपैभ्योऽब्राह्मणा यतमे त्वोपसीदान् ।
पुरीषिणः प्रथमानाः पुरस्तादार्षेयास्ते मा रिषन्प्राशितारः ॥३२॥
आर्षेयेषु नि दध ओदन त्वा नानार्षेयाणामप्यस्त्यत्र ।
अग्निर्मे गोप्ता मरुतश्च सर्वे विश्वे देवा अभि रक्षन्तु पक्वम् ॥३३॥

इदम् । मे । ज्योतिः । अमृतम् । हिरण्यम् । पक्वम् । क्षेत्रात् । कामऽदुघा । मे । एषा ।
इदम् । धनम् । नि । दधे । ब्राह्मणेषु । कृण्वे । पन्थाम् । पितृषु । यः । स्वःऽगः ॥ २८ ॥
अग्नौ । तुषान् । आ । वप । जातऽवेदसि । परः । कम्बूकान् । अप । मृड्ढि । दूरम् ।
एतम् । शुश्रुम । गृहऽराजस्य । भागम् । अथो इति । विद्म । निःऋतेः । भागऽधेयम् ॥२९॥
श्राम्यतः । पचतः । विद्धि । सुन्वतः । पन्थाम् । स्वःऽगम् । अधि । रोहय । एनम् ।
येन । रोहात् । परम् । आऽपद्य । यत् । वयः । उत्ऽतमम् । नाकम् । परमम् । विऽओम ॥३०॥
बभ्रेः । अध्वर्यो इति । मुखम् । एतत् । वि । मृड्ढि । आज्याय । लोकम् । कृणुहि । प्रऽविद्वान् ।
घृतेन । गात्रा । अनु । सर्वा । वि । मृड्ढि । कृण्वे । पन्थाम् । पितृषु । यः । स्वःऽगः ॥ ३१ ॥
बभ्रे । रक्षः । सऽमदम् । आ । वप । एभ्यः । अब्राह्मणाः । यतमे । त्वा । उपऽसीदान् ।
पुरीषिणः । प्रथमानाः । पुरस्तात् । आर्षेयाः । ते । मा । रिषन् । प्रऽअशितारः ॥ ३२ ॥
आर्षेयेषु । नि । दधे । ओदन । त्वा । न । अनार्षेयाणाम् । अपि । अस्ति । अत्र ।
अग्निः । मे । गोप्ता । मरुतः । च । सर्वे । विश्वे । देवाः । अभि । रक्षन्तु । पक्वम् ॥ ३३ ॥

XI.1.28 This my light (jyotir) immortal gold, cooked (pakva) from the field, this my desire milker; this riches I deposit in the Brāhmaṇs; I make a road to the Fathers (pitṛ-yana) that is heaven-going.

XI.1.29 Strew thou the husks in the fire, in Jātavedas; (the one who knows all, born-ones) wipe off far away the chaff (? kambūkān); this we have heard to be the share of the house-king; also we know the portion (bhāgadheya) of perdition (nirṛti).

XI.1.30 Know thou the toiling, cooking, soma-pressing one; make him to ascend the heaven-going road, by which he may ascend, arriving at the vigor that is beyond, to the highest firmament, to the furthest vault (param vyomany).

XI.1.31 Wipe off, O serving priest (adhvaryu) this face of the bearing one (? babhri); make thou, understanding it, room for the sacrificial butter; wipe off with ghee along all (its) members; I make a road to the Fathers that is heaven-going.

XI.1.32 O bearing one, (as) a wild-wicked demon, strew discord for them, for whatsoever non-Brāhmaṇs shall sit by thee; rich in ground spreading themselves forward, let not them of the seers, partakers of thee, suffer harm.

XI.1.33 I set thee down, O rice-dish, among them of the seers; for them that are not of the seers there is no portion here; let Agni my guardian, and all the Maurts, i.e., cloud-bearing winds, let all the gods defend the cooked (offering).

यज्ञं दुहानं सदमित्प्रपीनं पुमांसं धेनुं सदनं रयीणाम् ।
प्रजामृतत्वमुत दीर्घमायू रायश्च पोषैरुप त्वा सदेम ॥३४॥
वृषभोऽसि स्वर्ग ऋषीनार्षेयान्गच्छ ।
सुकृतां लोके सीद तत्र नौ संस्कृतम् ॥३५॥
समाचिनुष्वानुसंप्रयाह्यग्ने पथः कल्पय देवयानान् ।
एतैः सुकृतैरनु गच्छेम यज्ञं नाके तिष्ठन्तमधि सप्तरश्मौ ॥३६॥
येन देवा ज्योतिषा द्यामुदायन्ब्रह्मौदनं पक्त्वा सुकृतस्य लोकम् ।
तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभि नाकमुत्तमम् ॥३७॥

यज्ञम् । दुहानम् । सदम् । इत् । प्रऽपीनम् । पुमांसम् । धेनुम् । सदनम् । रयीणाम् ।
प्रजाऽअमृतत्वम् । उत । दीर्घम् । आयुः । रायः । च । पोषैः । उप । त्वा । सदेम ॥ ३४ ॥

वृषभः । असि । स्वःऽगः । ऋषीन् । आर्षेयान् । गच्छ ।
सुऽकृताम् । लोके । सीद । तत्र । नौ । संस्कृतम् ॥ ३५ ॥

समऽआचिनुष्व । अनुऽसंप्रयाहि । अग्ने । पथः । कल्पय । देवऽयानान् । एतैः । सुऽकृतैः ।
अनु । गच्छेम । यज्ञम् । नाके । तिष्ठन्तम् । अधि । सप्तऽरश्मौ ॥ ३६ ॥

येन । देवाः । ज्योतिषा । द्याम् । उत्ऽआयन् । ब्रह्मऽओदनम् । पक्त्वा । सुऽकृतस्य । लोकम् ।
तेन । गेष्म । सुऽकृतस्य । लोकम् । स्वः । आऽरोहन्तः । अभि । नाकम् । उत्ऽतमम् ॥३७॥

(२) द्वितीयं सूक्तम्

(१–३१) एकत्रिंशदृचस्यास्य सूक्तस्याथर्वा ऋषिः । मन्त्रोक्तरुद्रादयो देवताः । (१) प्रथमर्चः परातिजागता विराड्जगती, (२) द्वितीयाया अनुष्टुब्गर्भा पञ्चपदा विराड्जगती, (३) तृतीयायाश्चतुष्पदा स्वराडुष्णिक्, (४–५, ७, १३, १५–१६, २१) चतुर्थीपञ्चमीसप्तमीत्रयोदशीपञ्चदशीषोडश्येकविंशीनामनुष्टुप्, (६) षष्ठ्या आर्षी गायत्री, (८) अष्टम्या महाबृहती, (९) नवम्या आर्षी त्रिष्टुप्, (१०) दशम्याः पुरःकृतिस्त्रिपदा विराड्त्रिष्टुप्, (११) एकादश्याः पञ्चपदा विराड्जगतीगर्भा शक्वरी, (१२) द्वादश्या भुरिक्त्रिष्टुप्, (१४, १७–१९, २३, २६–२७) चतुर्दश्याः सप्तदश्यादितृचस्य त्रयोविंशीषड्विंशीसप्तविंशीनाञ्च विराड्गायत्री, (२०) विंश्या भुरिग्गायत्री, (२२) द्वाविंश्यास्त्रिपदा विषमपादलक्ष्मा महाबृहती, (२४, २९) चतुर्विंश्येकोनत्रिंश्योर्जगती, (२५) पञ्चविंश्याः पञ्चपदातिशक्वरी, (२८) अष्टाविंश्यास्त्रिष्टुप्, (३०) त्रिंश्याश्चतुष्पदोष्णिक्, (३१) एकत्रिंश्याश्च त्र्यवसाना षट्पदा विपरीतपादलक्ष्मा त्रिष्टुप् छन्दांसि ॥

भवाशर्वौ मृडतं माभि यातं भूतपती पशुपती नमो वाम् ।
प्रतिहितामायतां मा वि स्राष्टं मा नो हिंसिष्टं द्विपदो मा चतुष्पदः ॥१॥

भवाशर्वौ । मृडतम् । मा । अभि । यातम् । भूतपती इति भूतऽपती । पशुपती
इति पशुऽपती । नमः । वाम् । प्रतिऽहिताम् । आऽयताम् । मा । वि । स्राष्टम् । मा ।
नः । हिंसिष्टम् । द्विऽपदः । मा । चतुःऽपदः ॥ १ ॥

XI.1.34 The offering, yielding milk (duh), constantly full (prapīna) a male (pumāṇs) milch-cow, seat of wealth, immortality through offspring, and a long life-time -- and may we sit by thee with abundance (pl.) of wealth.

XI.1.35 Thou art a heaven-going bull; go to the seers, to them of the seers; sit in the world of the well-doing (suhrtasya like) there is their preparation (sanskṛta) for us both.

XI.1.36 Gather thou together unto, go thou together forth after; O Agni, make ready (kalpaya) the roads travelled by the gods; by them well-made, may we go after the offering, that stands upon the seven-rayed firmament.

XI.1.37 With what light the gods went up to the sky, having cooked the brāhman-rice-dish, to the world of the well-done, with that may we go to the world for the well-done, ascending the heaven, unto the highest firmament.

Rudra (Bhava and Śarva)

XI.2.1 O Bhava and Ṣarva, be gracious; do not go against (us); ye lords of beings, lords of cattle, homage to you ! (the arrow) that is fitted, that is drawn, do not let fly; do not harm our bipeds nor quadrupeds (dvipadaḥ-catuspadaḥ).

शुने क्रोष्ट्रे मा शरीराणि कर्तमलिक्लवेभ्यो गृध्रेभ्यो ये च कृष्णा अविष्यवः ।
मक्षिकास्ते पशुपते वयांसि ते विघसे मा विदन्त ॥२॥
क्रन्दाय ते प्राणाय याश्च ते भव रोपयः । नमस्ते रुद्र कृण्मः सहस्राक्षायामर्त्य ॥३॥
पुरस्तात्ते नमः कृण्म उत्तरादधरादुत । अभीवर्गाद्दिवस्पर्यन्तरिक्षाय ते नमः ॥४॥
मुखाय ते पशुपते यानि चक्षूंषि ते भव । त्वचे रूपाय संदृशे प्रतीचीनाय ते नमः ॥५॥
अङ्गेभ्यस्त उदराय जिह्वाया आस्याय ते । दद्भ्यो गन्धाय ते नमः ॥६॥
अस्त्रा नीलशिखण्डेन सहस्राक्षेण वाजिना । रुद्रेणार्धकघातिना तेन मा समरामहि ॥७॥

शुने । क्रोष्ट्रे । मा । शरीराणि । कर्तम् । अलिक्लवेभ्यः । गृध्रेभ्यः । ये । च । कृष्णाः ।
अविष्यवः । मक्षिकाः । ते । पशुऽपते । वयांसि । ते । विऽघसे । मा । विदन्त ॥ २ ॥

क्रन्दाय । ते । प्राणाय । याः । च । ते । भव । रोपयः ।
नमः । ते । रुद्र । कृण्मः । सहस्रऽअक्षाय । अमर्त्य ॥ ३ ॥

पुरस्तात् । ते । नमः । कृण्मः । उत्तरात् । अधरात् । उत ।
अभिऽवर्गात् । दिवः । परि । अन्तरिक्षाय । ते । नमः ॥ ४ ॥

मुखाय । ते । पशुऽपते । यानि । चक्षूंषि । ते । भव ।
त्वचे । रूपाय । सम्ऽदृशे । प्रतीचीनाय । ते । नमः ॥ ५ ॥

अङ्गेभ्यः । ते । उदराय । जिह्वायै । आस्याय । ते । दत्ऽभ्यः । गन्धाय । ते । नमः ॥

अस्त्रा । नीलऽशिखण्डेन । सहस्रऽअक्षेण । वाजिना ।
रुद्रेण । अर्धकऽघातिना । तेन । मा । सम् । अरामहि ॥ ७ ॥

XI.2.2 Make ye not bodies (śarīra) for the dog, the jakal, for the buzzards (? aliklava), the vultures, and them that are black (and) greedy (aviṣyu); let thy flies, lord of cattle, let thy birds not find themselves at food.

XI.2.3 Unto thy noise (? kranda), thy breath, and what pangs (? ropi) are thine, O Bhava - homage we pay thee that art thouand-eyed (sahasrākṣa), O Rudra, immortal one.

XI.2.4 We pay thee homage in front, above, also below; forth from the sphere of the sky, homage (be) to thine atmosphere.

XI.2.5 To thy face, O lord of cattle; the eyes that thou hast, O Bhava; to (thy) skin, form, aspect, to thee standing opposite (be) homage.

XI.2.6 To thy members, belly, tongue, thy mouth, to thy teeth, smell, (be) homage.

XI.2.7 With the blue-locked archer, the thousand-eyed, vigorous, with Rudra, the half-smiter (?) - with him may we not come into collision (samarāmahi).

स नो भवः परि वृणक्तु विश्वत आप इवाग्निः परि वृणक्तु नो भवः ।
मा नोभि मांस्त नमो अस्त्वस्मै ॥८॥
चतुर्नमो अष्टकृत्वो भवाय दश कृत्वः पशुपते नमस्ते ।
तवेमे पञ्च पशवो विभक्ता गावो अश्वाः पुरुषा अजावयः ॥९॥
तव चतस्रः प्रदिशस्तव द्यौस्तव पृथिवी तवेदमुग्रोर्व॑न्तरिक्षम् ।
तवेदं सर्वमात्मन्वद्यत्प्राणत्पृथिवीमनु ॥१०॥
उरुः कोशो वसुधानस्तवायं यस्मिन्निमा विश्वा भुवनान्यन्तः ।
स नो मृड पशुपते नमस्ते परः क्रोष्टारो अभिभाः श्वानः परो यन्त्वघरुदो विकेश्य॒ः ॥११॥
धनुर्बिभर्षि हरितं हिरण्ययं सहस्रघ्नि शतवधं शिखण्डिनम् ।
रुद्रस्येषुश्चरति देवहेतिस्तस्यै नमो यतमस्यां दिशी३तः ॥१२॥
यो३ भियातो निलयते त्वां रुद्र निचिकीर्षति ।
पश्चादनुप्रयुङ्क्षे तं विद्धस्य पदनीरिव ॥१३॥

सः । नः । भवः । परि । वृणक्तु । विश्वतः । आपःऽइव । अग्निः । परि । वृणक्तु । नः । भवः ।
मा । नः । अभि । मांस्त । नमः । अस्तु । अस्मै ॥ ८ ॥

चतुः । नमः । अष्टऽकृत्वः । भवाय । दश । कृत्वः । पशुपते । नमः । ते ।
तव । इमे । पञ्च । पशवः । विऽभक्ताः । गावः । अश्वाः । पुरुषाः । अजऽअवयः ॥ ९ ॥

तव । चतस्रः । प्रऽदिशः । तव । द्यौः । तव । पृथिवी । तव । इदम् । उग्र । उरु । अन्तरिक्षम् ।
तव । इदम् । सर्वम् । आत्मन्ऽवत् । यत् । प्राणत् । पृथिवीम् । अनु ॥ १० ॥

उरुः । कोशः । वसुऽधानः । तव । अयम् । यस्मिन् । इमा । विश्वा । भुवनानि । अन्तः ।
सः । नः । मृड । पशुऽपते । नमः । ते । परः । क्रोष्टारः । अभिऽभाः । श्वानः । परः । यन्तु ।
अघऽरुदः । विऽकेश्य॒ः ॥ ११ ॥

धनुः । बिभर्षि । हरितम् । हिरण्ययम् । सहस्रऽघ्नि । शतऽवधम् । शिखण्डिन् ।
रुद्रस्य । इषुः । चरति । देवऽहेतिः । तस्यै । नमः । यतमस्याम् । दिशि । इतः ॥१२॥

यः । अभिऽयातः । निऽलयते । त्वाम् । रुद्र । निऽचिकीर्षति ।
पश्चात् । अनुऽप्रयुङ्क्षे । तम् । विद्धस्य । पदनीःऽइव ॥ १३ ॥

XI.2.8 Let this Bhava avoid us on every side; as fire the waters, let Bhava avoid us; let him not plot against us; homage be to him.

XI.2.9 Four times (catuṣ) homage, eight times, to Bhava; ten times, O lord of cattle, be homage to thee; thine are shared out these five creatures (paśvāḥ) i.e., cows, horses, men, sheep and goats.

XI.2.10 Thine are the four directions, thine the heaven, the earth, thine, O formidable one, this wide atmosphere, thine is all this that has life (ātman), that is breathing upon (anu) the earth.

XI.2.11 This wide vessel, holder of good things, is thine, within which are all these beings; do thou be gracious to us, O lord of cattle; homage to thee; away let the jackals, the serpents (abhibhāḥ), the dogs go, away the weepers of evil with dishevled hair (`vikeśyaḥ).

XI.2.12 Thou bearest a yellow golden bow, a thousand-slaying, hundred weaponed, O tufted one; Rudra's arrow goes, a god-missile ; to that be homage, in whichever direction from hẹre.

XI.2.13 He who, attacked (abhi-ytaḥ), hides himself, (who) tries to put thee down, O Rudra, him from behind thou pursuest, like the tracker (? padanīḥ) of one. that is pierced.

भवारुद्रौ सयुजा संविदानावुभावुग्रौ चरतो वीर्याय ।
ताभ्यां नमो यतमस्यां दिशीऽतः ॥१४॥

नमस्तेस्त्वायते नमो अस्तु परायते ।
नमस्ते रुद्र तिष्ठत आसीनायोत ते नमः ॥१५॥

नमः सायं नमः प्रातर्नमो रात्र्या नमो दिवा ।
भवाय च शर्वाय चोभाभ्यामकरं नमः ॥१६॥

सहस्राक्षमतिपश्यं पुरस्ताद्रुद्रमस्यन्तं बहुधा विपश्चितम् ।
मोपाराम जिह्वयेयमानम् ॥१७॥

श्यावाश्वं कृष्णमसितं मृणन्तं भीमं रथं केशिनः पादयन्तम् ।
पूर्वे प्रतीमो नमो अस्त्वस्मै ॥१८॥

मा नोभि स्रा मत्यं देवहेतिं मा नः क्रुधः पशुपते नमस्ते ।
अन्यत्रास्मद्दिव्यां शाखां वि धूनु ॥१९॥

भवारुद्रौ । सऽयुजा । सम्ऽविदानौ । उभौ । उग्रौ । चरतः । वीर्याय ।
ताभ्याम् । नमः । यतमस्याम् । दिशि । इतः ॥ १४ ॥

नमः । ते । अस्तु । आऽयते । नमः । अस्तु । पराऽयते ।
नमः । ते । रुद्र । तिष्ठते । आसीनाय । उत । ते । नमः ॥ १५ ॥

नमः । सायम् । नमः । प्रातः । नमः । रात्र्या । नमः । दिवा ।
भवाय । च । शर्वाय । च । उभाभ्याम् । अकरम् । नमः ॥ १६ ॥

सहस्रऽअक्षम् । अतिऽपश्यम् । पुरस्तात् । रुद्रम् । अस्यन्तम् । बहुऽधा । विपःऽचितम् ।
मा । उप । अराम । जिह्वया । ईयमानम् ॥ १७ ॥

श्यावऽअश्वम् । कृष्णम् । असितम् । मृणन्तम् । भीमम् । रथम् । केशिनः । पादयन्तम् ।
पूर्वे । प्रति । इमः । नमः । अस्तु । अस्मै ॥ १८ ॥

मा । नः । अभि । स्राः । मत्यम् । देवऽहेतिम् । मा । नः । क्रुधः । पशुऽपते । नमः । ते ।
अन्यत्र । अस्मत् । दिव्याम् । शाखाम् । वि । धूनु ॥ १९ ॥

XI.2.14 Bhava and Rudra, allied, in concord, both go about, formidable, unto heroism; to them be homage, in whichever direction from here.

XI.2.15 Homage be to thee coming, homage be (to thee) going away; homage to thee, O Rudra, standing; to thee sitting also (be) homage.

XI.2.16 Homage in the evening, homage in the morning, homage by night, homage by day; to Bhava and to Sarva, to both have I paid homage.

XI.2.17 With the thousand-eyed one, seeing across in front, with Rudra, hurling in many places, inspired one, may we not come in collision, as he goes about (īya) with the tongue.

XI.2.18 We go forward (pūrva) to meet him of dark horses, black, swarthy, killing, fearful, making to fall the chariot of the hairy one (keśin); homage be to him.

XI.2.19 Do not let fly at us the club (? matyā), the god-missile; be not angry at us, O lord of cattle; homage to theee; elsewhere than (over) us shake out the heavenly bough.

मा नो हिंसीरधि नो ब्रूहि परि णो वृङ्ग्धि मा क्रुधः । मा त्वया समरामहि ॥२०॥

मा नो गोषु पुरुषेषु मा गृधो नो अजाविषु ।
अन्यत्रोग्र वि वर्तय पियारूणां प्रजां जहि ॥२१॥

यस्य तक्मा कासिका हेतिरेकमश्वस्येव वृषणः क्रन्द एति ।
अभिपूर्वं निर्णयते नमो अस्त्वस्मै ॥२२॥

योऽन्तरिक्षे तिष्ठति विष्टभितोऽयज्वनः प्रमृणन्देवपीयून् ।
तस्मै नमो दशभिः शक्वरीभिः ॥२३॥

तुभ्यमारण्याः पशवो मृगा वने हिता हंसाः सुपर्णाः शकुना वयांसि ।
तव यक्षं पशुपते अप्स्वन्तस्तुभ्यं क्षरन्ति दिव्या आपो वृधे ॥२४॥

शिंशुमारा अजगराः पुरीकया जषा मत्स्या रजसा येभ्यो अस्यसि ।
न ते दूरं न परिष्ठास्ति ते भव सद्यः सर्वान्परि
पश्यसि भूमिं पूर्वस्माद्धंस्युत्तरस्मिन्त्समुद्रे ॥२५॥

मा । नः । हिंसीः । अधि । नः । ब्रूहि । परि । नः । वृङ्ग्धि । मा । क्रुधः । मा । त्वया । सम् । अरामहि ॥ २०॥

मा । नः । गोषु । पुरुषेषु । मा । गृधः । नः । अजऽअविषु ।
अन्यत्र । उग्र । वि । वर्तय । पियारूणाम् । प्रऽजाम् । जहि ॥ २१ ॥

यस्य । तक्मा । कासिका । हेतिः । एकम् । अश्वस्यऽइव । वृषणः । क्रन्दः । एति ।
अभिऽपूर्वम् । निःऽनयते । नमः । अस्तु । अस्मै ॥ २२ ॥

यः । अन्तरिक्षे । तिष्ठति । विऽस्तभितः । अयज्वनः । प्रऽमृणन् । देवऽपीयून् ।
तस्मै । नमः । दशऽभिः । शक्वरीभिः ॥ २३ ॥

तुभ्यम् । आरण्याः । पशवः । मृगाः । वने । हिताः । हंसाः । सुऽपर्णाः । शकुनाः । वयांसि ।
तव । यक्षम् । पशुऽपते । अप्ऽसु । अन्तः । तुभ्यम् । क्षरन्ति । दिव्याः । आपः । वृधे ॥२४॥

शिंशुमाराः । अजगराः । पुरीकयाः । जषाः । मत्स्याः । रजसाः । येभ्यः । अस्यसि ।
न । ते । दूरम् । न । परिऽस्था । अस्ति । ते । भव । सद्यः । सर्वान् । परि । पश्यसि ।
भूमिम् । पूर्वस्मात् । हंसि । उत्तरस्मिन् । समुद्रे ॥ २५ ॥

XI.2.20 Do not harm us; bless us; avoid us; be not angry; let us not come into collision with thee.

XI.2.21 (Be) not (greedy) for our kine, our men; be not greedy for our goats and sheep; elsewhere, O formidable one, roll forth (thy missile); smite the progeny of the mockers (piyarūṇā).

XI.2.22 Of whom the takman, the kāsikā, goes as one weapon, like the noise of a stallion horse, to him, leading out in succession, be homage.

XI.2.23 He who stands propped up in the atmoshere, killing the non-sacrificing, the god-mockers -- to him be homage with the ten clever ones (śakvarī).

XI.2.24 To thee are assigned the forest animals (paśu), the wild beasts in the woods, the geese (hansa), eagles, hawks, birds; thine, O lord of cattle, is the monster (? yakṣa) within the waters; for thine increase flow the waters of the heaven.

XI.2.25 The dolphins (śiśumāra), boad (ajagara), purīkayās, jaṣhās, fishes, rajasās, at which thou hurlest: there is no distance for thee nor hindrance for thee, O Bhava; at once thou lookest over the whole earth; from the eastern thou smitest in the northern ocean.

मा नो रुद्र तक्मना मा विषेण मा नः सं स्रा दिव्येनाग्निना ।
अन्यत्रास्मद्विद्युतं पातयैताम् ॥२६॥
भवो दिवो भव ईशे पृथिव्या भव आ पप्र उर्व१न्तरिक्षम् ।
तस्मै नमो यतमस्यां दिशी३तः ॥२७॥
भव राजन्यजमानाय मृड पशूनां हि पशुपतिर्बभूथ ।
यः श्रद्दधाति सन्ति देवा इति चतुष्पदे द्विपदेऽस्य मृड ॥२८॥
मा नो महान्तमुत मा नो अर्भकं मा नो वहन्तमुत मा नो वक्ष्यतः ।
मा नो हिंसीः पितरं मातरं च स्वां तन्वं रुद्र मा रीरिषो नः ॥२९॥
रुद्रस्यैलबकारेभ्योऽसंसूक्तगिलेभ्यः ।
इदं महास्येभ्यः श्वभ्यो अकरं नमः ॥३०॥
नमस्ते घोषिणीभ्यो नमस्ते केशिनीभ्यः ।
नमो नमस्कृताभ्यो नमः संभुञ्जतीभ्यः ।
नमस्ते देव सेनाभ्यः स्वस्ति नो अभयं च नः ॥३१॥

मा । नः । रुद्र । तक्मना । मा । विषेण । मा । नः । सम् । स्राः । दिव्येन । अग्निना ।
अन्यत्र । अस्मत् । विऽद्युतम् । पातय । एताम् ॥ २६ ॥
भवः । दिवः । भवः । ईशे । पृथिव्याः । भवः । आ । पप्रे । उरु । अन्तरिक्षम् ।
तस्मै । नमः । यतमस्याम् । दिशि । इतः ॥ २७ ॥
भव । राजन् । यजमानाय । मृड । पशूनाम् । हि । पशुऽपतिः । बभूथ ।
यः । श्रत्ऽदधाति । सन्ति । देवाः । इति । चतुःऽपदे । द्विऽपदे । अस्य । मृड ॥ २८ ॥
मा । नः । महान्तम् । उत । मा । नः । अर्भकम् । मा । नः । वहन्तम् । उत । मा । नः । वक्ष्यतः ।
मा । नः । हिंसीः । पितरम् । मातरम् । च । स्वाम् । तन्वम् । रुद्र । मा । रिरिषः । नः ॥
रुद्रस्य । ऐलबऽकारेभ्यः । असंसूक्तऽगिलेभ्यः ।
इदम् । महाऽआस्येभ्यः । श्वऽभ्यः । अकरम् । नमः ॥ ३० ॥
नमः । ते । घोषिणीभ्यः । नमः । ते । केशिनीभ्यः । नमः । नमःऽकृताभ्यः । नमः । सम्ऽभुञ्जती-
भ्यः । नमः । ते । देव । सेनाभ्यः । स्वस्ति । नः । अभयम् । च । नः ॥ ३१ ॥

XI.2.26 Do not, O Rudra, unite (sum-srā) us with the takman, not with poison, not with the fire of heaven; elsewhere than (on) us make that lightning fall.

XI.2.27 Bhava is master (īśa) of the heaven, Bhava of the earth; Bhava has filled the wide atmosphere; to him be homage, in whichever direction from here.

XI.2.28 O king Bhava, be gracious to the sacrificer, for thou hast become cattle-lord of cattle; whoever has faith, saying "the gods are", be thou gracious to his bipeds (and) quadrupeds.

XI.2.29 Not our great one, not our small, not our carrying one, and not those that will carry, not our fther and mother do than harm, our own self (tanū). Rudra do not injure.

XI.2.30 To Rudra's howl-making, unhymned-swallowing(?), great-mouthed dogs I have paid this homage.

XI.2.31 Homage to thy noisy ones, homage to thy hairy ones, homage to those to whom homage is paid, homage to the jointly-enjoying - homage, (namely), O god to thine armies; welfare (be) to us, and fearless-ness to us.

(३) तृतीयं सूक्तम्

[१] प्रथमः पर्यायः

(१–३१) एकत्रिंशदृचस्यास्य पर्यायस्याथर्वा ऋषिः। बार्हस्पत्यौदनो देवता। (१, १४) प्रथमाचतुर्दश्योर्ऋचोरासुरी गायत्री, (२) द्वितीयायास्त्रिपदा समविषमा गायत्री, (३, ६, १०) तृतीयाषष्ठीदशमीनामासुरी पङ्क्तिः, (४, ८) चतुर्थ्यष्टम्योः साम्न्यनुष्टुप्, (५, १३, १५, २५) पञ्चमीत्रयोदशीपञ्चदशीपञ्चविंशीनां साम्न्युष्णिक्, (७, १९–२२) सप्तम्या एकोनविंश्यादिचतसृणाञ्च प्राजापत्यानुष्टुप्, (९, १७–१८) नवमीसप्तदश्यष्टादशीनामासुर्यनुष्टुप्, (११) एकादश्या भुरिगार्च्यनुष्टुप्, (१२) द्वादश्या याजुषी जगती, (१६, २३) षोडशीत्रयोविंश्योरासुरी बृहती, (२४) चतुर्विंश्यास्त्रिपदा प्राजापत्या बृहती, (२६) षड्विंश्या आर्च्युष्णिक्, (२७) सप्तविंश्याः साम्नी गायत्री, (२८) अष्टाविंश्याः साम्नी बृहती, (२९) एकोनत्रिंश्या भुरिक्साम्नी बृहती, (३०) त्रिंश्या याजुषी त्रिष्टुप्, (३१) एकत्रिंश्याश्चाल्पशो याजुषी वा पङ्क्तिश्छन्दांसि ॥

तस्यौदनस्य बृहस्पतिः शिरो ब्रह्म मुखम् ॥१॥
द्यावापृथिवी श्रोत्रे सूर्याचन्द्रमसावक्षिणी सप्तऋषयः प्राणापानाः ॥२॥
चक्षुर्मुसलं काम उलूखलम् ॥३॥
दितिः शूर्पमदितिः शूर्पग्राही वातोपाविनक् ॥४॥
अश्वाः कणा गावस्तण्डुला मशकास्तुषाः ॥५॥
कब्रु फलीकरणाः शरोभ्रम् ॥६॥

तस्य । ओदनस्य । बृहस्पतिः । शिरः । ब्रह्म । मुखम् ॥ १ ॥

द्यावापृथिवी इति । श्रोत्रे इति । सूर्याचन्द्रमसौ । अक्षिणी इति । सप्तऽऋषयः । प्राणापानाः ॥

चक्षुः । मुसलम् । कामः । उलूखलम् ॥ ३ ॥

दितिः । शूर्पम् । अदितिः । शूर्पऽग्राही । वातः । अप । अविनक् ॥ ४ ॥

अश्वाः । कणाः । गावः । तण्डुलाः । मशकाः । तुषाः ॥ ५ ॥

कब्रु । फलीऽकरणाः । शरः । अभ्रम् ॥ ६ ॥

PARYĀYA - I

Extolling the rice dish (odana)

XI.3.1 Of this rice-dish Brhaspati is the head, Brahman the mouth (mukha).

XI.3.2 Heaven and earth are the ears, sun and moon the eyes, the seven-seers the breaths and expirations.

XI.3.3 Sight (caksus) the pestle, desire (kāma) the mortar.

XI.3.4 Diti the winnowing basket, Aditi the basket-holder; the wind winnowed (apa-vic).

XI.3.5 Horses the corns (kaṇa), kine the grains (taṇḍula), fues the husks.

XI.3.6 Kabru the hulls, the cloud the stalk (śāra).

श्याममयोऽस्य मांसानि लोहितमस्य लोहितम् ॥७॥
त्रपु भस्म हरितं वर्णः पुष्करमस्य गन्धः ॥८॥
खलः पात्रं स्फ्यावंसावीषे अनूक्ये ॥९॥
आन्त्राणि जत्रवो गुदा वरत्राः ॥१०॥
इयमेव पृथिवी कुम्भी भवति राध्यमानस्यौदनस्य द्यौरपिधानम् ॥११॥
सीताः पर्शवः सिकता ऊबध्यम् ॥१२॥
ऋतं हस्तावनेजनं कुल्योपसेचनम् ॥१३॥
ऋचा कुम्भ्यधिहितार्त्विज्येन प्रेषिता ॥१४॥

श्यामम् । अयः । अस्य । मांसानि । लोहितम् । अस्य । लोहितम् ॥ ७ ॥
त्रपु । भस्म । हरितम् । वर्णः । पुष्करम् । अस्य । गन्धः ॥ ८ ॥
खलः । पात्रम् । स्फ्यौ । अंसौ । ईषे इति । अनूक्ये३ इति ॥ ९ ॥
आन्त्राणि । जत्रवः । गुदाः । वरत्राः ॥ १० ॥
इयम् । एव । पृथिवी । कुम्भी । भवति । राध्यमानस्य । ओदनस्य । द्यौः । अपिऽधानम् ॥
सीताः । पर्शवः । सिकताः । ऊबध्यम् ॥ १२ ॥
ऋतम् । हस्तऽअवनेजनम् । कुल्या । उपऽसेचनम् ॥ १३ ॥
ऋचा । कुम्भी । अधिऽहिता । आर्त्विज्येन । प्रऽइषिता ॥ १४ ॥

XI.3.7 Dark metal its flesh, red its blood (lohita).

XI.3.8 Tin (its) ash, greens (? haritam) (its) colour, blue lotus (puṣkara) its smell.

XI.3.9 The threshing-floor (its) receptacle, the two splints (sphya) (its) shoulders, the two poles (īṣa) (its) spines (anūkyā).

XI.3.10 Entrails (its) neck-ropes (? jatru) intestines (its) straps.

XI.3.11 This very earth is the vessel (kumbhi) of the finishing (rādh) rice dish, heaven the cover.

XI.3.12 The furrows (its) ribs, gravel the content of (its) bowles.

XI.3.13 Righteousness (ṛta) (its) hand-washing, the brook (kulyā) (its) pouring-on.

XI.3.14 With sacred verse (ṛcā) is the vessel put on, with priesthood sent forth;

ब्रह्मणा परिगृहीता साम्ना पर्यूढा ॥१५॥
बृहदायवनं रथन्तरं दर्विः ॥१६॥
ऋतवः पक्तार आर्तवाः समिन्धते ॥१७॥
चरुं पञ्चबिलमुखं घर्मो३ऽभीन्धे ॥१८॥
ओदनेन यज्ञवचः सर्वे लोकाः समाप्याः ॥१९॥
यस्मिन्त्समुद्रो द्यौर्भूमिस्त्रयोऽवरपरं श्रिताः ॥२०॥
यस्य देवा अकल्पन्तोच्छिष्टे षडशीतयः ॥२१॥
तं त्वौदनस्य पृच्छामि यो अस्य महिमा महान् ॥२२॥

ब्रह्मणा । परिऽगृहीता । साम्ना । परिऽऊढा ॥ १५ ॥
बृहत् । आऽयवनम् । रथम्ऽतरम् । दर्विः ॥ १६ ॥
ऋतवः । पक्तारः । आर्तवाः । सम् । इन्धते ॥ १७ ॥
चरुम् । पञ्चऽबिलम् । उखम् । घर्मः । अभि । इन्धे ॥ १८ ॥
ओदनेन । यज्ञऽवचः । सर्वे । लोकाः । समऽआप्याः ॥ १९ ॥
यस्मिन् । समुद्रः । द्यौः । भूमिः । त्रयः । अवरऽपरम् । श्रिताः ॥ २० ॥
यस्य । देवाः । अकल्पन्त । उत्ऽशिष्टे । षट् । अशीतयः ॥ २१ ॥
तम् । त्वा । ओदनस्य । पृच्छामि । यः । अस्य । महिमा । महान् ॥ २२ ॥

XI.3.15 With sacredness (brahman) seized about, with sacred chant (sāman) carried about.

XI.3.16 Bṛhat the stirring-stick, rathantara the spoon.

XI.3.17 The seasons the cooks, they of the seasons kindle fire.

XI.3.18 Heat (gharma) burns upon the pot of five openings, the boiler (ukha).

XI.3.19 By the rice-dish of him who hath an offering (?) all worlds are to be obtained together.

XI.3.20 In which (rice-dish) are set (śrita), one below the other, the three, sea, sky, earth.

XI.3.21 In the remnant (unchiṣṭa) of which took shape six times eighty gods.

XI.3.22 Thee here I ask of the rice-dish, what is its great greatness.

स य ओदनस्य महिमानं विद्यात् ॥२३॥
नाल्प इति ब्रूयान्नानुपसेचन इति नेदं च किं चेति ॥२४॥
यावद्दाताभिमनस्येत तन्नाति वदेत् ॥२५॥
ब्रह्मवादिनो वदन्ति पराञ्चमोदनं प्राशी३ः प्रत्यञ्चा३मिति ॥२६॥
त्वमोदनं प्राशी३स्त्वामोदना३ इति ॥२७॥
पराञ्चं चैनं प्राशीः प्राणास्त्वा हास्यन्तीत्येनमाह ॥२८॥
प्रत्यञ्चं चैनं प्राशीरपानास्त्वा हास्यन्तीत्येनमाह ॥२९॥
नैवाहमोदनं न मामोदनः ॥३०॥
ओदन एवौदनं प्राशीत् ॥३१॥

सः । यः । ओदनस्य । महिमानम् । विद्यात्[1] ॥ २३ ॥

न । अल्पः । इति । ब्रूयात् । न । अनुपऽसेचनः । इति । न । इदम् । च । किम् । च । इति ॥२४॥

यावत् । दाता । अभिऽमनस्येत । तत् । न । अति । वदेत् ॥ २५ ॥

ब्रह्मऽवादिनः । वदन्ति । पराञ्चम् । ओदनम् । प्र । आशी३ः । प्रत्यञ्चा३म् । इति ॥ २६ ॥

त्वम् । ओदनम् । प्र । आशी३ः । त्वाम् । ओदना३ः । इति ॥ २७ ॥

पराञ्चम् । च । एनम् । प्रऽआशीः । प्राणाः । त्वा । हास्यन्ति । इति । एनम् । आह ॥२८॥

प्रत्यञ्चम् । च । एनम् । प्रऽआशीः । अपानाः । त्वा । हास्यन्ति । इति । एनम् । आह ॥२९॥

न । एव । अहम् । ओदनम् । न । माम् । ओदनः ॥ ३० ॥

ओदनः । एव । ओदनम् । प्र । आशीत् ॥ ३१ ॥

XI.3.23 He who may know the greatness of the rice-dish -

XI.3.24 May not say "(it is) little, " not " (it is) without onpouring, " nor " (it is) this thing soever."

XI.3.25 As much as the giver may set his mind upon, that one should not overbid (ati-vad).

XI.3.26 The theologues (brahamavādin) say: hast thou eaten (pra-ac) the rice-dish as it was retiring (parāñc), or as it was coming on (pratyañc) ?

XI.3.27 Hast thou eaten the rice-dish, or the rice-dish thee ?

XI.3.28 If thou hast eaten it retiring, thy breaths (prāṇa) will quit thee: says to him.

XI.3.29 If thou hast eaten it coming on, thine expirations (apāna) will quit thee so one says to him.

XI.3.30 Not I indeed, (have eaten) the rice-dish, not the rice-dish me.

XI.3.31 The rice-dish itself hath eaten the rice-dish.

[२] द्वितीयः पर्यायः

(१–१८) अष्टादशगणस्यास्य पर्यायस्य [१, ७, १० (१), १–१८ (७)] प्रथमसप्तमदशमगणानां प्रथमानामवसानर्चां प्रथमाद्यष्टादशानाञ्च सप्तमीनां साम्नी त्रिष्टुप्, [१, ४, ११ (२), १–१८ (३), २–३, १३–१७ (५)] प्रथमचतुर्थैकादशानां द्वितीयानां, प्रथमाद्यष्टादशानां तृतीयानां, द्वितीयतृतीययोस्त्रयोदशादिपञ्चानाञ्च पञ्चमीनामेकपदासुरी गायत्री, [१, १०, १२, १६ (४)] प्रथमदशमद्वादशषोडशानाञ्चतुर्थीनां दैवी जगती, [२, १३ (४) द्वितीयत्रयोदशयोश्चतुर्थ्योरासुरी बृहती], [७, १३, १५ (२), १, ४–१२, १८ (५)] सप्तमत्रयोदशपञ्चदशानां द्वितीयानां, प्रथमस्य चतुर्थादिनवानामष्टादशस्य च पञ्चमीनासेकपदासुर्यनुष्टुप्, [१–१८ (६)] प्रथमाद्यष्टादशानां षष्ठीनां साम्न्यनुष्टुप्, [२–५, ८–९, ११–१८ (१)] द्वितीयादिचतुर्णामष्टमनवमयोरेकादशाद्यष्टानाञ्च प्रथमानामार्च्यनुष्टुप्, [६ (१)] षष्ठस्य प्रथमायाः साम्नी पङ्क्तिः, [२, ५, ९, १६, १७ (२)] द्वितीयपञ्चमनवमषोडशसप्तदशानां द्वितीयानामासुरी जगती, [३, ६, १०, १२, १४ (२)] तृतीयषष्ठदशमद्वादशचतुर्दशानां द्वितीयानामासुरी पङ्क्तिः, [३ (४)] तृतीयस्य चतुर्थ्या आसुरी त्रिष्टुप्, [४, १५, १७ (४)] चतुर्थपञ्चदशसप्तदशानां चतुर्थीनां याजुषी गायत्री, [५, ६, ९ (४)] पञ्चमषष्ठनवमानां चतुर्थीनां दैवी पङ्क्तिः, [७–८ (४)] सप्तमाष्टमयोश्चतुर्थ्योः प्राजापत्या गायत्री, [८ (२)] अष्टमस्य द्वितीयाया आसुर्युष्णिक्, [११, १४, १८ (४)] एकादशचतुर्दशाष्टादशानां चतुर्थीनां दैवी त्रिष्टुप्, [१८ (२)] अष्टादशस्य च द्वितीयाया एकपदा भुरिक् साम्नी बृहती छन्दांसि ॥

ततश्चैनमन्येन शीर्ष्णा प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् (१) ।
ज्येष्ठतस्ते प्रजा मरिष्यतीत्येनमाह (२) ।
तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् (३) ।
बृहस्पतिना शीर्ष्णा (४) । तेनैनं प्राशिषं तेनैनमजीगमम् (५) ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः (६) ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद (७) ॥१॥ -[३२]

ततः । च । एनम् । अन्येन । शीर्ष्णा । प्रऽआशीः । येन । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । ज्येष्ठतः । ते । प्रऽजा । मरिष्यति । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । बृहस्पतिना । शीर्ष्णा । तेन । एनम् । प्र । आशिषम् । तेन । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥ १ ॥

PARYĀYA - II

XI.3.32 If (ca) thou hast eaten it with another head than that (tatas) with which the ancient seers ate this, thy progeny, from the oldest down, will die: so one says to him; it verily I (have) not (eaten) coming hither (arvāñc), nor retiring, nor coming on; with Bṛhaspati (as) head, there-with have I eaten it, therewith have I made it go; this rice-dish, verily, is whole-limbed, whole-jointed, whole-bodied; whole-limbed, whole-jointed, whole-bodied becometh he who knoweth thus.

ततश्चैनमन्याभ्यां श्रोत्राभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन्(८)।
बधिरो भविष्यसीत्येनमाह। तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्(९)।
द्यावापृथिवीभ्यां श्रोत्राभ्याम्(१०)। ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम्।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद(११) ॥२॥ -[३३]

ततश्चैनमन्याभ्यामक्षीभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन्(१२)।
अन्धो भविष्यसीत्येनमाह। तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्(१३)।
सूर्याचन्द्रमसाभ्यामक्षीभ्याम्(१४)। ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम्।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद(१५) ॥३॥ -[३४]

ततः। च। एनम्। अन्याभ्याम्। श्रोत्राभ्याम्। प्रऽआशीः। याभ्याम्। च। एतम्। पूर्वे। ऋषयः। प्रऽआश्नन्। बधिरः। भविष्यसि। इति। एनम्। आह। तम्। वै। अहम्। न। अर्वाञ्चम्। न। पराञ्चम्। न। प्रत्यञ्चम्। द्यावापृथिवीभ्याम्। श्रोत्राभ्याम्। ताभ्याम्। एनम्। प्र। आशिषम्। ताभ्याम्। एनम्। अजीगमम्। एषः। वै। ओदनः। सर्वऽअङ्गः। सर्वऽपरुः। सर्वऽतनूः। सर्वऽअङ्गः। एव। सर्वऽपरुः। सर्वऽतनूः। सम्। भवति। यः। एवम्। वेद ॥ २ ॥

ततः। च। एनम्। अन्याभ्याम्। अक्षीभ्याम्। प्रऽआशीः। याभ्याम्। च। एतम्। पूर्वे। ऋषयः। प्रऽआश्नन्। अन्धः। भविष्यसि। इति। एनम्। आह। तम्। वै। अहम्। न। अर्वाञ्चम्। न। पराञ्चम्। न। प्रत्यञ्चम्। सूर्याचन्द्रमसाभ्याम्। अक्षीभ्याम्। ताभ्याम्। एनम्। प्र। आशिषम्। ताभ्याम्। एनम्। अजीगमम्। एषः। वै। ओदनः। सर्वऽअङ्गः। सर्वऽपरुः। सर्वऽतनूः। सर्वऽअङ्गः। एव। सर्वऽपरुः। सर्वऽतनूः। सम्। भवति। यः। एवम्। वेद ॥ ३ ॥

XI.3.33 If thou hast eaten it with other ears than those (tatas) with which the ancient seers ate this, thou wilt become deaf: thus one says to him; it verily (have) I not (eaten) coming hithter, nor retiring, nor coming on; with heaven and earth as ears, with them have I eaten it, with them have I made it go etc. etc.

XI.3.34 If thou hast eaten it with other eyes than those with which the ancient seers ate this, thou wilt become blind: thus one says to him: it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with sun and moon as eyes, with them have I eaten it, with them etc. etc.

ततश्चैनमन्येन मुखेन प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् (१६) ।
मुखतस्ते प्रजा मरिष्यतीत्येनमाह । तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् (१७) ।
ब्रह्मणा मुखेन (१८) । तेनैनं प्राशिषं तेनैनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद (१९)॥४॥ -[३५]

ततश्चैनमन्यया जिह्वया प्राशीर्यया चैतं पूर्व ऋषयः प्राश्नन् (२०) ।
जिह्वा ते मरिष्यतीत्येनमाह । तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् (२१) ।
अग्नेर्जिह्वया (२२) । तयैनं प्राशिषं तयैनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद (२३)॥५॥ -[३६]

ततः । च । एनम् । अन्येन । मुखेन । प्रऽआशीः । येन । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । मुखतः । ते । प्रऽजा । मरिष्यति । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । ब्रह्मणा । मुखेन । तेन । एनम् । प्र । आशिषम् । तेन । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥

ततः । च । एनम् । अन्यया । जिह्वया । प्रऽआशीः । यया । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । जिह्वा । ते । मरिष्यति । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । अग्नेः । जिह्वया । तया । एनम् । प्र । आशिषम् । तया । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥ ५ ॥

XI.3.35 If thou hast eaten it with another mouth than that with which the ancient seers ate this, thy progeny will die fro in front; thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with Brahman as mouth, there-with have I etc. etc.

XI.3.36 If thou hast eaten it with another tongue than that with which the ancient seers ate this, thy tongue will die: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with Agni's tongue, therewith have I etc. etc.

ततश्चैनमन्यैर्दन्तैः प्राशीर्येश्चैतं पूर्व ऋषयः प्राश्नन् (२४)।
दन्तास्ते शत्स्यन्तीत्येनमाह। तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् (२५)।
ऋतुभिर्दन्तैः (२६)। तैरेनं प्राशिषं तैरेनमजीगमम्।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद (२७)॥६॥ -[३७]

ततश्चैनमन्यैः प्राणापानैः प्राशीर्येश्चैतं पूर्व ऋषयः प्राश्नन् (२८)।
प्राणापानास्त्वा हास्यन्तीत्येनमाह। तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् (२९)।
सप्तर्षिभिः प्राणापानैः (३०)। तैरेनं प्राशिषं तैरेनमजीगमम्।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद (३१)॥७॥ -[३८]

ततः। च। एनम्। अन्यैः। दन्तैः। प्रऽआशीः। यैः। च। एतम्। पूर्व। ऋषयः। प्रऽआश्नन्। दन्ताः। ते। शत्स्यन्ति। इति। एनम्। आह। तम्। वै। अहम्। न। अर्वाञ्चम्। न। पराञ्चम्। न। प्रत्यञ्चम्। ऋतुऽभिः। दन्तैः। तैः। एनम्। प्र। आशिषम्। तैः। एनम्। अजीगमम्। एषः। वै। ओदनः। सर्वऽअङ्गः। सर्वऽपरुः। सर्वऽतनूः। सर्वऽअङ्गः। एव। सर्वऽपरुः। सर्वऽतनूः। सम्। भवति। यः। एवम्। वेद॥ ६॥

ततः। च। एनम्। अन्यैः। प्राणापानैः। प्रऽआशीः। यैः। च। एतम्। पूर्वे। ऋषयः। प्रऽआश्नन्। प्राणापानाः। त्वा। हास्यन्ति। इति। एनम्। आह। तम्। वै। अहम्। न। अर्वाञ्चम्। न। पराञ्चम्। न। प्रत्यञ्चम्। सप्तर्षिऽभिः। प्राणापानैः। तैः। एनम्। प्र। आशिषम्। तैः। एनम्। अजीगमम्। एषः। वै। ओदनः। सर्वऽअङ्गः। सर्वऽपरुः। सर्वऽतनूः। सर्वऽअङ्गः। एव। सर्वऽपरुः। सर्वऽतनूः। सम्। भवति। यः। एवम्। वेद॥ ७॥

XI.3.37 If thou hast eaten it with other teeth than that those with which the ancient seers ate this, thy teeth will fall out (śad): thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with the seasons as teeth, therewith have I etc. etc.

XI.3.38 If thou hast eaten it with other breaths and expirations than that those with which the ancient seers ate this, breaths and expirations will quit thee: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with the seven seers as breath, and expirations, therewith have I etc. etc.

ततश्चैनमन्येन व्यचसा प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् (३२) ।
राजयक्ष्मस्त्वा हनिष्यतीत्येनमाह । तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् (३३) ।
अन्तरिक्षेण व्यचसा (३४) । तेनैनं प्राशिषं तेनैनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद (३५)॥८॥ -[३९]

ततश्चैनमन्येन पृष्ठेन प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन् (३६) ।
विद्युत्त्वा हनिष्यतीत्येनमाह । तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् (३७) ।
दिवा पृष्ठेन । तेनैनं प्राशिषं तेनैनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद (३८) ॥९॥ -[४०]

ततः । च । एनम् । अन्येन । व्यचसा । प्रऽआशीः । येन । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । राजऽयक्ष्मः । त्वा । हनिष्यति । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । अन्तरिक्षेण । व्यचसा । तेन । एनम् । प्र । आशिषम् । तेन । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥ ८ ॥

ततः । च । एनम् । अन्येन । पृष्ठेन । प्रऽआशीः । येन । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । विऽद्युत् । त्वा । हनिष्यति । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । दिवा । पृष्ठेन । तेन । एनम् । प्र । आशिषम् । तेन । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥९॥

XI.3.39 If thou hast eaten it with another bulk (vyacas) than that with which the ancient seers ate this, the king-yakṣma will slay thee: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with atmosphere as bulk, therewith have I etc. etc.

XI.3.40 If thou hast eaten it with another back than that with which the ancient seers ate this, the lightning well slay thee; thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with the sky as back, therewith have I etc. etc.

ततश्चैनमन्येनोरसा प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन्(३९) ।
कृष्या न रात्स्यसीत्येनमाह । तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्(४०) ।
पृथिव्योरसा । तेनैनं प्राशिषं तेनैनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद(४१) ॥१०॥ -[-४१]

ततश्चैनमन्येनोदरेण प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन्(४२) ।
उदरदारस्त्वा हनिष्यतीत्येनमाह । तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्(४३) ।
सत्येनोदरेण । तेनैनं प्राशिषं तेनैनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद(४४) ॥११॥ -[४२]

ततः । च । एनम् । अन्येन । उरसा । प्रऽआशीः । येन । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । कृष्या । न । रात्स्यसि । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । पृथिव्या । उरसा । तेन । एनम् । प्र । आशिषम् । तेन । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥

ततः । च । एनम् । अन्येन । उदरेण । प्रऽआशीः । येन । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । उदरऽदारः । त्वा । हनिष्यति । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । सत्येन । उदरेण । तेन । एनम् । प्र । आशिषम् । तेन । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥११॥

XI.3.41 If thou hast eaten it with another breast than that with which the ancient seers ate this, thou will not prosper with plowing; thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with the earth as breast, therewith have I etc. etc.

XI.3.42 If thou hast eaten it with another belly than that with which the ancient seers ate this, the colic (? Udaradāra)will slay thee: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with truth as belly, therewith have I etc. etc.

ततश्चैनमन्येन वस्तिना प्राशीर्येन चैतं पूर्व ऋषयः प्राश्नन्(४५) ।
अप्सु मरिष्यसीत्येनमाह । तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्(४६) ।
समुद्रेण वस्तिना(४७) । तेनैनं प्राशिषं तेनैनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद(४८) ॥१२॥ -[४३]

ततश्चैनमन्याभ्यामूरुभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन्(४९) ।
ऊरू ते मरिष्यत इत्येनमाह । तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्(५०)।
मित्रावरुणयोरूरुभ्याम्(५१) । ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद(५२) ॥१३॥ -[४४]

ततः । च । एनम् । अन्येन । वस्तिना । प्रऽआशीः । येन । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । अप्ऽसु । मरिष्यसि । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । समुद्रेण । वस्तिना । तेन । एनम् । प्र । आशिषम् । तेन । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥

ततः । च । एनम् । अन्याभ्याम् । ऊरुऽभ्याम् । प्रऽआशीः । याभ्याम् । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । ऊरू इति । ते । मरिष्यतः । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । मित्रावरुणयोः । ऊरुऽभ्याम् । ताभ्याम् । एनम् । प्र । आशिषम् । ताभ्याम् । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥ १३ ॥

XI.3.43 If thou hast eaten it with another bladder than that with which the ancient seers ate this, thou wilt die in the waters: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with the ocean as bladder, therewith have I etc. etc.

XI.3.44 If thou hast eaten it with other thighs than those with which the ancient seers ate this, thy thighs will die: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with the thighs of Mitra and Varuna, therewith have I etc. etc.

ततश्चैनमन्याभ्यामष्ठीवद्भ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन् (५३) ।
स्रामो भविष्यसीत्येनमाह । तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् (५४) ।
त्वष्टुरष्ठीवद्भ्याम् । ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद (५५) ॥१४॥ -[४५]

ततश्चैनमन्याभ्यां पादाभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन् (५६) ।
बहुचारी भविष्यसीत्येनमाह । तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् (५७) ।
अश्विनोः पादाभ्याम् । ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम् ।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद (५८) ॥१५॥ -[४६]

ततः । च । एनम् । अन्याभ्याम् । अष्ठीवत्ऽभ्याम् । प्रऽआशीः । याभ्याम् । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । स्रामः । भविष्यसि । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । त्वष्टुः । अष्ठीवत्ऽभ्याम् । ताभ्याम् । एनम् । प्र । आशिषम् । ताभ्याम् । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥ १४ ॥

ततः । च । एनम् । अन्याभ्याम् । पादाभ्याम् । प्रऽआशीः । याभ्याम् । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । बहुऽचारी । भविष्यसि । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । अश्विनोः । पादाभ्याम् । ताभ्याम् । एनम् । प्र । आशिषम् । ताभ्याम् । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥ १५ ॥

XI.3.45 If thou hast eaten it with other knees (aṣṭhīvant) than those with which the ancient seers ate this, thou wilt become lame: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with the tvaṣṭṛśnees, therewith have I etc. etc.

XI.3.46 If thou hast eaten it with other feet than those with which the ancient seers ate this, thou wilt be much-wandering: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with the feet of the two Aśvins, therewith have I etc. etc.

ततश्चैनमन्याभ्यां प्रपदाभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन्(५९)।
सर्पस्त्वा हनिष्यतीत्येनमाह। तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्(६०)।
सवितुः प्रपदाभ्याम्। ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम्।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद(६१) ॥१६॥ -[४७]

ततश्चैनमन्याभ्यां हस्ताभ्यां प्राशीर्याभ्यां चैतं पूर्व ऋषयः प्राश्नन्(६२)।
ब्राह्मणं हनिष्यसीत्येनमाह। तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्(६३)।
ऋतस्य हस्ताभ्याम्(६४)। ताभ्यामेनं प्राशिषं ताभ्यामेनमजीगमम्।
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद(६५) ॥१७॥ -[४८]

ततः। च। एनम्। अन्याभ्याम्। प्रऽपदाभ्याम। प्रऽआशीः। याभ्याम्। च। एतम्। पूर्वे। ऋषयः। प्रऽआश्नन्। सर्पः। त्वा। हनिष्यति। इति। एनम्। आह। तम्। वै। अहम्। न। अर्वाञ्चम्। न। पराञ्चम। न। प्रत्यञ्चम्। सवितुः। प्रऽपदाभ्याम्। ताभ्याम्। एनम्। प्र। आशिषम्। ताभ्याम्। एनम्। अजीगमम्। एषः। वै। ओदनः। सर्वऽअङ्गः। सर्वऽपरुः। सर्वऽतनूः। सर्वऽअङ्गः। एव। सर्वऽपरुः। सर्वऽतनूः। सम्। भवति। यः। एवम। वेद ॥ १६ ॥

ततः। च। एनम्। अन्याभ्याम्। हस्ताभ्याम्। प्रऽआशीः। याभ्याम्। च। एतम्। पूर्वे। ऋषयः। प्रऽआश्नन्। ब्राह्मणम्। हनिष्यसि। इति। एनम्। आह। तम्। वै। अहम्। न। अर्वाञ्चम्। न। पराञ्चम्। न। प्रत्यञ्चम्। ऋतस्य। हस्ताभ्याम्। ताभ्याम्। एनम्। प्र। आशिषम्। ताभ्याम्। एनम्। अजीगमम्। एषः। वै। ओदनः। सर्वऽअङ्गः। सर्वऽपरुः। सर्वऽतनूः। सर्वऽअङ्गः। एव। सर्वपरुः। सर्वऽतनूः। सम्। भवति। यः। एवम्। वेद ॥ १७ ॥

XI.3.47 If thou hast eaten it with other front-feet than those with which the ancient seers ate this, a serpent will slay thee: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with Savitar's front-feet, therewith have I etc. etc.

XI.3.48 If thou hast eaten it with other hands than those with which the ancient seers ate this, thou wilt slay a Brahman: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; with the hands of righteousness (ṛta), therewith have I etc. etc.

तर्तश्चैनमन्यया प्रतिष्ठया प्राशीर्यया चैतं पूर्व ऋषयः प्राश्नन् (६६) ।
अप्रतिष्ठानोऽनायतनो मरिष्यसीत्येनमाह (६७) ।
तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम् (६८) । सत्ये प्रतिष्ठाय (६९) ।
तयैनं प्राशिषं तयैनमजीगमम् (७०) । एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः (७१) ।
सर्वाङ्ग एव सर्वपरुः सर्वतनूः सं भवति य एवं वेद (७२) ॥१८॥
-[४९]

ततः । च । एनम् । अन्यया । प्रतिऽस्थया । प्रऽआशीः । यया । च । एतम् । पूर्वे । ऋषयः । प्रऽआश्नन् । अप्रतिऽस्थानः । अनायतनः । मरिष्यसि । इति । एनम् । आह । तम् । वै । अहम् । न । अर्वाञ्चम् । न । पराञ्चम् । न । प्रत्यञ्चम् । सत्ये । प्रतिऽस्थाय । तया । एनम् । प्र । आशिषम् । तया । एनम् । अजीगमम् । एषः । वै । ओदनः । सर्वऽअङ्गः । सर्वऽपरुः । सर्वऽतनूः । सर्वऽअङ्गः । एव । सर्वऽपरुः । सर्वऽतनूः । सम् । भवति । यः । एवम् । वेद ॥ १८ ॥

[३] तृतीयः पर्यायः

(१–७) सप्तर्चस्यास्य पर्यायस्याथर्वा ऋषिः । मन्त्रोक्ता देवताः । (१) प्रथमर्च आसुर्यनुष्टुप्, (२) द्वितीयाया आर्च्युष्णिक्, (३) तृतीयायास्त्रिपदा भुरिक्साम्नी त्रिष्टुप्, (४) चतुर्थ्या आसुरी बृहती, (५) पञ्चम्या द्विपदा भुरिक्साम्नी बृहती, (६) षष्ठ्याः साम्न्युष्णिक्, (७) सप्तम्याश्च प्राजापत्या बृहती छन्दांसि ॥

एतद्वै ब्रध्नस्य विष्टपं यदोदनः ॥१॥ -[५०]
ब्रध्नलोको भवति ब्रध्नस्य विष्टपि श्रयते य एवं वेद ॥२॥ -[५१]
एतस्माद्वा ओदनात्त्रयस्त्रिंशतं लोकान्निरमिमीत प्रजापतिः ॥३॥ -[५२]
तेषां प्रज्ञानाय यज्ञमसृजत ॥४॥ -[५३]
स य एवं विदुष उपद्रष्टा भवति प्राणं रुणद्धि ॥५॥ -[५४]

एतत् । वै । ब्रध्नस्य । विष्टपम् । यत् । ओदनः ॥ १ ॥

ब्रध्नऽलोकः । भवति । ब्रध्नस्य । विष्टपि । श्रयते । यः । एवम् । वेद ॥ २ ॥

एतस्मात् । वै । ओदनात् । त्रयःऽत्रिंशतम् । लोकान् । निः । अमिमीत । प्रजाऽपतिः ॥

तेषाम् । प्रऽज्ञानाय । यज्ञम् । असृजत ॥ ४ ॥

सः । यः । एवम् । विदुषः । उपऽद्रष्टा । भवति । प्राणम् । रुणद्धि ॥ ५ ॥

XI.3.49 If thou hast eaten it with another firm standing (pratiṣṭha) than that with which the ancient seers ate this, without firm standing, without support (āyatana) wilt thou die: thus one says to him; it verily (have) I not (eaten) coming hither, nor retiring, nor coming on; standing firm in truth, therewith have I etc. etc.

PARYĀYA - III

XI.3.50 This -- namely, the rice-dish -- is indeed the summit (viṣṭapa) of the ruddy one (bradhana).

XI.3.51 He cometh to have the ruddy one for his world, he resorteth (śri) to the summit of the ruddy one, who knoweth thus.

XI.3.52 Out of this rice-dish Prajāpati verily fashioned thiry-three worlds.

XI.3.53 In order to the kṇowledge (prajñāna) of them he created the sacrifice.

XI.3.54 He who becomes the on-looker (upadraṣṭṛ) of one knowing thus stops (his own) breath.

न च प्राणं रुणद्धि सर्वज्यानिं जीयते ॥६॥ -[५५]
न च सर्वज्यानिं जीयते पुरैनं जरसः प्राणो जहाति ॥७॥ -[५६]

न । च । प्राणम् । रुणद्धि । सर्वऽज्यानिम् । जीयते ॥ ६ ॥

न । च । सर्वऽज्यानिम् । जीयते । पुरा । एनम् । जरसः । प्राणः । जहाति ॥ ७ ॥

(४) चतुर्थ सूक्तम्

(१-२६) षड्विंशत्यृचस्यास्य सूक्तस्य वैदर्भिर्भार्गव ऋषिः । प्राणो देवता । (१) प्रथमर्चः शङ्कुमत्यनुष्टुप्, (२-७, ९-१३, १६-१९, २३-२५) द्वितीयादिषण्णां नवम्यादिपञ्चानां षोडश्यादिचतसृणां त्रयोविंश्यादितृचस्य चानुष्टुप्, (८) अष्टम्याः पथ्यापङ्क्तिः, (१४) चतुर्दश्या निचृदनुष्टुप्, (१५) पञ्चदश्या भुरिगनुष्टुप्, (२०) विंश्या अनुष्टुब्गर्भा त्रिष्टुप्, (२१) एकविंश्या मध्येज्योतिर्जगती, (२२) द्वाविंश्यास्त्रिष्टुप्, (२६) षड्विंश्याश्च बृहतीगर्भानुष्टुप् छन्दांसि ॥

प्राणाय नमो यस्य सर्वमिदं वशे ।
यो भूतः सर्वस्येश्वरो यस्मिन्त्सर्वं प्रतिष्ठितम् ॥१॥
नमस्ते प्राण क्रन्दाय नमस्ते स्तनयित्नवे ।
नमस्ते प्राण विद्युते नमस्ते प्राण वर्षते ॥२॥
यत्प्राण स्तनयित्नुनाभिक्रन्दत्योषधीः ।
प्र वीयन्ते गर्भान्दधतेथो बह्वीर्वि जायन्ते ॥३॥
यत्प्राण ऋतावागतेभिक्रन्दत्योषधीः ।
सर्वं तदा प्र मोदते यत्किं च भूम्यामधि ॥४॥

प्राणाय । नमः । यस्य । सर्वम् । इदम् । वशे ।
यः । भूतः । सर्वस्य । ईश्वरः । यस्मिन् । सर्वम् । प्रतिऽस्थितम् ॥ १ ॥
नमः । ते । प्राण । क्रन्दाय । नमः । ते । स्तनयित्नवे ।
नमः । ते । प्राण । विऽद्युते । नमः । ते । प्राण । वर्षते ॥ २ ॥
यत् । प्राणः । स्तनयित्नुना । अभिऽक्रन्दति । ओषधीः ।
प्र । वीयन्ते । गर्भान् । दधते । अथो इति । बह्वीः । वि । जायन्ते ॥ ३ ॥
यत् । प्राणः । ऋतौ । आऽगते । अभिऽक्रन्दति । ओषधीः ।
सर्वम् । तदा । प्र । मोदते । यत् । किम् । च । भूम्याम् । अधि ॥ ४ ॥

XI.3.55 If he does not stop (his own) breath, he is scathed a complete scathing.

XI.3.56 If he is not scathed a complete scathing, before old age breath quits him.

Extolling the breath (prāṇa)

XI.4.1 Homage to breath (prāṇa) in whose control is this All, who hath been lord of all, in whom all stands firm.

XI.4.2 Homage, O breath, to thy roaring, homage to thy thunder; homage, O breath, to thy lightning, homage to thee raining, O breath.

XI.4.3 When breath with thunder roars at the herbs, they are impregnated (pra-vī), they receive embryos, then they are born many.

XI.4.4 When, the season having come, breath roars at the herbs, then all is delighted, whatever is upon the earth.

यदा प्राणो अभ्यवर्षीद्वर्षेण पृथिवीं महीम् ।
पशवस्तत्प्र मोदन्ते महो वै नो भविष्यति ॥५॥
अभिवृष्टा ओषधयः प्राणेन समवादिरन् ।
आयुर्वै नः प्रातीतरः सर्वा नः सुरभीरकः ॥६॥
नमस्ते अस्त्वायते नमो अस्तु परायते ।
नमस्ते प्राण तिष्ठत आसीनायोत ते नमः ॥७॥
नमस्ते प्राण प्राणते नमो अस्त्वपानते ।
पराचीनाय ते नमः प्रतीचीनाय ते नमः सर्वस्मै त इदं नमः ॥८॥
या ते प्राण प्रिया तनूर्यो ते प्राण प्रेयसी ।
अथो यद्भेषजं तव तस्य नो धेहि जीवसे ॥९॥
प्राणः प्रजा अनु वस्ते पिता पुत्रमिव प्रियम् ।
प्राणो ह सर्वस्येश्वरो यच्च प्राणति यच्च न ॥१०॥

यदा । प्राणः । अभिऽअवर्षीत् । वर्षेण । पृथिवीम् । महीम् ।
पशवः । तत् । प्र । मोदन्ते । महः । वै । नः । भविष्यति ॥ ५ ॥
अभिऽवृष्टाः । ओषधयः । प्राणेन । सम् । अवादिरन् ।
आयुः । वै । नः । प्र । अतीतरः । सर्वाः । नः । सुरभीः । अकः ॥ ६ ॥
नमः । ते । अस्तु । आऽयते । नमः । अस्तु । पराऽयते ।
नमः । ते । प्राण । तिष्ठते । आसीनाय । उत । ते । नमः ॥ ७ ॥
नमः । ते । प्राण । प्राणते । नमः । अस्तु । अपानते । पराचीनाय ।
ते । नमः । प्रतीचीनाय । ते । नमः । सर्वस्मै । ते । इदम् । नमः ॥ ८ ॥
या । ते । प्राण । प्रिया । तनूः । यो इति । ते । प्राण । प्रेयसी ।
अथो इति । यत् । भेषजम् । तव । तस्य । नः । धेहि । जीवसे ॥ ९ ॥
प्राणः । प्रऽजाः । अनु । वस्ते । पिता । पुत्रम्ऽइव । प्रियम् ।
प्राणः । ह । सर्वस्य । ईश्वरः । यत् । च । प्राणति । यत् । च । न ॥ १० ॥

XI.4.5 When breath hath rained with rain upon the great earth, then the cattle are delighted : "Verily there will be greatness for us."

XI.4.6 The herbs, being rained on, have talked with breath; "Verily thou hast extended our life-time; thou hast made us all fragrant."

XI.4.7 Homage be to thee coming, homage be to (thee) going away; homage to thee, O breath, standing; to thee sitting also (be) homage.

XI.4.8 Homage to thee breathing, O breath; homage be to (thee) making expiration; homage to thee turned away, homage to thee turned toward (us); to the whole of thee (be) this homage.

XI.4.9 The dear body that is thine, O breath, and the dearer one that is thine, O breath, likewise what remedy is thine, assign thou of it to us in order to live (jīvas).

XI.4.10 Breath clothes (anu-vas) human beings (prajā), as a father a dear son; breath is lord of all, both what breathes and what does not.

प्राणो मृत्युः प्राणस्तक्मा प्राणं देवा उपासते ।
प्राणो ह सत्यवादिनमुत्तमे लोक आ दधत् ॥११॥
प्राणो विराट् प्राणो देष्ट्री प्राणं सर्व उपासते ।
प्राणो ह सूर्यश्चन्द्रमाः प्राणमाहुः प्रजापतिम् ॥१२॥
प्राणापानौ व्रीहियवावनड्वान्प्राण उच्यते ।
यवे ह प्राण आहितोपानो व्रीहिरुच्यते ॥१३॥
अपानति प्राणति पुरुषो गर्भे अन्तरा ।
यदा त्वं प्राण जिन्वस्यथ स जायते पुनः ॥१४॥
प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते ।
प्राणे ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम् ॥१५॥
आथर्वणीराङ्गिरसीर्दैवीर्मनुष्यजा उत ।
ओषधयः प्र जायन्ते यदा त्वं प्राण जिन्वसि ॥१६॥

प्राणः । मृत्युः । प्राणः । तक्मा । प्राणम् । देवाः । उप । आसते ।
प्राणः । ह । सत्यऽवादिनम् । उत्ऽतमे । लोके । आ । दधत् ॥ ११ ॥
प्राणः । विऽराट् । प्राणः । देष्ट्री । प्राणम् । सर्वे । उप । आसते ।
प्राणः । ह । सूर्यः । चन्द्रमाः । प्राणम् । आहुः । प्रजाऽपतिम् ॥ १२ ॥
प्राणापानौ । व्रीहिऽयवौ । अनड्वान् । प्राणः । उच्यते ।
यवे । ह । प्राणः । आऽहितः । अपानः । व्रीहिः । उच्यते ॥ १३ ॥
अप । अनति । प्र । अनति । पुरुषः । गर्भे । अन्तरा ।
यदा । त्वम् । प्राण । जिन्वसि । अथ । सः । जायते । पुनः ॥ १४ ॥
प्राणम् । आहुः । मातरिश्वानम् । वातः । ह । प्राणः । उच्यते ।
प्राणे । ह । भूतम् । भव्यम् । च । प्राणे । सर्वम् । प्रतिऽस्थितम् ॥ १५ ॥
आथर्वणीः । आङ्गिरसीः । दैवीः । मनुष्यऽजाः । उत ।
ओषधयः । प्र । जायन्ते । यदा । त्वम् । प्राण । जिन्वसि ॥ १६ ॥

XI.4.11 Breath (is) death, breath takmān; breath the gods worship (upa-ās); breath may set the truth-speaker in the 'highest world.

XI.4.12 Breath is virāj, breath the directress; breath all worship; breath is the sun, the moon; breath they call Prajāpatī.

XI.4.13 Breath and expiration are rice and barley; breath is called the draft-ox; breath is set in barley; expiration is called rice.

XI.4.14 A man breathes out (apānati), breathes (prāṇati) within the womb; when O breath, thou quickenest, then he is born again.

XI.4.15 Breath they call Mātariśvan; breath is called the wind; in breath what has been and what will be, in breath is all established (pratiṣṭhita).

XI.4.16 They of the Atharvans, they of the Añgirases, they of the gods, also those born of men– the herbs are generated (prajā), when thou, O breath, quickenest.

यदा प्राणो अभ्यवर्षीद्वर्षेण पृथिवीं महीम्।
ओषधयः प्र जायन्तेथो याः काश्च वीरुधः ॥१७॥
यस्ते प्राणेदं वेद यस्मिंश्चासि प्रतिष्ठितः।
सर्वे तस्मै बलिं हरानमुष्मिंल्लोक उत्तमे ॥१८॥
यथा प्राण बलिहृतस्तुभ्यं सर्वाः प्रजा इमाः।
एवा तस्मै बलिं हरान्यस्त्वा शृणवत्सुश्रवः ॥१९॥
अन्तर्गर्भश्चरति देवतास्वाभूतो भूतः स उ जायते पुनः।
स भूतो भव्यं भविष्यत्पिता पुत्रं प्र विवेशा शचीभिः ॥२०॥
एकं पादं नोत्खिदति सलिलाद्धंस उच्चरन्।
यदङ्ग स तमुत्खिदेन्नैवाद्य न श्वः स्यान्न रात्री नाहः स्यान्न व्युच्छेत्कदा चन ॥२१॥
अष्टाचक्रं वर्तत एकनेमि सहस्राक्षरं प्र पुरो नि पश्चा।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः ॥२२॥

यदा । प्राणः । अभिऽअवर्षीत् । वर्षेण । पृथिवीम् । महीम् ।
ओषधयः । प्र । जायन्ते । अथो । इति । याः । काः । च । वीरुधः ॥ १७ ॥
यः । ते । प्राण । इदम् । वेद । यस्मिन् । च । असि । प्रतिऽस्थितः ।
सर्वे । तस्मै । बलिम । हरान् । अमुष्मिन् । लोके । उत्ऽतमे ॥ १८ ॥
यथा । प्राण । बलिऽहृतः । तुभ्यम् । सर्वाः । प्रऽजाः । इमाः ।
एव । तस्मै । बलिम् । हरान् । यः । त्वा । शृणवत् । सुऽश्रवः ॥ १९ ॥
अन्तः । गर्भः । चरति । देवतासु । आऽभूतः । भूतः । सः । ऊं इति । जायते । पुनः ।
सः । भूतः । भव्यम् । भविष्यत् । पिता । पुत्रम् । प्र । विवेश । शचीभिः ॥ २० ॥
एकम् । पादम् । न । उत् । खिदति । सलिलात् । हंसः । उत्ऽचरन् । यत् । अङ्ग । सः ।
तम् । उत्ऽखिदेत् । न । एव । अद्य । न । श्वः । स्यात् । न । रात्री । न । अहः । स्यात् ।
न । वि । उच्छेत् । कदा । चन ॥ २१ ॥
अष्टाऽचक्रम् । वर्तते । एकऽनेमि । सहस्रऽअक्षरम् । प्र । पुरः । नि । पश्चा ।
अर्धेन । विश्वम् । भुवनम् । जजान । यत् । अस्य । अर्धम् । कतमः । सः । केतुः ॥२२॥

XI.4.17 When breath hath rained with rain on the great earth, the herbs are generated, likewise whatever plants (there are).

XI.4.18 He who knoweth this of thee, O breath, and in whom thou art established -- to him shall all bring tribute in yon highest world.

XI.4.19 As, O breath, all these human beings (prajā) are tribute-bearers to thee, so shall they bring tribute to him who shall hear thee, O thou of good report (suśravas).

XI.4.20 He moves, an embryo, within the divinities; having come into being (? abhūta), having been (bhūta), he is born again; he, having been, entered with might (śacībhis) what is to be, what will be, (as) a father a son.

XI.4.21 The swan (haṅsa), ascending, does not extract (ut-khid) one foot from the sea; verily, if he should extract that, there would not be today nor tomorrow; there would not be night nor day; at no time soever would it dawn (vi-vas).

XI.4.22 The eight-wheeled (thing,neut.) rolls, having one rim, thousand-syllabled, forth in front, down behind; with a half it has generated all existence; what its (other) half (is) – which sign is that?

योऽस्य विश्वजन्मन ईशे विश्वस्य चेष्टतः ।
अन्येषु क्षिप्रधन्वने तस्मै प्राण नमोऽस्तु ते ॥२३॥
यो अस्य सर्वजन्मन ईशे सर्वस्य चेष्टतः ।
अतन्द्रो ब्रह्मणा धीरः प्राणो मानु तिष्ठतु ॥२४॥
ऊर्ध्वः सुप्तेषु जागार ननु तिर्यङ्नि पद्यते ।
न सुप्तमस्य सुप्तेष्वनु शुश्राव कश्चन ॥२५॥
प्राण मा मत्पर्यावृतो न मदन्यो भविष्यसि ।
अपां गर्भमिव जीवसे प्राण बध्नामि त्वा मयि ॥२६॥

यः । अस्य । विश्वऽजन्मनः । ईशे । विश्वस्य । चेष्टतः ।
अन्येषु । क्षिप्रऽधन्वने । तस्मै । प्राण । नमः । अस्तु । ते ॥ २३ ॥
यः । अस्य । सर्वऽजन्मनः । ईशे । सर्वस्य । चेष्टतः ।
अतन्द्रः । ब्रह्मणा । धीरः । प्राणः । मा । अनु । तिष्ठतु ॥ २४ ॥
ऊर्ध्वः । सुप्तेषु । जागार । ननु । तिर्यङ् । नि । पद्यते ।
न । सुप्तम् । अस्य । सुप्तेषु । अनु । शुश्राव । कः । चन ॥ २५ ॥
प्राण । मा । मत् । परिऽआवृतः । न । मत् । अन्यः । भविष्यसि ।
अपाम् । गर्भम्ऽइव । जीवसे । प्राण । बध्नामि । त्वा । मयि ॥ २६ ॥

(५) पञ्चमं सूक्तम्

(१–२६) षड्विंशत्यृचस्यास्य सूक्तस्य ब्रह्मा ऋषिः । ब्रह्मचारी देवता । (१) प्रथमर्चः पुरोतिजागतविराड्गर्भा त्रिष्टुप्, (२) द्वितीयायाः पञ्चपदा बृहतीगर्भा विराट् शक्वरी, (३) तृतीयाया उरोबृहती, (४–५, २४) चतुर्थीपञ्चम्यो-श्चतुर्विंश्याश्च त्रिष्टुप्, (६) षष्ठ्याः शाक्वरगर्भा चतुष्पदा जगती, (७) सप्तम्या विराड्गर्भा त्रिष्टुप्, (८) अष्टम्याः पुरोतिजागता विराड्जगती, (९) नवम्या बृहतीगर्भा त्रिष्टुप्, (१०) दशम्या भुरि-क्त्रिष्टुप्, (११, १३) एकादशीत्रयोदश्योर्जगती, (१२) द्वादश्याः शाक्वरगर्भा चतुष्पदा विराडतिजगती, (१४, १६–२२) चतुर्दश्याः षोडश्यादिसप्तानाञ्चानुष्टुप्, (१५) पञ्चदश्याः पुरस्ताज्ज्योतिस्त्रिष्टुप्, (२३) त्रयोविंश्याः पुरोबार्हतातिजागत-गर्भा त्रिष्टुप्, (२५) पञ्चविंश्या एकावसानार्च्युष्णिक्, (२६) षड्विंश्याश्च मध्येज्योतिरुष्णिग्गर्भा त्रिष्टुप् छन्दांसि ॥

ब्रह्मचारीष्णंश्चरति रोदसी उभे तस्मिन्देवाः संमनसो भवन्ति ।
स दाधार पृथिवीं दिवं च स आचार्यं तपसा पिपर्ति ॥१॥

ब्रह्मचारी । इष्णन् । चरति । रोदसी इति । उभे इति । तस्मिन् । देवाः । सम्ऽमनसः ।
भवन्ति । सः । दाधार । पृथिवीम् । दिवम् । च । सः । आऽचार्यम् । तपसा । पिपर्ति ॥ १ ॥

XI.4.23 He who is lord of this that has every (viśva) (kind of) birth, of every stirring thing -- to thee being such, O breath; having a quick bow among the unexausted (? anya), be homage.

XI.4.24 He who is lord of this that has all (sarva) (kinds of) birth, of all that stirs, unwearied, wise by brāhman -- let breath go after (anu-sthā) me.

XI.4.25 Upright among the sleeping he wakes; by no means (nanu) does he fall down horizontal (tiryan); no one soever has heard of his sleeping among the sleeping.

XI.4.26 O breath, turn not about from me; not another than I shalt thou be; like the embryo of the waters, in order to life (jīvas), I bind thee to me, O breath.

Extolling the Vedic student (brahmacārin)

(Brahmacārī = A theist, A lover of the Vedic lore; a lover of the Veda; a scholar)

XI.5.1 The vedic student goes on setting in motion (in) both firmaments; in him the gods become like-minded; he maintains earth and heaven; he fills his teacher with fervor (tapas).

ब्रह्मचारिणं पितरो देवजनाः पृथग्देवा अनुसंयन्ति सर्वे ।
गन्धर्वा एनमन्वायन्त्रयस्त्रिंशत्त्रिशताः षट्सहस्राः
सर्वान्त्स देवांस्तपसा पिपर्ति ॥२॥
आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ॥३॥
इयं समित्पृथिवी द्यौर्द्वितीयोतान्तरिक्षं समिधा पृणाति ।
ब्रह्मचारी समिधा मेखलया श्रमेण लोकांस्तपसा पिपर्ति ॥४॥
पूर्वो जातो ब्रह्मणो ब्रह्मचारी घर्मं वसानस्तपसोदतिष्ठत् ।
तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम् ॥५॥
ब्रह्मचार्येति समिधा समिद्धः कार्ष्णं वसानो दीक्षितो दीर्घश्मश्रुः ।
स सद्य एति पूर्वस्मादुत्तरं समुद्रं लोकान्त्संगृभ्य मुहुराचरिक्रत् ॥६॥
ब्रह्मचारी जनयन्ब्रह्मापो लोकं प्रजापतिं परमेष्ठिनं विराजम् ।
गर्भो भूत्वामृतस्य योनाविन्द्रो ह भूत्वासुरांस्ततर्ह ॥७॥

ब्रह्मऽचारिणम् । पितरः । देवऽजनाः । पृथक् । देवाः । अनुऽसंयन्ति । सर्वे । गन्धर्वाः । एनम् । अनु । आयन् । त्रयःऽत्रिंशत् । त्रिऽशताः । षट्ऽसहस्राः । सर्वान् । सः । देवान् । तपसा । पिपर्ति ॥ २ ॥
आऽचार्यः । उपऽनयमानः । ब्रह्मऽचारिणम् । कृणुते । गर्भम् । अन्तः ।
तम् । रात्रीः ।तिस्रः । उदरे । बिभर्ति । तम् । जातम् । द्रष्टुम् । अभिऽसंयन्ति । देवाः ॥ ३ ॥
इयम् । सम्ऽइत् । पृथिवी । द्यौः । द्वितीया । उत । अन्तरिक्षम् । सम्ऽइधा । पृणाति ।
ब्रह्मऽचारी । सम्ऽइधा । मेखलया । श्रमेण । लोकान् । तपसा । पिपर्ति ॥ ४ ॥
पूर्वः । जातः । ब्रह्मणः । ब्रह्मऽचारी । घर्मम् । वसानः । तपसा । उत् । अतिष्ठत् ।
तस्मात् । जातम् । ब्राह्मणम् । ब्रह्म । ज्येष्ठम् । देवाः । च । सर्वे । अमृतेन । साकम् ॥
ब्रह्मऽचारी । एति । सम्ऽइधा । सम्ऽइद्धः । कार्ष्णम् । वसानः । दीक्षितः । दीर्घऽश्मश्रुः ।
सः । सद्यः । एति । पूर्वस्मात् । उत्तरम् । समुद्रम् । लोकान् । सम्ऽगृभ्य । मुहुः ।
आऽचरिक्रत् ॥ ६ ॥
ब्रह्मऽचारी । जनयन् । ब्रह्म । अपः । लोकम् । प्रजाऽपतिम् । परमेऽस्थिनम् । विऽराजम् ।
गर्भः । भूत्वा । अमृतस्य । योनौ । इन्द्रः । ह । भूत्वा । असुरान् । ततर्ह ॥ ७ ॥

XI.5.2 The fathers, the god-folk, all the gods individually assemble after the Vedic student; the Gandharvas went after him, thirty-three, three hundred, six thousand; he fills all the gods with fervor.

XI.5.3 The teacher, taking (him) in charge (upa-nī) makes the Vedic student an embryo within; he bears him in his belly three nights; the gods gather unto him to see him when born.

XI.5.4 This piece of fuel (is) earth, sky the second; student fills the worlds with fuel, girdle, toil, fervor.

XI.5.5 Prior born of the brahman, the Vedic student, clothing himself with heat (gharma), stood up with fervor; from him (was) born the brāhmaṇa, the chief brahman, and all the gods together with immortality (amṛta).

XI.5.6 The Vedic student goes kindled with fuel, clothing himself in the black-antelope-skin, consecrated, long-bearded; he goes at once from the eastern to the northern ocean, having grasped the worlds, again and again violently shaping (? ācarikṛ) (them).

XI.5.7 The Vedic student, generating the brahman, the waters, the world, Prajāpati, the most exalted one, the viraj, having become an embryo in the womb of immorality; having become Indra, he has shattered (tṛh) the Asuras.

आचार्यस्ततक्ष नभसी उभे इमे उर्वी गम्भीरे पृथिवीं दिवं च ।
ते रक्षति तपसा ब्रह्मचारी तस्मिन्देवाः संमनसो भवन्ति ॥८॥
इमां भूमिं पृथिवीं ब्रह्मचारी भिक्षामा जभार प्रथमो दिवं च ।
ते कृत्वा समिधावुपास्ते तयोरार्पिता भुवनानि विश्वा ॥९॥
अर्वागन्यः परो अन्यो दिवस्पृष्ठाद्गुहा निधी निहितौ ब्राह्मणस्य ।
तौ रक्षति तपसा ब्रह्मचारी तत्केवलं कृणुते ब्रह्म विद्वान् ॥१०॥
अर्वागन्य इतो अन्यः पृथिव्या अग्नी समेतो नभसी अन्तरेमे ।
तयोः श्रयन्ते रश्मयोधि दृढास्ताना तिष्ठति तपसा ब्रह्मचारी ॥११॥
अभिक्रन्दन्स्तनयन्नरुणः शितिङ्गो बृहच्छेपोनु भूमौ जभार ।
ब्रह्मचारी सिञ्चति सानौ रेतः पृथिव्यां तेन जीवन्ति प्रदिशश्चतस्रः ॥१२॥
अग्नौ सूर्ये चन्द्रमसि मातरिश्वन्ब्रह्मचार्य१प्सु समिधमा दधाति ।
तासामर्चींषि पृथगभ्रे चरन्ति तासामाज्यं पुरुषो वर्षमापः ॥१३॥

आऽचार्यः । ततक्ष । नभसी इति । उभे इति । इमे इति । उर्वी इति । गम्भीरे इति । पृथिवीम् ।
दिवम् । च । ते इति । रक्षति । तपसा । ब्रह्मऽचारी । तस्मिन् । देवाः । सम्ऽमनसः । भवन्ति ॥

इमाम् । भूमिम् । पृथिवीम् । ब्रह्मऽचारी । भिक्षाम् । आ । जभार । प्रथमः । दिवम् । च ।
ते इति । कृत्वा । सम्ऽइधौ । उप । आस्ते । तयोः । आर्पिता । भुवनानि । विश्वा ॥ ९ ॥

अर्वाक् । अन्यः । परः । अन्यः । दिवः । पृष्ठात् । गुहा । निधी इति निऽधी । निऽहितौ ।
ब्राह्मणस्य । तौ । रक्षति । तपसा । ब्रह्मऽचारी । तत् । केवलम् । कृणुते । ब्रह्म । विद्वान् ॥१०॥

अर्वाक् । अन्यः । इतः । अन्यः । पृथिव्याः । अग्नी इति । सम्ऽएतः । नभसी इति । अन्तरा । इमे
इति । तयोः । श्रयन्ते । रश्मयः । अधि । दृढाः । तान् । आ । तिष्ठति । तपसा । ब्रह्मऽचारी ॥११॥

अभिऽक्रन्दन् । स्तनयन् । अरुणः । शितिङ्गः । बृहत् । शेपः । अनु । भूमौ । जभार ।
ब्रह्मऽचारी । सिञ्चति । सानौ । रेतः । पृथिव्याम् । तेन । जीवन्ति । प्रऽदिशः । चतस्रः ॥

अग्नौ । सूर्ये । चन्द्रमसि । मातरिश्वन् । ब्रह्मऽचारी । अप्ऽसु । सम्ऽइधम् । आ । दधाति ।
तासाम् । अर्चींषि । पृथक् । अभ्रे । चरन्ति । तासाम् । आज्यम् । पुरुषः । वर्षम् । आपः ॥

XI.5.8 The teacher fabricated both these envelops (nabhas), the wide, profound, (namely) earth and sky; them the Vedic student defends by fervor; in him the gods become like-minded.

XI.5.9 This broad (pṛthivī) earth, and the sky, the Vedic student first brought (as) alms (bhikṣā); having made them (both) fuel, he worships; in them are set (arpita) all beings.

XI.5.10 The one this side, the other beyond, the back of the sky, in secret (are) deposited (ni-dhā) the two treasures (nidhi) of the brāhmaṇa; them the Vedic student defends by fervor; the whole of that he, knowing, makes brahman for himself.

XI.5.11 The one this side, the other hence, from earth the two fires come together between these two envelops; upon them are set (śri) the firm rays; these the Vedic student stands upon by fervor.

XI.5.12 Roaring on, thundring, the ruddy white-goer has introduced (? anu-bhṛ) in the earth a great virile member; the Vedic student pours seed upon the surface (sanu), on the earth; by that live the four directions.

XI.5.13 In the fire, in the sun, in the moon, in Mātariśvan, in the waters, the Vedic student puts fuel; their gleams (arcis) go about separately in the cloud; their sacrificial butter (ājya) is man, rain, waters.

आचार्यो॑ मृत्युर्वरु॑णः सोम॒ ओष॑धयः॒ पयः॑ ।
जीमूता॑ आसन्त्सत्वा॑न॒स्तैरि॒दं स्व॑१राभृ॑तम् ॥१४॥
अ॒मा घृतं कृ॑णुते॒ केव॑लमाचार्यो॑ भूत्वा वरु॑णो॒ यद्यदैच्छ॑त्प्र॒जाप॑तौ ।
तद्ब्र॑ह्मचा॒री प्राय॑च्छ॒त्स्वान्मि॒त्रो अध्या॒त्मनः॑ ॥१५॥
आ॒चा॒र्यो॑ ब्रह्मचा॒री ब्र॑ह्मचा॒री प्र॒जाप॑तिः ।
प्र॒जाप॑ति॒र्वि रा॑जति वि॒राडिन्द्रो॑ऽभवद्व॒शी ॥१६॥
ब्र॒ह्म॒चर्ये॑ण॒ तप॑सा॒ राजा॑ रा॒ष्ट्रं वि र॑क्षति ।
आ॒चा॒र्यो॑ ब्रह्म॒चर्ये॑ण ब्रह्मचा॒रिण॑मिच्छते ॥१७॥
ब्र॒ह्म॒चर्ये॑ण क॒न्या॑३ युवा॑नं विन्दते॒ पति॑म् ।
अ॒न॒ड्वान्ब्र॑ह्म॒चर्ये॑णाश्वो॑ घा॒सं जि॑गीषति ॥१८॥
ब्र॒ह्म॒चर्ये॑ण॒ तप॑सा दे॒वा मृ॒त्युमपा॑घ्नत ।
इन्द्रो॑ ह ब्र॒ह्म॒चर्ये॑ण दे॒वेभ्यः॒ स्व॑१राभ॑रत् ॥१९॥

आ॒ऽचा॒र्यः॑ । मृ॒त्युः । वरु॑णः । सोमः॑ । ओष॑धयः । पयः॑ ।
जी॒मूताः॑ । आ॒स॒न् । सत्वा॑नः । तैः । इ॒दम् । स्वः॑ । आऽभृ॑तम् ॥ १४ ॥
अ॒मा । घृ॒तम् । कृ॒णु॒ते॒ । केव॑लम् । आ॒ऽचा॒र्यः॑ । भू॒त्वा । वरु॑णः । यत्ऽय॑त् । ऐच्छ॑त् ।
प्र॒जाऽप॑तौ । तत् । ब्र॒ह्म॒ऽचा॒री । प्र । अ॒य॒च्छ॒त् । स्वान् । मि॒त्रः । अधि॑ । आ॒त्मनः॑ ॥१५॥
आ॒ऽचा॒र्यः॑ । ब्र॒ह्म॒ऽचा॒री । ब्र॒ह्म॒ऽचा॒री । प्र॒जाऽप॑तिः ।
प्र॒जाऽप॑तिः । वि । रा॒ज॒ति॒ । वि॒ऽराट् । इन्द्रः॑ । अ॒भ॒व॒त् । व॒शी ॥ १६ ॥
ब्र॒ह्म॒ऽच॒र्ये॑ण । तप॑सा । राजा॑ । रा॒ष्ट्रम् । वि । र॒क्ष॒ति॒ ।
आ॒ऽचा॒र्यः॑ । ब्र॒ह्म॒ऽच॒र्ये॑ण । ब्र॒ह्म॒ऽचा॒रिण॑म् । इ॒च्छ॒ते॒ ॥ १७ ॥
ब्र॒ह्म॒ऽच॒र्ये॑ण । क॒न्या॑ । युवा॑नम् । वि॒न्द॒ते॒ । पति॑म् ।
अ॒न॒ड्वान् । ब्र॒ह्म॒ऽच॒र्ये॑ण । अश्वः॑ । घा॒सम् । जि॒गी॒ष॒ति॒ ॥ १८ ॥
ब्र॒ह्म॒ऽच॒र्ये॑ण । तप॑सा । दे॒वाः । मृ॒त्युम् । अप॑ । अ॒घ्न॒त॒ ।
इन्द्रः॑ । ह॒ । ब्र॒ह्म॒ऽच॒र्ये॑ण । दे॒वेभ्यः॑ । स्वः॑ । आ । अ॒भ॒र॒त् ॥ १९ ॥

XI.5.14 The teacher (was) death, Varuṇa, Soma, the herbs, milk; the thunder-clouds were warriors; by them (was) this heaven (svar) brought.

XI.5.15 Varuṇa, having become teacher, makes his own (? amā) the entire ghee; whatever he sought of Prajāpati, that the vedic student furnished, a friend (mitra) from his own self.

XI.5.16 The teacher (is) the Vedic student; the Vedic student (is) Prajāpati; bears rule (vi-rāj); the virāj became the controlling Indra.

XI.5.17 By Vedic-studentship, by fervor, a king defends his kingdom; a teacher by Vedic-studentship (brahmacārya) seeks a Vedic student.

XI.5.18 By Vedic-studentship a girl wins (vid) a young husband; by Vedic studentship a draft-ox, a horse strives to gain (ji) food.

XI.5.19 By Vedic-studentship, by fervor, the gods smote away death; Indra by Vedic-studentship brought heaven (svar) for the gods.

ओषधयो भूतभव्यमहोरात्रे वनस्पतिः ।
संवत्सरः सहर्तुभिस्ते जाता ब्रह्मचारिणः ॥२०॥
पार्थिवा दिव्याः पशव आरण्या ग्राम्याश्च ये ।
अपक्षाः पक्षिणश्च ये ते जाता ब्रह्मचारिणः ॥२१॥
पृथक्सर्वे प्राजापत्याः प्राणानात्मसु बिभ्रति ।
तान्त्सर्वान्ब्रह्म रक्षति ब्रह्मचारिण्याभृतम् ॥२२॥
देवानामेतत्परिषूतमनभ्यारूढं चरति रोचमानम् ।
तस्माज्जातं ब्राह्मणं ब्रह्म ज्येष्ठं देवाश्च सर्वे अमृतेन साकम् ॥२३॥
ब्रह्मचारी ब्रह्म भ्राजद्बिभर्ति तस्मिन्देवा अधि विश्वे समोताः ।
प्राणापानौ जनयन्नाद्व्यानं वाचं मनो हृदयं ब्रह्म मेधाम् ॥२४॥
चक्षुः श्रोत्रं यशो अस्मासु धेह्यन्नं रेतो लोहितमुदरम् ॥२५॥
तानि कल्पद्ब्रह्मचारी सलिलस्य पृष्ठे तपोतिष्ठत्तप्यमानः समुद्रे ।
स स्नातो बभ्रुः पिङ्गलः पृथिव्यां बहु रोचते ॥२६॥

ओषधयः । भूतऽभव्यम् । अहोरात्रे इति । वनस्पतिः ।
सम्ऽवत्सरः । सह । ऋतुऽभिः । ते । जाताः । ब्रह्मऽचारिणः ॥ २० ॥
पार्थिवाः । दिव्याः । पशवः । आरण्याः । ग्राम्याः । च । ये ।
अपक्षाः । पक्षिणः । च । ये । ते । जाताः । ब्रह्मऽचारिणः ॥ २१ ॥
पृथक् । सर्वे । प्राजाऽपत्याः । प्राणान् । आत्मऽसु । बिभ्रति ।
तान् । सर्वान् । ब्रह्म । रक्षति । ब्रह्मऽचारिणि । आऽभृतम् ॥ २२ ॥
देवानाम् । एतत् । परिऽसूतम् । अनभिऽआरूढम् । चरति । रोचमानम् ।
तस्मात् । जातम् । ब्राह्मणम् । ब्रह्म । ज्येष्ठम् । देवाः । च । सर्वे । अमृतेन । साकम् ॥२३॥
ब्रह्मऽचारी । ब्रह्म । भ्राजत् । बिभर्ति । तस्मिन् । देवाः । अधि । विश्वे । सम्ऽओताः ।
प्राणापानौ । जनयन् । आत् । विऽआनम् । वाचम् । मनः । हृदयम् । ब्रह्म । मेधाम् ॥२४॥
चक्षुः । श्रोत्रम् । यशः । अस्मासु । धेहि । अन्नम् । रेतः । लोहितम् । उदरम् ॥ २५ ॥
तानि । कल्पत् । ब्रह्मऽचारी । सलिलस्य । पृष्ठे । तपः । आतिष्ठत् । तप्यमानः ।
समुद्रे । सः । स्नातः । बभ्रुः । पिङ्गलः । पृथिव्याम् । बहु । रोचते ॥ २६ ॥

XI.5.20 The herbs, past and future, day and night, the forest tree, the year together with the seasons --they are born of the Vedic student.

XI.5.21 The earthly, the heavenly cattle, they of the forest, and they that are of the village, the wingless and they that are winged -- they are born of the Vedic student.

XI.5.22 Individually do all that are of Prajāpati bear breaths in their bodies (ātman); all these the brahman defends, brought in the Vedic student.

XI.5.23 That, sent forth (? parisūta) of the gods, not mounted onto. goes about shining, from that (was) born the brāhmaṇa, the chief brahman, and all the gods, together with immortality.

XI.5.24 The Vedic student bears a shining brahman; in that (are) woven together all the gods; (he) generating breath and expiration, then out breathing (vyāna), speech, mind, heart, brahman, wisdom.

XI.5.25 Sight, hearing, glory put thou in us; food, seed, blood (lohita), belly.

XI.5.26 Shaping these things, the Vedic student stood performing penance (tapas tapya) on the back of the sea (salila), in the ocean; he, bathed, brown, ruddy (piñgala), shines much on the earth.

(६) षष्ठं सूक्तम्

(१-२३) त्रयोविंशत्यृचस्यास्य सूक्तस्य शन्तातिर्ऋषिः। चन्द्रमा मन्त्रोक्ता वा देवताः। (१-२२) प्रथमादि-द्वाविंशत्यृचामनुष्टुप्, (२३) त्रयोविंश्याश्च बृहतीगर्भानुष्टुप् छन्दसी ॥

अग्निं ब्रूमो वनस्पतीनोषधीरुत वीरुधः।
इन्द्रं बृहस्पतिं सूर्यं ते नो मुञ्चन्त्वंहसः ॥१॥
ब्रूमो राजानं वरुणं मित्रं विष्णुमथो भगम्।
अंशं विवस्वन्तं ब्रूमस्ते नो मुञ्चन्त्वंहसः ॥२॥
ब्रूमो देवं सवितारं धातारमुत पूषणम्।
त्वष्टारमग्रियं ब्रूमस्ते नो मुञ्चन्त्वंहसः ॥३॥
गन्धर्वाप्सरसो ब्रूमो अश्विना ब्रह्मणस्पतिम्।
अर्यमा नाम यो देवस्ते नो मुञ्चन्त्वंहसः ॥४॥
अहोरात्रे इदं ब्रूमः सूर्याचन्द्रमसावुभा।
विश्वानादित्यान्ब्रूमस्ते नो मुञ्चन्त्वंहसः ॥५॥
वातं ब्रूमः पर्जन्यमन्तरिक्षमथो दिशः।
आशाश्च सर्वा ब्रूमस्ते नो मुञ्चन्त्वंहसः ॥६॥

अग्निम्। ब्रूमः। वनस्पतीन्। ओषधीः। उत। वीरुधः।
इन्द्रम्। बृहस्पतिम्। सूर्यम्। ते। नः। मुञ्चन्तु। अंहसः ॥ १ ॥
ब्रूमः। राजानम्। वरुणम्। मित्रम्। विष्णुम्। अथो इति। भगम्।
अंशम्। विवस्वन्तम्। ब्रूमः। ते। नः। मुञ्चन्तु। अंहसः ॥ २ ॥
ब्रूमः। देवम्। सवितारम्। धातारम्। उत। पूषणम्।
त्वष्टारम्। अग्रियम्। ब्रूमः। ते। नः। मुञ्चन्तु। अंहसः ॥ ३ ॥
गन्धर्वऽअप्सरसः। ब्रूमः। अश्विना। ब्रह्मणः। पतिम्।
अर्यमा। नाम। यः। देवः। ते। नः। मुञ्चन्तु। अंहसः ॥ ४ ॥
अहोरात्रे इति। इदम्। ब्रूमः। सूर्याचन्द्रमसौ। उभा।
विश्वान्। आदित्यान्। ब्रूमः। ते। नः। मुञ्चन्तु। अंहसः ॥ ५ ॥
वातम्। ब्रूमः। पर्जन्यम्। अन्तरिक्षम्। अथो इति। दिशः।
आशाः। च। सर्वाः। ब्रूमः। ते। नः। मुञ्चन्तु। अंहसः ॥ ६ ॥

To many different gods : for relief

[See first Samullāsa (chapter) of the Light of Truth by Dayānanda for etymological derivations]

Note: Satyārtha Prakāś and several name for God.

1.Agni; 2.Varuṇa; 3.Mitra; 4.Viśṇu; 5.Bhaga; 6.Anśa; 7.Vivasvanta; 8.Savitr; 9.Dhātr; 10.Pūśān; 11.Gandharva; 12.Apsaras; 13.Aśvinau; 14.Brahmaṇspati; 15.Aryaman; 16.Diva; 17.Paatri; 18.Sūrya; 19.Candra; 20.Parjanya; 21.Soma; 22.Bhava; 23.Śarva.

XI.6.1 We address (brū) Agni, the forest trees, the herbs and the plants, Indra, Bṛhaspati, the Sun; let them free us from distress.

XI.6.2 We address king Varuṇa, Mitra, Vibhu, likewise Bhaga; Anśa,Vivasvant we address; let them free us from distress.

XI.6.3 We address god Savitṛ, Dhātaṛ and Pūśhan; we address Tvaṣṭṛ at the head (agriyā); let them free us from distress.

XI.6.4 The Gandharvas and Apsarases we address, the (two) Aśvins, Brāhmaṇsapti, the god that is Aryaman by name; let them free us from distress.

XI.6.5 Day and night now we address, sun-and moon both; all the Ādityas we address; let them free us from distress.

XI.6.6 The wind we address, Parjanya, the atmosphere, also the quarters, and all regions we address; let them free us from distress.

मुञ्चन्तु मा शपथ्या॒दहोरा॒त्रे अथो॑ उ॒षाः ।
सोमो॑ मा दे॒वो मु॑ञ्चतु यमा॒हुश्च॒न्द्रमा॒ इति॑ ॥७॥
पार्थिवा दि॒व्याः प॒शव॑ आर॒ण्या उ॒त ये मृगाः ।
श॒कुन्ता॒न्प॒क्षिणो॑ ब्रूम॒स्ते नो॑ मुञ्च॒न्त्वंह॑सः ॥८॥
भ॒वाश॒र्वावि॒दं ब्रूमो रु॒द्रं प॑शु॒पति॑श्च॒ यः ।
इषू॒र्या ए॑षां संवि॒द्म ता नः स॑न्तु॒ सदा॑ शि॒वाः ॥९॥
दिवं॑ ब्रूमो॒ नक्ष॑त्राणि॒ भूमिं॑ य॒क्षाणि॒ पर्व॑तान् ।
स॒मु॒द्रा न॒द्यो॒ वेश॒न्तास्ते नो॑ मुञ्च॒न्त्वंह॑सः ॥१०॥
स॒प्त॒र्षीन्वा इ॒दं ब्रू॑मो॒पो दे॒वीः प्र॒जाप॑तिम् ।
पि॒तॄन्य॒मश्रे॑ष्ठान्ब्रूम॒स्ते नो॑ मुञ्च॒न्त्वंह॑सः ॥११॥
ये दे॒वा दि॑वि॒षदो॑ अन्तरिक्ष॒सद॑श्च॒ ये ।
पृ॒थि॒व्यां श॒क्रा ये श्रि॒तास्ते नो॑ मुञ्च॒न्त्वंह॑सः ॥१२॥

मु॒ञ्चन्तु॑ । मा॒ । श॒प॒थ्या॑त् । अ॒हो॒रा॒त्रे इति॑ । अथो॒ इति॑ । उ॒षाः ।
सोमः॑ । मा॒ । दे॒वः । मु॒ञ्च॒तु॒ । यम् । आ॒हुः । च॒न्द्रमाः॑ । इति॑ ॥ ७ ॥
पार्थि॑वाः । दि॒व्याः । प॒शवः॑ । आ॒र॒ण्याः । उ॒त । ये । मृ॒गाः ।
श॒कुन्ता॑न् । प॒क्षिणः॑ । ब्रू॒मः । ते । नः॒ । मु॒ञ्च॒न्तु॒ । अंह॑सः ॥ ८ ॥
भ॒वा॒श॒र्वौ । इ॒दम् । ब्रू॒मः । रु॒द्रम् । प॒शु॒ऽपतिः॑ । च॒ । यः ।
इषुः॑ । याः । ए॒षा॒म् । स॒म्ऽवि॒द्म । ताः । नः॒ । स॒न्तु॒ । सदा॑ । शि॒वाः ॥ ९ ॥
दिव॑म् । ब्रू॒मः । नक्ष॑त्राणि । भूमि॑म् । य॒क्षाणि॑ । पर्व॑तान् ।
स॒मु॒द्राः । न॒द्यः॑ । वे॒श॒न्ताः । ते । नः॒ । मु॒ञ्च॒न्तु॒ । अंह॑सः ॥ १० ॥
स॒प्त॒ऽऋ॒षीन् । वै । इ॒दम् । ब्रू॒मः । अ॒पः । दे॒वीः । प्र॒जाऽप॑तिम् ।
पि॒तॄन् । य॒मऽश्रे॑ष्ठान् । ब्रू॒मः । ते । नः॒ । मु॒ञ्च॒न्तु॒ । अंह॑सः ॥ ११ ॥
ये । दे॒वाः । दि॒वि॒ऽसदः॑ । अ॒न्त॒रि॒क्ष॒ऽसदः॑ । च॒ । ये ।
पृ॒थि॒व्याम् । श॒क्राः । ये । श्रि॒ताः । ते । नः॒ । मु॒ञ्च॒न्तु॒ । अंह॑सः ॥ १२ ॥

XI.6.7 Let day and night, likewise dawn, free me from what comes from a curse; let god Soma free me, whom they call the moon.

XI.6.8 The earthly, the heavenly cattle, also the beasts (mṛga) that are of the forest; we address the hawks (cakunta), the birds (pakṣin); let them free us from distress.

XI.6.9 Bhava and Śarva now we address, Rudra and him that is lord of cattle; the arrows of them which we well know (sam-vid); let those be ever propitious to us.

XI.6.10 We address the sky, the asterisms, the earth, the yakṣas, the mountains; the oceans, the rivars, the pools -- let them free us from distress.

XI.6.11 The seven seers now we address, the heavenly waters, Prajāpati; the Fathers with Yama as their chief (śreṣṭha) we address: let them free us from distress.

XI.6.12 The gods that are seated in the sky, and that are seated in the atmosphere, the mighty ones (cakra) that are set (śri) on the earth; let them free us from distres.

आदित्या रुद्रा वसवो दिवि देवा अथर्वाणः ।
अङ्गिरसो मनीषिणस्ते नो मुञ्चन्त्वंहसः ॥१३॥
यज्ञं ब्रूमो यजमानमृचः सामानि भेषजा ।
यजूंषि होत्रा ब्रूमस्ते नो मुञ्चन्त्वंहसः ॥१४॥
पञ्च राज्यानि वीरुधां सोमश्रेष्ठानि ब्रूमः ।
दर्भो भङ्गो यवः सहस्ते नो मुञ्चन्त्वंहसः ॥१५॥
अरायान्ब्रूमो रक्षांसि सर्पान्पुण्यजनान्पितॄन् ।
मृत्यूनेकशतं ब्रूमस्ते नो मुञ्चन्त्वंहसः ॥१६॥
ऋतून्ब्रूम ऋतुपतीनार्तवानुत हायनान् ।
समाः संवत्सरान्मासांस्ते नो मुञ्चन्त्वंहसः ॥१७॥
एत देवा दक्षिणतः पश्चात्प्राञ्च उदेत ।
पुरस्तादुत्तराच्छक्रा विश्वे देवाः समेत्य ते नो मुञ्चन्त्वंहसः ॥१८॥

आदित्याः । रुद्राः । वसवः । दिवि । देवाः । अथर्वाणः ।
अङ्गिरसः । मनीषिणः । ते । नः । मुञ्चन्तु । अंहसः ॥ १३ ॥
यज्ञम् । ब्रूमः । यजमानम् । ऋचः । सामानि । भेषजा ।
यजूंषि । होत्राः । ब्रूमः । ते । नः । मुञ्चन्तु । अंहसः ॥ १४ ॥
पञ्च । राज्यानि । वीरुधाम् । सोमऽश्रेष्ठानि । ब्रूमः ।
दर्भः । भङ्गः । यवः । सहः । ते । नः । मुञ्चन्तु । अंहसः ॥ १५ ॥
अरायान् । ब्रूमः । रक्षांसि । सर्पान् । पुण्यऽजनान् । पितॄन् ।
मृत्यून् । एकऽशतम् । ब्रूमः । ते । नः । मुञ्चन्तु । अंहसः ॥ १६ ॥
ऋतून् । ब्रूमः । ऋतुऽपतीन् । आर्तवान् । उत । हायनान् ।
समाः । सम्ऽवत्सरान् । मासान् । ते । नः । मुञ्चन्तु । अंहसः ॥ १७ ॥
आ । इत । देवाः । दक्षिणतः । पश्चात् । प्राञ्चः । उत्ऽएत । पुरस्तात् ।
उत्तरात् । शक्राः । विश्वे । देवाः । सम्ऽएत्य । ते । नः । मुञ्चन्तु । अंहसः ॥ १८ ॥

XI.6.13 The Ādityas, the Rudras, the Vasus, the gods in heaven, the Atharvans, the Añgirases full of wisdom; let them free us from distress.

XI.6.14 We address the sacrifice, the sacrificer, the verses (ṛc), the chants (sāman), the remedies; the sacred formulas (yajus), the invocations we address: let them free us from distress.

XI.6.15 The five kingdoms of plants, having Soma as their chief (śreṣṭha), we address; the darbha, hemp, barley, saha; let them free us from distress.

XI.6.16 The niggards we address, the demons, the serpents, the pure-folk, the Fathers; the hundred and one deaths we address; let them free us from distress.

XI.6.17 The seasons we address, the lords of the seasons, the year-divisions and the winters, the summers, the years, the months; let them free us from distress.

XI.6.18 Come, ye gods, from the south; from the west, come up eastward; from the east, from the north, mighty, all the gods, coming together; let them free us from distress.

विश्वान्देवानिदं ब्रूमः सत्यसंधानृतावृधः ।
विश्वाभिः पत्नीभिः सह ते नो मुञ्चन्त्वंहसः ॥१९॥
सर्वान्देवानिदं ब्रूमः सत्यसंधानृतावृधः ।
सर्वाभिः पत्नीभिः सह ते नो मुञ्चन्त्वंहसः ॥२०॥
भूतं ब्रूमो भूतपतिं भूतानामुत यो वशी ।
भूतानि सर्वा संगत्य ते नो मुञ्चन्त्वंहसः ॥२१॥
या देवीः पञ्च प्रदिशो ये देवा द्वादशर्तवः ।
संवत्सरस्य ये दंष्ट्रास्ते नः सन्तु सदा शिवाः ॥२२॥
यन्मातली रथक्रीतममृतं वेद भेषजम् ।
तदिन्द्रो अप्सु प्रावेशयत्तदापो दत्त भेषजम् ॥२३॥

विश्वान् । देवान् । इदम् । ब्रूमः । सत्यऽसंधान् । ऋतऽवृधः ।
विश्वाभिः । पत्नीभिः । सह । ते । नः । मुञ्चन्तु । अंहसः ॥ १९ ॥

सर्वान् । देवान् । इदम् । ब्रूमः । सत्यऽसंधान् । ऋतऽवृधः ।
सर्वाभिः । पत्नीभिः । सह । ते । नः । मुञ्चन्तु । अंहसः ॥ २० ॥

भूतम् । ब्रूमः । भूतऽपतिम् । भूतानाम् । उत । । यः । वशी ।
भूतानि । सर्वा । सम्ऽगत्य । ते । नः । मुञ्चन्तु । अंहसः ॥ २१ ॥

याः । देवीः । पञ्च । प्रऽदिशः । ये । देवाः । द्वादश । ऋतवः ।
सम्ऽवत्सरस्य । ये । दंष्ट्राः । ते । नः । सन्तु । सदा । शिवाः ॥ २२ ॥

यत् । मातली । रथऽक्रीतम् । अमृतम् । वेद । भेषजम् ।
तत् । इन्द्रः । अप्ऽसु । प्र । अवेशयत् । तत् । आपः । दत्त । भेषजम् ॥२३॥

(७) सप्तमं सूक्तम्

(१-२७) सप्तविंशत्यृचस्यास्य सूक्तस्याथर्वा ऋषिः । उच्छिष्टोऽध्यात्मश्च देवते । (१-५, ७-२०, २३-२७) प्रथमादि-पञ्चर्चा सप्तम्यादिचतुर्दशानां त्रयोविंश्यादिपञ्चानाञ्चानुष्टुप्, (६) षष्ठ्या बार्हतपरा पुर उष्णिगनुष्टुप्, (२१) एकविंश्याः स्वराडनुष्टुप्, (२२) द्वाविंश्याश्च विराट्पथ्याबृहती छन्दांसि ॥

उच्छिष्टे नाम रूपं चोच्छिष्टे लोक आहितः ।
उच्छिष्ट इन्द्रश्चाग्निश्च विश्वमन्तः समाहितम् ॥१॥

उत्ऽशिष्टे । नाम । रूपम् । च । उत्ऽशिष्टे । लोकः । आऽहितः ।
उत्ऽशिष्टे । इन्द्रः । च । अग्निः । च । विश्वम् । अन्तः । सम्ऽआहितम् ॥ १ ॥

XI.6.19 All types of gods now we address, of true agreements, increasers of righteousness, together with all their spouses: let them free us from distress.

XI.6.20 The collective gods now we address, of true agreements, increasers of righteousness, together with therir collective spouses; let them free us from distress.

XI.6.21 Existence we address, the lord of existence, and who is controller of existences; all existences, assembling; let them free us from distress.

XI.6.22 They that are the five divine directions, that are the twelve divine seasons, that are the fangs of the year; let them be ever propitious to us.

XI.6.23 The immortal remedy, chariot-bought, which Mātāli knows; - that Indra made enter into the waters; that remedy, O waters, give ye.

Extolling the remnant (ucciṣṭa) of the offering

XI.7.1 In the remnant (are set) name and form, in the remnant (is) set the world; within the remnant both Indra and Agni, everything is set together.

उच्छिष्टे द्यावापृथिवी विश्वं भूतं समाहितम्।
आपः समुद्र उच्छिष्टे चन्द्रमा वात आहितः ॥२॥
सन्नुच्छिष्टे असंश्चोभौ मृत्युर्वाजः प्रजापतिः।
लौक्या उच्छिष्ट आयत्ता व्रश्च द्रश्चापि श्रीर्मयि ॥३॥
दृढो दृंहस्थिरो न्यो ब्रह्म विश्वसृजो दश।
नाभिमिव सर्वतश्चक्रमुच्छिष्टे देवताः श्रिताः ॥४॥
ऋक्साम यजुरुच्छिष्ट उद्गीथः प्रस्तुतं स्तुतम्।
हिङ्कार उच्छिष्टे स्वरः साम्नो मेडिश्च तन्मयि ॥५॥
ऐन्द्राग्नं पावमानं महानाम्नीर्महाव्रतम्।
उच्छिष्टे यज्ञस्याङ्गान्यन्तर्गर्भ इव मातरि ॥६॥
राजसूयं वाजपेयमग्निष्टोमस्तदध्वरः।
अर्काश्वमेधावुच्छिष्टे जीवबर्हिर्मदिन्तमः ॥७॥

उत्ऽशिष्टे। द्यावापृथिवी इति। विश्वम्। भूतम्। सम्ऽआहितम्।
आपः। समुद्रः। उत्ऽशिष्टे। चन्द्रमाः। वातः। आऽहितः॥ २॥
सन्। उत्ऽशिष्टे। असन्। च। उभौ। मृत्युः। वाजः। प्रजाऽपतिः।
लौक्याः। उत्ऽशिष्टे। आऽयत्ताः। व्रः। च। द्रः। च। अपि। श्रीः। मयि॥ ३॥
दृढः। दृंहऽस्थिरः। न्यः। ब्रह्म। विश्वऽसृजः। दश।
नाभिम्ऽइव। सर्वतः। चक्रम। उत्ऽशिष्टे। देवताः। श्रिताः॥ ४॥
ऋक्। साम। यजुः। उत्ऽशिष्टे। उत्ऽगीथः। प्रऽस्तुतम्। स्तुतम्।
हिङ्ऽकारः। उत्ऽशिष्टे। स्वरः। साम्नः। मेडिः। च। तत्। मयि॥ ५॥
ऐन्द्राग्नम्। पावमानम्। महाऽनाम्नीः। महाऽव्रतम्।
उत्ऽशिष्टे। यज्ञस्य। अङ्गानि। अन्तः। गर्भःऽइव। मातरि॥ ६॥
राजऽसूयम्। वाजऽपेयम्। अग्निऽस्तोमः। तत्। अध्वरः।
अर्कऽअश्वमेधौ। उत्ऽशिष्टे। जीवऽबर्हिः। मदिन्ऽतमः॥ ७॥

XI.7.2 In the remnant heaven and earth, all existence is set together; in the remnant the waters, the ocean, the moon, the wind is set.

XI.7.3 In the remnant (are) the being one and the non-being one, both, death, vigor, Prajāpati; they of the world (laukya) are supported (ā-yat) on the remnant, both vra, and dra; also fortune (śri) in me.

XI.7.4 Being fixed, fix thou, being stanch, nya, the brahman, the ten all creators; as the wheel on all sides of the nave, the divinities (are) set (śrita) in the remnant.

XI.7.5 The verse (ṛc), the chant (sāman), the formula (yajus) (are) in the remnant, (also) the song (udgītha), the introductory praise (prastuta), the praise (stuta), the sound hing (is) in the remnant, the tone (svara), and the ring (? meḍi) of the chant; that in me.

XI.7.6 That relating to Indra and Agni, that to the purifying (Soma) (pāvamāna), the great-named ones (f., mahānāmnīs), the great ceremony (mahāvrata) -- within the remenat are (all) the members of the sacrifice, like an embryo within a mother.

XI.7.7 The rajasūya (royal consecration), the vājapeya (vigor-drinking), the agniṣṭoma (fire-praise), then the sacrifice (adhvara), the arka and aśva-medha (horse-sacrifice) (are) in the remnant, the one having a living barhis, most intoxicating.

अग्न्याधेयमथो दीक्षा कामप्रश्छन्दसा सह ।
उत्सन्ना यज्ञाः सत्राण्युच्छिष्टेधि समाहिताः ॥८॥
अग्निहोत्रं च श्रद्धा च वषट्कारो व्रतं तपः ।
दक्षिणेष्टं पूर्तं चोच्छिष्टेधि समाहिताः ॥९॥
एकरात्रो द्विरात्रः सद्यःक्रीः प्रक्रीरुक्थ्यः ।
ओतं निहितमुच्छिष्टे यज्ञस्याणूनि विद्यया ॥१०॥
चतूरात्रः पञ्चरात्रः षड्रात्रश्चोभयः सह ।
षोडशी सप्तरात्रश्चोच्छिष्टाज्जज्ञिरे सर्वे ये यज्ञा अमृते हिताः ॥११॥
प्रतीहारो निधनं विश्वजिच्चाभिजिच्च यः ।
साह्नातिरात्रावुच्छिष्टे द्वादशाहोपि तन्मयि ॥१२॥
सूनृता संनतिः क्षेमः स्वधोर्जामृतं सहः ।
उच्छिष्टे सर्वे प्रत्यञ्चः कामाः कामेन तातृपुः ॥१३॥

अग्निऽआधेयम् । अथो इति । दीक्षा । कामऽप्रः । छन्दसा । सह ।
उत्ऽसन्नाः । यज्ञाः । सत्राणि । उत्ऽशिष्टे । अधि । सम्ऽआहिताः ॥ ८ ॥
अग्निऽहोत्रम् । च । श्रद्धा । च । वषट्ऽकारः । व्रतम् । तपः ।
दक्षिणा । इष्टम् । पूर्तम् । च । उत्ऽशिष्टे । अधि । सम्ऽआहिताः ॥ ९ ॥
एकऽरात्रः । द्विऽरात्रः । सद्यःऽक्रीः । प्रऽक्रीः । उक्थ्यः ।
आऽउतम् । निऽहितम् । उत्ऽशिष्टे । यज्ञस्य । अणूनि । विद्यया ॥ १० ॥
चतुःऽरात्रः । पञ्चऽरात्रः । षट्ऽरात्रः । च । उभयः । सह । षोडशी ।
सप्तऽरात्रः । च । उत्ऽशिष्टात् । जज्ञिरे । सर्वे । ये । यज्ञाः । अमृते । हिताः ॥ ११ ॥
प्रतिऽहारः । निऽधनम् । विश्वऽजित् । च । अभिऽजित् । च । यः ।
साह्नऽअतिरात्रौ । उत्ऽशिष्टे । द्वादशऽअहः । अपि । तत् । मयि ॥ १२ ॥
सूनृता । सम्ऽनतिः । क्षेमः । स्वधा । ऊर्जा । अमृतम । सहः ।
उत्ऽशिष्टे । सर्वे । प्रत्यञ्चः । कामाः । कामेन । ततृपुः ॥ १३ ॥

XI.7.8 The establishing of a fire, also the consecration, the desire-fulfiller, together with the meter (chanda); the removed (? utsanna) sacrifices, the sacrificial sessions (sattra), are set together in the remnant.

XI.7.9 Both the fire-offering (agnihotra) and faith, the vashaṭ-exclamation, the vow (vrata), penance, the sacrificial gift (dakṣinā), what is offered (iṣṭa) and what is bestowed (pūrta) -- are set together in the remnant.

XI.7.10 The one-night (sacrifice), the two-night, the same-day-purchase (sadyaḥkrī), the purchasable (? prakrī), the praiseworthy (ukthya) -- (it) is woven, deposited, in the remnant; the minute things of the sacrifice, by wisdom.

XI.7.11 The fourth-night (sacrifice), the five-night, and the six-night, of both kinds, together, the one of sixteen (ṣoḍaśin), and the seven-night - from the remnant were born all the sacrifices that are put in immortality.

XI.7.12 The response (pratīhāra), the conclusion (nidhana), both the all-conquering and the on-conquering (abhijit), one, the same-day and overnight ones (are) in the remnant, the twelve-day one: also that in me.

XI.7.13 Pleasantness, compliance (samnati), comfort (kṣema), custom (? svadhā), refreshment, immortality, power - in the remant all occurring (pratyañc) desires are satisfied with desire.

नव भूमीः समुद्रा उच्छिष्टेधि श्रिता दिवः ।
आ सूर्यो भात्युच्छिष्टेहोरात्रे अपि तन्मयि ॥१४॥
उपहव्यं विषूवन्तं ये च यज्ञा गुहा हिताः ।
बिभर्ति भर्ता विश्वस्योच्छिष्टो जनितुः पिता ॥१५॥
पिता जनितुरुच्छिष्टोसोः पौत्रः पितामहः ।
स क्षियति विश्वस्येशानो वृषा भूम्यामतिघ्न्यः ॥१६॥
ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च ।
भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले ॥१७॥
समृद्धिरोज आकूतिः क्षत्रं राष्ट्रं षडुर्व्यः ।
संवत्सरोध्युच्छिष्ट इडा प्रैषा ग्रहा हविः ॥१८॥
चतुर्होतार आप्रियश्चातुर्मास्यानि नीविदः ।
उच्छिष्टे यज्ञा होत्राः पशुबन्धास्तदिष्टयः ॥१९॥

नव । भूमीः । समुद्राः । उत्ऽशिष्टे । अधि । श्रिताः । दिवः ।
आ । सूर्यः । भाति । उत्ऽशिष्टे । अहोरात्रे इति । अपि । तत् । मयि ॥ १४ ॥
उपऽहव्यम् । विषुऽवन्तम् । ये । च । यज्ञाः । गुहा । हिताः ।
बिभर्ति । भर्त्ता । विश्वस्य । उत्ऽशिष्टः । जनितुः । पिता ॥ १५ ॥
पिता । जनितुः । उत्ऽशिष्टः । असोः । पौत्रः । पितामहः ।
सः । क्षियति । विश्वस्य । ईशानः । वृषा । भूम्याम् । अतिऽघ्न्यः ॥ १६ ॥
ऋतम् । सत्यम् । तपः । राष्ट्रम् । श्रमः । धर्मः । च । कर्म । च ।
भूतम् । भविष्यत् । उत्ऽशिष्टे । वीर्यम् । लक्ष्मीः । बलम् । बले ॥ १७ ॥
समऽऋद्धिः । ओजः । आऽकूतिः । क्षत्रम् । राष्ट्रम् । षट् । उर्व्यः ।
समऽवत्सरः । अधि । उत्ऽशिष्टे । इडा । प्रऽएषाः । ग्रहाः । हविः ॥ १८ ॥
चतुःऽहोतारः । आप्रियः । चातुःऽमास्यानि । निऽविदः ।
उत्ऽशिष्टे । यज्ञाः । होत्राः । पशुऽबन्धाः । तत् । इष्टयः ॥ १९ ॥

XI.7.14 The nine earths, oceans, skies, are set (śrita) in the remnant; the sun shines in the remnant; day and night: also that in me.

XI.7.15 The added oblation (upahavya), the dividing (day) and the sacrifices that are put in secret, the remnant bears, bearer of all, father of the generator.

XI.7.16 The remnant, father of the generator, of breath (asu) the grandson, grandfather -- he dwells, ruler of all, an overpowering (? atighnya) bull upon the earth.

XI.7.17 Righteousness, truth, penance, kingship, toil, and virtue (dharma) and deed (karman), being (bhūta), what will be, (is) in the remnant; heroism, fortune (lakṣmī), strength in strength.

XI.7.18 Success, force, design, dominion, kingship, the six wide (quarters), the year (is) in the remnant, iḍā, the orders (prāiṣa), the dips (graha), the oblation.

XI.7.19 The four-priest (catur-hotṛ) (sacrifices), the aparīs, the seasonal (oblations), the nivids -- in the remnant (are) the sacrifices, the invocations, the victim-offerings (paśubandha), then the offerings (iṣṭi).

अर्धमासाश्च मासाश्चार्तवा ऋतुभिः सह ।
उच्छिष्टे घोषिणीरापः स्तनयित्नुः श्रुतिर्मही ॥२०॥
शर्कराः सिकता अश्मान ओषधयो वीरुधस्तृणा ।
अभ्राणि विद्युतो वर्षमुच्छिष्टे संश्रिता श्रिता ॥२१॥
राद्धिः प्राप्तिः समाप्तिर्व्याप्तिर्मह एधतुः ।
अत्याप्तिरुच्छिष्टे भूतिश्चाहिता निहिता हिता ॥२२॥
यच्च प्राणति प्राणेन यच्च पश्यति चक्षुषा ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥२३॥
ऋचः सामानि च्छन्दांसि पुराणं यजुषा सह ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥२४॥
प्राणापानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च या ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥२५॥

अर्धऽमासाः । च । मासाः । च । आर्तवाः । ऋतुऽभिः । सह ।
उत्ऽशिष्टे । घोषिणीः । आपः । स्तनयित्नुः । श्रुतिः । मही ॥ २० ॥
शर्कराः । सिकताः । अश्मानः । ओषधयः । वीरुधः । तृणा ।
अभ्राणि । विऽद्युतः । वर्षम् । उत्ऽशिष्टे । समऽश्रिता । श्रिता ॥ २१ ॥
राद्धिः । प्रऽआप्तिः । समऽआप्तिः । विऽआप्तिः । महः । एधतुः ।
अतिऽआप्तिः । उत्ऽशिष्टे । भूतिः । च । आऽहिता । निऽहिता । हिता ॥ २२ ॥
यत् । च । प्राणति । प्राणेन । यत् । च । पश्यति । चक्षुषा ।
उत्ऽशिष्टात् । जज्ञिरे । सर्वे । दिवि । देवाः । दिविऽश्रितः ॥ २३ ॥
ऋचः । सामानि । छन्दांसि । पुराणम् । यजुषा । सह ।
उत्ऽशिष्टात् । जज्ञिरे । सर्वे । दिवि । देवाः । दिविऽश्रितः ॥ २४ ॥
प्राणापानौ । चक्षुः । श्रोत्रम् । अक्षितिः । च । क्षितिः । च । या ।
उत्ऽशिष्टात् । जज्ञिरे । सर्वे । दिवि । देवाः । दिविऽश्रितः ॥ २५ ॥

XI.7.20 Both the half-months and the months, the year divisions (ārtava) with the seasons; in the remnant (are) the noisy waters, the ṭhunder, the great sound (? śruti).

XI.7.21 Pebbles, gravel, stones, herbs, plants, grasses, clouds, lightnings, rain -- in the remnant (are they) set together, set.

XI.7.22 Success (rāddhi), attainment, obtainment, permeation, greatness, prosperity (edhatu) -- in the remnant over-attainment and growth (bhūti) (is) put in, put down, put.

XI.7.23 Both what breathes with breath and what sees with sight: from the remnant were born all the gods in heaven, heaven resorters.

XI.7.24 The verses (ṛc), the chants, the meters, the ancient (purāṇa), together with the formula (yajus): from the remnant were born etc.etc.

XI.7.25 Breath and expiration, sight, hearing, indestructibleness and destruction: from the remnant etc. etc.

आनन्दा मोदाः प्रमुदोऽभीमोदमुदश्च ये ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥२६॥
देवाः पितरो मनुष्या गन्धर्वाप्सरसश्च ये ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥२७॥

आऽनन्दाः । मोदाः । प्रऽमुदः । अभिमोदऽमुदः । च । ये ।
उत्ऽशिष्टात् । जज्ञिरे । सर्वे । दिवि । देवाः । दिविऽश्रितः ॥ २६ ॥
देवाः । पितरः । मनुष्याः । गन्धर्वऽअप्सरसः । च । ये ।
उत्ऽशिष्टात् । जज्ञिरे । सर्वे । दिवि । देवाः । दिविऽश्रितः ॥ २७ ॥

(८) अष्टमं सूक्तम्

(१-३४) चतुस्त्रिंशदृचस्यास्य सूक्तस्य कौरुपथिर्ऋषिः । अध्यात्मं मन्युश्च देवते । (१-३२, ३४) प्रथमादि-
द्वात्रिंशदृचां चतुस्त्रिंश्याश्चानुष्टुप्, (३३) त्रयस्त्रिंश्याश्च पथ्यापङ्क्तिश्छन्दसी ॥

यन्मन्युर्जायामावहत्संकल्पस्य गृहादधि ।
क आसं जन्याः के वराः क उ ज्येष्ठवरोऽभवत् ॥१॥
तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे ।
त आसं जन्यास्ते वरा ब्रह्म ज्येष्ठवरोऽभवत् ॥२॥
दश साकमजायन्त देवा देवेभ्यः पुरा ।
यो वै तान्विद्यात्प्रत्यक्षं स वा अद्य महद्वदेत् ॥३॥

यत् । मन्युः । जायाम् । आऽअवहत् । समऽकल्पस्य । गृहात् । अधि ।
के । आसन् । जन्याः । के । वराः । कः । ऊं इति । ज्येष्ठऽवरः । अभवत् ॥ १ ॥
तपः । च । एव । आस्ताम् । कर्म । च । अन्तः । महति । अर्णवे ।
ते । आसन् । जन्याः । ते । वराः । ब्रह्म । ज्येष्ठऽवरः । अभवत् ॥ २ ॥
दश । साकम् । अजायन्त । देवाः । देवेभ्यः । पुरा ।
यः । वै । तान् । विद्यात् । प्रतिऽअक्षम् । सः । वै । अद्य । महत् । वदेत् ॥ ३ ॥

XI.7.26 Delights, joys, enjoyments and they that enjoy enjoyments; from the remnant etc.etc.

XI.7.27 The gods, the Fathers, human beings, and they that are gandharvas and apsarases : from the remnant etc.etc.

Mystic : especially on the constitution of man.

XI.8.1 When fury (manyu) brought his wife away from the house of contrivance (samkalpa), who were the groomsmen (janyā)? Who the wooers (vara)? Who also was chief wooer ?

XI.8.2 Penance and also action were within the great sea (arṇav); those were the groomsmen, those the wooers; the brahman was the chief wooer.

XI.8.3 Ten gods were born together from gods of old; whoever may know them plainly, he verily may talk big to-day.

प्राणापानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च या ।
व्यानोदानौ वाङ्मनस्ते वा आकूतिमावहन् ॥४॥
अजाता आसन्नृतवोऽथो धाता बृहस्पतिः ।
इन्द्राग्नी अश्विना तर्हि कं ते ज्येष्ठमुपासत ॥५॥
तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे ।
तपो ह जज्ञे कर्मणस्तत्ते ज्येष्ठमुपासत ॥६॥
येत आसीद्भूमिः पूर्वा यामद्धातय इद्विदुः ।
यो वै तां विद्यान्नामथा स मन्येत पुराणवित् ॥७॥
कुत इन्द्रः कुतः सोमः कुतो अग्निरजायत ।
कुतस्त्वष्टा समभवत्कुतो धाताजायत ॥८॥
इन्द्रादिन्द्रः सोमात्सोमो अग्नेरग्निरजायत ।
त्वष्टा ह जज्ञे त्वष्टुर्धातुर्धाताजायत ॥९॥

प्राणापानौ । चक्षुः । श्रोत्रम् । अक्षितिः । च । क्षितिः । च । या ।
व्यानऽउदानौ । वाक् । मनः । ते । वै । आऽकूतिम् । आ । अवहन् ॥ ४ ॥
अजाताः । आसन् । ऋतवः । अथो इति । धाता । बृहस्पतिः ।
इन्द्राग्नी इति । अश्विना । तर्हि । कम् । ते । ज्येष्ठम् । उप । आसत ॥ ५ ॥
तपः । च । एव । आस्ताम् । कर्म । च । अन्तः । महति । अर्णवे ।
तपः । ह । जज्ञे । कर्मणः । तत् । ते । ज्येष्ठम् । उप । आसत ॥ ६ ॥
या । इतः । आसीत् । भूमिः । पूर्वा । याम । अद्धातयः । इत् । विदुः ।
यः । वै । ताम् । विद्यात् । नामऽथा । सः । मन्येत । पुराणऽवित ॥ ७ ॥
कुतः । इन्द्रः । कुतः । सोमः । कुतः । अग्निः । अजायत ।
कुतः । त्वष्टा । सम् । अभवत् । कुतः । धाता । अजायत ॥ ८ ॥
इन्द्रात् । इन्द्रः । सोमात् । सोमः । अग्नेः । अग्निः । अजायत ।
त्वष्टा । ह । जज्ञे । त्वष्टुः । धातुः । धाता । अजायत ॥ ९ ॥

XI.8.4 Breath and expiration, sight, hearing, indestructibleness and destruction, out-breathing and up-breathing, speech, mind – they verily brought design.

XI.8.5 Unborn were the seasons, likwise Dhātṛ, Bṛhaspati, Indra and Agni, the two Aśvins at that time: whom did they worship (upa-ās) (as) chief ?

XI.8.6 Both penance, namely, and action were within the great sea; penance was born from action; that did they worship as chief.

XI.8.7 The earth that was previous to this one (itas), which the sages (addhāti) indeed knew – whoever may know that by name, he may think himself knowing in ancient things.

XI.8.8 Where was Indra, whence Soma, whence Agni born ? Whence did Tvaṣṭṛ come into being ? Whence was Dhātṛ born ?

XI.8.9 From Indra Indra, from Soma Soma, from Agni Agni was born; Tvṣṭṛ was born from Tvṣṭr; from Dhātr Dhāṭṛ was born.

ये त आसन्दश जाता देवा देवेभ्यः पुरा ।
पुत्रेभ्यो लोकं दत्त्वा कस्मिंस्ते लोक आसते ॥१०॥
यदा केशानस्थि स्नाव मांसं मज्जानमाभरत् ।
शरीरं कृत्वा पादवत्कं लोकमनु प्राविशत् ॥११॥
कुतः केशान्कुतः स्नाव कुतो अस्थीन्याभरत् ।
अङ्गा पर्वाणि मज्जानं को मांसं कुत आभरत् ॥१२॥
संसिचो नाम ते देवा ये संभारान्त्समभरन् ।
सर्वं संसिच्य मर्त्यं देवाः पुरुषमाविशन् ॥१३॥
ऊरू पादावष्ठीवन्तौ शिरो हस्तावथो मुखम् ।
पृष्टीर्बर्जह्ये पार्श्वे कस्तत्समदधादृषिः ॥१४॥
शिरो हस्तावथो मुखं जिह्वां ग्रीवाश्च कीकसाः ।
त्वचा प्रावृत्य सर्वं तत्संधा समदधान्मही ॥१५॥

ये । ते । आसन् । दश । जाताः । देवाः । देवेभ्यः । पुरा ।
पुत्रेभ्यः । लोकम् । दत्त्वा । कस्मिन् । ते । लोके । आसते ॥ १० ॥
यदा । केशान् । अस्थि । स्नाव । मांसम् । मज्जानम् । आऽअभरत् ।
शरीरम् । कृत्वा । पादऽवत् । कम् । लोकम् । अनु । प्र । अविशत् ॥ ११ ॥
कुतः । केशान् । कुतः । स्नाव । कुतः । अस्थीनि । आ । अभरत् ।
अङ्गा । पर्वाणि । मज्जानम् । कः । मांसम् । कुतः । आ । अभरत् ॥ १२ ॥
समऽसिचः । नाम । ते । देवाः । ये । समऽभारान् । समऽअभरन् ।
सर्वम् । समऽसिच्य । मर्त्यम् । देवाः । पुरुषम् । आ । अविशन् ॥१३॥
ऊरू इति । पादौ । अष्ठीवन्तौ । शिरः । हस्तौ । अथो इति । मुखम् ।
पृष्टीः । बर्जह्ये इति । पार्श्वे इति । कः । तत् । सम् । अदधात् । ऋषिः ॥१४॥
शिरः । हस्तौ । अथो इति । मुखम् । जिह्वाम् । ग्रीवाः । च । कीकसाः ।
त्वचा । प्रऽआवृत्य । सर्वम् । तत् । समऽधा । सम् । अदधात् । मही ॥ १५ ॥

XI.8.10 The ten gods that were of old, born from gods – having given the world to (their) sons, in what world sit they ?

XI.8.11 When he brought hair, bone, sinew, flesh, marrow, having made a body with feet, what world did he afterward enter ?

XI.8.12 Whence brought he the hair, whence the sinew, whence the bones, the limbs, the joints, the marrow, the flesh ? Who brought from whence ?

XI.8.13 Pourers-togther namely are those gods who brought together the bringings-together; having poured together the whole mortal, the gods entered man.

XI.8.14 Thighs, feet, knee-joints, head, hands, also face, ribs, nipples (? barjahya), sides: what seer put that together ?

XI.8.15 Head, hands, also face, tongue and neck, vertebrae -- all that, having enveloped with skin, the great puttings-together put together.

यत्तच्छरीरमशयत्संधया संहितं महत् ।
येनेदमद्य रोचते को अस्मिन्वर्णमाभरत् ॥१६॥
सर्वे देवा उपाशिक्षन्तदजानाद्वधूः सती ।
ईशा वशस्य या जाया सास्मिन्वर्णमाभरत् ॥१७॥
यदा त्वष्टा व्यतृणत्पिता त्वष्टुर्य उत्तरः ।
गृहं कृत्वा मर्त्यं देवाः पुरुषमाविशन् ॥१८॥
स्वप्नो वै तन्द्रीर्निर्ऋतिः पाप्मानो नाम देवताः ।
जरा खालत्यं पालित्यं शरीरमनु प्राविशन् ॥१९॥
स्तेयं दुष्कृतं वृजिनं सत्यं यज्ञो यशो बृहत् ।
बलं च क्षत्रमोजश्च शरीरमनु प्राविशन् ॥२०॥
भूतिश्च वा अभूतिश्च रातयोरातयश्च याः ।
क्षुधश्च सर्वास्तृष्णाश्च शरीरमनु प्राविशन् ॥२१॥

यत् । तत् । शरीरम् । अशयत् । सम्ऽधया । समऽहितम् । महत् ।
येन । इदम् । अद्य । रोचते । कः । अस्मिन् । वर्णम् । आ । अभरत् ॥ १६ ॥
सर्वे । देवाः । उप । अशिक्षन् । तत् । अजानात् । वधूः । सती ।
ईशा । वशस्य । या । जाया । सा । अस्मिन् । वर्णम् । आ । अभरत् ॥ १७ ॥
यदा । त्वष्टा । विऽअतृणत् । पिता । त्वष्टुः । यः । उत्तरः ।
गृहम् । कृत्वा । मर्त्यम् । देवाः । पुरुषम् । आ । अविशन् ॥ १८ ॥
स्वप्नः । वै । तन्द्रीः । निःऽऋतिः । पाप्मानः । नाम । देवताः ।
जरा । खालत्यम् । पालित्यम् । शरीरम् । अनु । प्र । अविशन् ॥ १९ ॥
स्तेयम् । दुःऽकृतम् । वृजिनम् । सत्यम् । यज्ञः । यशः । बृहत् ।
बलम् । च । क्षत्रम् । ओजः । च । शरीरम् । अनु । प्र । अविशन् ॥ २० ॥
भूतिः । च । वै । अभूतिः । च । रातयः । अरातयः । च । याः ।
क्षुधः । च । सर्वाः । तृष्णाः । च । शरीरम् । अनु । प्र । अविशन् ॥ २१ ॥

XI.8.16 The great body whcih lay there, put together by the putting-together -- who brought into it the color with which it shines (ruc) here today ?

XI.8.17 All the gods assisted (? Upa-śikṣ); that she who was a woman knew; she who was wife of control (? vaśa) mistress (īśā), brought color into it.

XI.8.18 When Tvṣṭṛ bored through (him ?) who (was) the superior father of Tvaṣṭṛ, having made the mortal a house, the gods entered into man.

XI.8.19 Sleep, weariness, misery (nirṛti), the deities named evils, old age, baldness, hoariness, entered the body afterward (anu).

XI.8.20 Theft, ill-doing, wrong, truth, sacrifice, great glory, both strength, dominion, and force, entered the body afterward.

XI.8.21 Both growth (bhūti) and diminution, generosities and niggardlinesses, both hungerings and all thirstings, entered the body afterward.

नि॒न्दा॒श्च॒ वा अनि॑न्दाश्च॒ यच्च॒ हन्तेति॒ नेति॑ च ।
शरी॑रं श्र॒द्धा दक्षि॒णाश्र॑द्धा॒ चानु॑ प्रावि॑शन् ॥२२॥
वि॒द्याश्च॒ वा अवि॑द्याश्च॒ यच्चा॒न्यदु॑पदे॒श्य॑म् ।
शरी॑रं॒ ब्रह्म॒ प्रावि॑श॒दृच॒ः सामाथो॒ यजु॑ः ॥२३॥
आ॒न॒न्दा मोदा॑ः प्र॒मुदो॑भीमोद॒मुद॑श्च॒ ये ।
ह॒सो न॒रिष्टा॑ नृ॒त्तानि॒ शरी॑र॒मनु॒ प्रावि॑शन् ॥२४॥
आ॒ला॒पाश्च॑ प्रला॒पाश्चा॑भीला॒प॒लप॑श्च॒ ये ।
शरी॑रं॒ सर्वे॒ प्रावि॑शन्ना॒युज॑ः प्र॒युजो॒ युज॑ः ॥२५॥
प्रा॒णा॒पा॒नौ चक्षु॒ः श्रोत्र॒मक्षि॑तिश्च॒ क्षिति॑श्च॒ या ।
व्या॒नो॒दा॒नौ वाङ्म॒नः शरी॑रेण॒ त ईयन्ते ॥२६॥
आ॒शिष॑श्च प्र॒शिष॑श्च सं॒शिषो॑ वि॒शिष॑श्च॒ याः ।
चि॒त्तानि॒ सर्वे॑ संक॒ल्पाः शरी॑र॒मनु॒ प्रावि॑शन् ॥२७॥

नि॒न्दाः । च॒ । वै । अनि॑न्दाः । च॒ । यत् । च॒ । हन्त॑ । इति॑ । न । इति॑ । च॒ ।
शरी॑रम् । श्र॒द्धा । दक्षि॑णा । अश्र॑द्धा । च॒ । अनु॑ । प्र । अ॒वि॒श॒न् ॥ २२ ॥
वि॒द्याः । च॒ । वै । अवि॑द्याः । च॒ । यत् । च॒ । अ॒न्यत् । उ॒प॒ऽदे॒श्य॑म् ।
शरी॑रम् । ब्रह्म॑ । प्र । अ॒वि॒श॒त् । ऋच॑ः । साम॑ । अथो॒ इति॑ । यजु॑ः ॥ २३ ॥
आ॒ऽन॒न्दाः । मोदा॑ः । प्र॒ऽमुद॑ः । अ॒भि॒मो॒द॒ऽमुद॑ः । च॒ । ये ।
ह॒सः । न॒रिष्टा॑ । नृ॒त्तानि॑ । शरी॑रम् । अनु॑ । प्र । अ॒वि॒श॒न् ॥ २४ ॥
आ॒ऽला॒पाः । च॒ । प्र॒ऽला॒पाः । च॒ । अ॒भि॒ला॒प॒ऽलप॑ः । च॒ । ये ।
शरी॑रम् । सर्वे॑ । प्र । अ॒वि॒श॒न् । आ॒ऽयुज॑ः । प्र॒ऽयुज॑ः । युज॑ः ॥ २५ ॥
प्रा॒णा॒पा॒नौ । चक्षु॑ः । श्रोत्र॑म् । अक्षि॑तिः । च॒ । क्षिति॑ः । च॒ । या ।
व्या॒न॒ऽउ॒दा॒नौ । वाक् । मन॑ः । शरी॑रेण । ते । ई॒य॒न्ते॒ ॥ २६ ॥
आ॒ऽशिष॑ः । च॒ । प्र॒ऽशिष॑ः । च॒ । स॒म्ऽशिष॑ः । वि॒ऽशिष॑ः । च॒ । याः ।
चि॒त्तानि॑ । सर्वे॑ । स॒म्ऽक॒ल्पाः । शरी॑रम् । अनु॑ । प्र । अ॒वि॒श॒न् ॥ २७ ॥

XI.8.22 Both revilings and non-revilings, both what (says) "come on" (hanta) and "no" faith, the sacrificial fee, and non-faith, entered the body afterward.

XI.8.23 Both knowledges and ingorances, and what else is to be taught (upa-diś); the brahman entered the body; the verses, the chant, also the formula.

XI.8.24 Delights, joys, enjoyments, and they that enjoy enjoyments, laughter; sport, dances, entered the body afterward.

XI.8.25 Both appeals (ālāpa) and pratings (pralāpa), and they who utter (lāp) addresses (abhīlāpa) -- all entered the body, joiners-on (āyuj), joiners-forth (prayuj), joiners.

XI.8.26 Breath and expiration, sight, hearing, indestructibleness and destruction, out-breathing and up-breathing, speech, mind -- they go about (īya) with the body.

XI.8.27 Both blessings (āśis) and precepts (praśis), demands (saṃśis) and explanation (viśis), thoughts, all devisings, entered the body afterward.

आस्नेयीश्च वास्तेयीश्च त्वरणाः कृपणाश्च याः ।
गुह्याः शुक्रा स्थूला अपस्ता बीभत्सावसादयन् ॥२८॥
अस्थि कृत्वा समिधं तदष्टापो असादयन् ।
रेतः कृत्वाज्यं देवाः पुरुषमाविशन् ॥२९॥
या आपो याश्च देवता या विराड् ब्रह्मणा सह ।
शरीरं ब्रह्म प्राविशच्छरीरेधि प्रजापतिः ॥३०॥
सूर्यश्चक्षुर्वातः प्राणं पुरुषस्य वि भेजिरे ।
अथास्येतरमात्मानं देवाः प्रायच्छन्नग्नये ॥३१॥
तस्माद्वै विद्वान्पुरुषमिदं ब्रह्मेति मन्यते ।
सर्वा ह्यस्मिन्देवता गावो गोष्ठ इवासते ॥३२॥
प्रथमेन प्रमारेण त्रेधा विष्वङ्वि गच्छति ।
अद एकेन गच्छत्यद एकेन गच्छतीहैकेन नि षेवते ॥३३॥

आस्तेयीः । च । वास्तेयीः । च । त्वरणाः । कृपणाः । च । याः ।
गुह्याः । शुक्राः । स्थूलाः । अपः । ताः । बीभत्सौ । असादयन् ॥ २८ ॥
अस्थि ! कृत्वा । सम्ऽइधम् । तत् । अष्ट । आपः । असादयन् ।
रेतः । कृत्वा । आज्यम् । देवाः । पुरुषम् । आ । अविशन् ॥ २९ ॥
याः । आपः । याः । च । देवताः । या । विऽराट् । ब्रह्मणा । सह ।
शरीरम् । ब्रह्म । प्र । अविशत् । शरीरे । अधि । प्रजाऽपतिः ॥ ३० ॥
सूर्यः । चक्षुः । वातः । प्राणम् । पुरुषस्य । वि । भेजिरे ।
अथ । अस्य । इतरम् । आत्मानम् । देवाः । प्र । अयच्छन् । अग्नये ॥ ३१ ॥
तस्मात् । वै । विद्वान् । पुरुषम् । इदम् । ब्रह्म । इति । मन्यते ।
सर्वाः । हि । अस्मिन् । देवताः । गावः । गोस्थेऽइव । आसते ॥ ३२ ॥
प्रथमेन । प्रऽमारेण । त्रेधा । विष्वङ् । वि । गच्छति ।
अदः । एकेन । गच्छति । अदः । एकेन । गच्छति । इह । एकेन । नि । सेवते ॥ ३३ ॥

XI.8.28 Both those of the blood and those of the bladder, the hasting and those that are pitiable, the secret, the clear, the thick waters -- those they caused to settle in the repugnant one.

XI.8.29 Having made bone (their) fuel, then they caused eight waters to settle; having made seed (their) sacrificial butter, the gods entered man.

XI.8.30 What waters (there are), and what deities, what virāj, with brahman; brahman entered the body; on (adhi) the body (is) Prajāpati.

XI.8.31 The sun, the wind, shared (respectively) the eye, the breath of man; then his other self the gods bestowed (pra-yam) on Agni.

XI.8.32 Therefore, indeed, one who knows man (puruṣa) thinks "this is brahman", for all dieties are seated in him, as cows in a cow-stall.

XI.8.33 By the first dying, it goes apart dividing thereefold: yonder goes it with one (part); yonder goes it with one; here with one it dwells (? ni-sev).

अप्सु स्तीमासु वृद्धासु शरीरमन्तरा हितम् ।
तस्मिञ्छवोऽध्यन्तरा तस्माच्छवोऽध्युच्यते ॥३४॥

अप्ऽसु । स्तीमासु । वृद्धासु । शरीरम् । अन्तरा । हितम् ।
तस्मिन् । शवः । अधि । अन्तरा । तस्मात् । शवः । अधि । उच्यते ॥ ३४ ॥

(९) नवमं सूक्तम्

(१-२६) षड्विंशत्यृचस्यास्य सूक्तस्य काङ्कायन ऋषिः । अर्बुदिर्देवता । (१) प्रथमर्चस्त्र्यवसाना सप्तपदा विराट् शक्वरी, (२, ५-८, १०, १२-१३, १८-२१) द्वितीयायाः पञ्चम्यादिचतसृणां दशमीद्वादशीत्रयोदशीनामष्टादश्यादिचतसृणाश्चानुष्टुप्, (३) तृतीयायाः परोष्णिक्, (४) चतुर्थ्यास्त्र्यवसानोष्णिग्बृहतीगर्भा परात्रिष्टुप् षट्पदातिजगती, (९, ११, १४, २३, २६) नवम्येकादशीचतुर्दशीत्रयोविंशीषड्विंशीनां पथ्यापङ्क्तिः, (१५, २२, २४-२५) पञ्चदशीद्वाविंशीचतुर्विंशीपञ्चविंशीनां त्र्यवसाना सप्तपदा शक्वरी, (१६) षोडश्यास्त्र्यवसाना पञ्चपदा विराडुपरिष्टाज्ज्योतिस्त्रिष्टुप्, (१७) सप्तदश्याश्च त्रिपदा गायत्री छन्दांसि ॥

ये बाहवो या इषवो धन्वनां वीर्याणि च । असीन्परशूनायुधं चित्ताकूतं च यद्धृदि ।
सर्वं तदर्बुदे त्वममित्रेभ्यो दृशे कुरूदारांश्च प्र दर्शय ॥१॥
उत्तिष्ठत सं नह्यध्वं मित्रा देवजना यूयम् । संदृष्टा गुप्ता वः सन्तु या नो मित्राण्यर्बुदे ॥२॥
उत्तिष्ठतमा रभेथामादानसंदानाभ्याम् । अमित्राणां सेना अभि धत्तमर्बुदे ॥३॥
अर्बुदिर्नाम यो देव ईशानश्च न्यर्बुदिः । याभ्यामन्तरिक्षमावृतमियं च पृथिवी मही ।
ताभ्यामिन्द्रमेदिभ्यामहं जितमन्वेमि सेनया ॥४॥

ये । बाहवः । याः । इषवः । धन्वनाम् । वीर्याणि । च । असीन् । परशून् । आयुधम् ।
चित्तऽआकूतम् । च । यत् । हृदि । सर्वम् । तत् । अर्बुदे । त्वम् । अमित्रेभ्यः । दृशे ।
कुरु । उत्ऽआरान् । च । प्र । दर्शय ॥ १ ॥

उत् । तिष्ठत । सम् । नह्यध्वम् । मित्राः । देवऽजनाः । यूयम् ।
सम्ऽदृष्टा । गुप्ता । वः । सन्तु । या । नः । मित्राणि । अर्बुदे ॥ २ ॥

उत् । तिष्ठतम् । आ । रभेथाम् । आदानऽसंदानाभ्याम् ।
अमित्राणाम् । सेनाः । अभि । धत्तम् । अर्बुदे ॥ ३ ॥

अर्बुदिः । नाम । यः । देवः । ईशानः । च । निऽअर्बुदिः । याभ्याम् । अन्तरिक्षम् ।
आऽवृतम् । इयम् । च । पृथिवी । मही । ताभ्याम् । इन्द्रमेदिऽभ्याम् । अहम् । जितम् ।
अनु । एमि । सेनया ॥ ४ ॥

XI.8.34 Within waters that are sluggish (? stīma), old is the body placed; within that is might (? śava, śavas); thence is it called might.

To conquer enemies : to Arbudi.

XI.9.1 What arms (Bāhu) (there are), what arrows, and the powers (vīrya) of bows, swords (asi), axes (paraśu), weapon, and what thought and design in the heart -- all that, O Arbudi, do thou make our enemies to see; and do thou show forth specters (udāra).

XI.9.2 Stand up, equip ye yourselves (sam-nah). O friends, god-folk; beheld, concealed of you be (those) who are our friends, O Arbudi.

XI.9.3 Stand ye (two) up, take ye hold; with tying up, with tying together, gird ye the armies of our enemies, O Arbudi.

XI.9.4 The God that is Arbudi by name, and the lord (īśāna) Nyarbudi, by whom the atmosphere is involved (ā-vṛ), and this great earth -- by those (two) who are allied with Indra, I go after what is conquered with an army.

उत्तिष्ठ त्वं देवजनार्बुदे सेनया सह । भञ्जन्नमित्राणां सेनां भोगेभिः परि वारय ॥५॥
सप्त जातान्न्यर्बुद उदाराणां समीक्षयन् । तेभिष्ट्वमाज्ये हुते सर्वैरुत्तिष्ठ सेनया ॥६॥
प्रतिघ्नानाश्रुमुखी कृधुकर्णी च क्रोशतु । विकेशी पुरुषे हते रदिते अर्बुदे तव ॥७॥
संकर्षन्ती करूकरं मनसा पुत्रमिच्छन्ती । पतिं भ्रातरमात्स्वान्रदिते अर्बुदे तव ॥८॥
अलिक्लवा जाष्कमदा गृध्राः श्येनाः पतत्रिणः ।
ध्वाङ्क्षाः शकुनयस्तृप्यन्त्वमित्रेषु समीक्षयन्रदिते अर्बुदे तव ॥९॥
अथो सर्वं श्वापदं मक्षिका तृप्यतु क्रिमिः । पौरुषेयेऽधि कुणपे रदिते अर्बुदे तव ॥१०॥

उत् । तिष्ठ । त्वम् । देवऽजन । अर्बुदे । सेनया । सह ।
भञ्जन् । अमित्राणाम् । सेनाम् । भोगेभिः । परि । वारय ॥ ५ ॥
सप्त । जातान् । निऽअर्बुदे । उत्ऽआराणाम् । सम्ऽईक्षयन् ।
तेभिः । त्वम् । आज्ये । हुते । सर्वैः । उत् । तिष्ठ । सेनया ॥ ६ ॥
प्रतिऽघ्नाना । अश्रुऽमुखी । कृधुऽकर्णी । च । क्रोशतु ।
विऽकेशी । पुरुषे । हते । रदिते । अर्बुदे । तव ॥ ७ ॥
सम्ऽकर्षन्ती । करूकरम् । मनसा । पुत्रम् । इच्छन्ती ।
पतिम् । भ्रातरम् । आत् । स्वान् । रदिते । अर्बुदे । तव ॥ ८ ॥
अलिक्लवाः । जाष्कमदाः । गृध्राः । श्येनाः । पतत्रिणः ।
ध्वाङ्क्षाः । शकुनयः । तृप्यन्तु । अमित्रेषु । सम्ऽईक्षयन् । रदिते । अर्बुदे । तव ॥ ९ ॥
अथो इति । सर्वम् । श्वापदम् । मक्षिका । तृप्यतु । क्रिमिः ।
पौरुषेये । अधि । कुणपे । रदिते । अर्बुदे । तव ॥ १० ॥

XI.9.5 Stand thou up, O god-folk, Arbudi, with the army; beaking (bhañj) the army of our enemies, envelop it with (thy) coils (Bhoga).

XI.9.6 Presenting to view, O nyarbudi, the seven kinds of specters, with them all do thou stand up, when the butter is offered, with the army.

XI.9.7 Smiting herself, tear-faced, and crop-eared (?), let her yell, with disheveled hair, when the man is slain, bitten (? rad), O Arbudi, of thee.

XI.9.8 Drawing in her Karūkaṛa, seeking with her mind her son, husband, brother, also her people (sva) - in case of thy bite, O Arbudi.

XI.9.9 Let the buzzards, jāṣkamadas, vultures, falcons, winged one, let the crows, the birds (śakuni), satisfy themselves -- exhibiting among the enemies -- in case of thy bite, O Arbudi.

XI.9.10 Then let all wild beasts, let the fly, let the worm satisfy itself upon the carrion of men, bitten O Arbudi, of thee.

आ गृह्णीतं सं बृहतं प्राणापानान्न्यर्बुदे ।
निवाशा घोषाः सं यन्त्वमित्रेषु समीक्षयन्रदिते अर्बुदे तव ॥११॥
उद्वेपय सं विजन्तां भियामित्रान्त्सं सृज । उरुग्राहैर्बाह्वङ्कैर्विध्यामित्रान्न्यर्बुदे ॥१२॥
मुह्यन्त्वेषां बाहवश्चित्ताकूतं च यद्धृदि । मैषामुच्छेषि किं चन रदिते अर्बुदे तव ॥१३॥
प्रतिघ्नानाः सं धावन्तूरः पटौरावाघ्नानाः ।
अघारिणीर्विकेश्यो रुदत्यः पुरुषे हते रदिते अर्बुदे तव ॥१४॥
श्वन्वतीरप्सरसो रूपका उतार्बुदे ।
अन्तःपात्रे रेरिहतीं रिशां दुर्णिहितैषिणीम् ।
सर्वास्ता अर्बुदे त्वममित्रेभ्यो दृशे कुरूदारांश्च प्र दर्शय ॥१५॥
खडूरेऽधिचङ्क्रमां खर्विकां खर्ववासिनीम् ।
य उदारा अन्तर्हिता गन्धर्वाप्सरसश्च ये । सर्पा इतरजना रक्षांसि ॥१६॥

आ । गृह्णीतम् । सम् । बृहतम् । प्राणापानान् । निऽअर्बुदे ।
निऽवाशाः । घोषाः । सम् । यन्तु । अमित्रेषु । सम्ऽईक्षयन् । रदिते । अर्बुदे । तव ॥ ११ ॥
उत् । वेपय । सम् । विजन्ताम् । भिया । अमित्रान् । सम् । सृज ।
उरुऽग्राहैः । बाहुऽअङ्कैः । विध्य । अमित्रान् । निऽअर्बुदे ॥ १२ ॥
मुह्यन्तु । एषाम् । बाहवः । चित्तऽआकूतम् । च । यत् । हृदि ।
मा । एषाम् । उत् । शेषि । किम् । चन । रदिते । अर्बुदे । तव ॥ १३ ॥
प्रतिऽघ्नानाः । सम् । धावन्तु । उरः । पटौरौ । आऽघ्नानाः ।
अघारिणीः । विऽकेश्यः । रुदत्यः । पुरुषे । हते । रदिते । अर्बुदे । तव ॥ १४ ॥
श्वन्ऽवतीः । अप्सरसः । रूपकाः । उत । अर्बुदे । अन्तःऽपात्रे । रेरिहतीम् । रिशाम् ।
दुर्निहितऽएषिणीम् । सर्वाः । ताः । अर्बुदे । त्वम् । अमित्रेभ्यः । दृशे । कुरु । उत्ऽआ-
रान् । च । प्र । दर्शय ॥ १५ ॥
खडूरे । अधिऽचङ्क्रमाम् । खर्विकाम् । खर्वऽवासिनीम् ।
ये । उत्ऽआराः । अन्तःऽहिताः । गन्धर्वऽअप्सरसः । च । ये । सर्पाः । इतरऽजनाः । रक्षांसि ॥

XI.9.11 Take ye (two) hold, tear out (sam-bṛh) (their) breath and expiration, O Nyarbudi; let groaning (? nivaśa) noises assemble -- exhibiting among the enemies -- in case of thy bite, O Arbudi.

XI.9.12 Make thou (them) tremble; let them quake together unite our enemies with fear; with broad-gripping arm-hooks pierce thou our enemies, O Nyarbudi.

XI.9.13 Let their arms be confounded, and what thought and design is in their heart; let not anything of them be left; in case of thy bite, O Arbudi.

XI.9.14 Smiting themselves let them (f.) run together, smiting on the breast, the thighs (? paṭāura), not anointing, with disheveled hair, wailing when the man is slain, bitten, O Arbudi, of thee.

XI.9.15 Dog-accompanied Apsarases, she-jackals (? rūpaka) also, O Arbudi, the riśa, licking much in the inner veseel, seeing what is ill-deposited -- all these (f.), O Arbudi, do thou make our enemies to see.

XI.9.16 Her that strides upon the khaḍūra, mutilated, wearing what is mutilated (?), the specters that are concealed , and what Gandharvas and Apsarases (there are), serpents, other-folk, demons.

चतुर्दंष्ट्राञ्छ्यावदतः कुम्भमुष्काँ असृङ्मुखान्। स्वभ्यसा ये चोद्भ्यसाः ॥१७॥
उद्वेपय त्वमर्बुदेमित्राणाममूः सिचः। जयाँश्च जिष्णुश्चामित्राँ जयतामिन्द्रमेदिनौ ॥१८॥

प्रब्लीनो मृदितः शयां हतो३मित्रो न्यर्बुदे।
अग्निजिह्वा धूमशिखा जयन्तीर्यन्तु सेनया ॥१९॥
तयार्बुदे प्रणुत्तानामिन्द्रो हन्तु वरंवरम्।
अमित्राणां शचीपतिर्मामीषां मोचि कश्चन ॥२०॥
उत्कसन्तु हृदयान्यूर्ध्वः प्राण उदीषतु।
शौष्कास्यमनु वर्ततामम् अमित्रान्मोत मित्रिणः ॥२१॥
ये च धीरा ये चाधीराः पराञ्चो बधिराश्च ये।
तमसा ये च तूपरा अथो बस्ताभिवासिनः।
सर्वांस्ताँ अर्बुदे त्वममित्रेभ्यो दृशे कुरूदारांश्च प्रदर्शय ॥२२॥

चतुःऽदंष्ट्रान्। श्यावऽदतः। कुम्भऽमुष्कान्। असृक्ऽमुखान्।
स्वऽभ्यसाः। ये। च। उत्ऽभ्यसाः ॥ १७ ॥

उत्। वेपय। त्वम्। अर्बुदे। अमित्राणाम्। अमूः। सिचः।
जयन्। च। जिष्णुः। च। अमित्रान्। जयताम्। इन्द्रऽमेदिनौ ॥ १८ ॥

प्रऽब्लीनः। मृदितः। शयाम्। हतः। अमित्रः। निऽअर्बुदे।
अग्निऽजिह्वाः। धुमऽशिखाः। जयन्तीः। यन्तु। सेनया ॥ १९ ॥

तया। अर्बुदे। प्रऽनुत्तानाम्। इन्द्रः। हन्तु। वरम्ऽवरम्।
अमित्राणाम्। शचीऽपतिः। मा। अमीषाम्। मोचि। कः। चन ॥ २० ॥

उत्। कसन्तु। हृदयानि। ऊर्ध्वः। प्राणः। उत्। ईषतु।
शौष्कऽआस्यम्। अनु। वर्तताम्। अमित्रान्। मा। उत। मित्रिणः ॥ २१ ॥

ये। च। धीराः। ये। च। अधीराः। पराञ्चः। बधिराः। च। ये। तमसाः। ये। च।
तूपराः। अथो इति। बस्तऽअभिवासिनः। सर्वान्। तान्। अर्बुदे। त्वम्। अमित्रेभ्यः।
दृशे। कुरु। उत्ऽआरान्। च। प्र। दर्शय ॥ २२ ॥

XI.9.17 The four-tusked ones, the black-toothed, the pot-testicled, the blood-faced; they that are self-frighting and frighting.

XI.9.18 Do thou, O Arbudi, make to tremble yonder lines (sic) of our enemies; let both the conquering one and the conqueror, allied with Indra, conquer our enemies.

XI.9.19 Let our enemy lie squelched, crushed, slain, O Nyarbudi; let tongues of fire, tufts of smoke, go conquering with the army.

XI.9.20 Of our enemies, pushed forth by it, O Arbudi, let Indra, lord of might (śacīpati), slay each best man (vara); let no one soever of them be freed.

XI.9.21 Let thier hearts burst open (ut-kas), their breath pass up aloft; let dryness of mouth follow after our enemies (and) not those who are friendly.

XI.9.22 Both they who are wise (dhīra) and they who are unwise, those going away and they who are deaf, they of darkness and they who are hornless (tūpara) likewise those that smell of (?) the goat--all those (m.), O Arbudi; do thou make our enemies to see, and do thou show forth specters.

अर्बुदिश्च त्रिषन्धिश्चामित्रान्नो वि विध्यताम् ।
यथैषामिन्द्र वृत्रहन्हनाम शचीपतेमित्राणां सहस्रशः ॥२३॥
वनस्पतीन्वानस्पत्यानोषधीरुत वीरुधः ।
गन्धर्वाप्सरसः सर्पान्देवान्पुण्यजनान्पितॄन् ।
सर्वांस्तौं अर्बुदे त्वममित्रेभ्यो दृशे कुरूदारांश्च प्र दर्शय ॥२४॥
ईशां वो मरुतो देव आदित्यो ब्रह्मणस्पतिः ।
ईशां व इन्द्रश्चाग्निश्च धाता मित्रः प्रजापतिः ।
ईशां व ऋषयश्चक्रुरमित्रेषु समीक्षयन्रदिते अर्बुदे तव ॥२५॥
तेषां सर्वेषामीशाना उत्तिष्ठत सं नह्यध्वं मित्रा देवजना यूयम् ।
इमं संग्रामं संजित्य यथालोकं वि तिष्ठध्वम् ॥२६॥

अर्बुदिः । च । त्रिऽसंधिः । च । अमित्रान् । नः । वि । विध्यताम् ।
यथा । एषाम् । इन्द्र । वृत्रऽहन् । हनाम । शचीऽपते । अमित्राणाम् । सहस्रऽशः ॥२३॥
वनस्पतीन् । वानस्पत्यान् । ओषधीः । उत । वीरुधः । गन्धर्वऽअप्सरसः । सर्पान् । देवान् ।
पुण्यऽजनान् । पितॄन् । सर्वान् । तान् । अर्बुदे । त्वम् । अमित्रेभ्यः । दृशे । कुरु । उत्ऽआरान् ।
च । प्र । दर्शय ॥ २४ ॥

ईशाम् । वः । मरुतः । देवः । आदित्यः । ब्रह्मणः । पतिः । ईशाम् । वः । इन्द्रः । च ।
अग्निः । च । धाता । मित्रः । प्रजाऽपतिः । ईशाम् । वः । ऋषयः । चक्रुः । अमित्रेषु ।
सम्ऽईक्षयन् । रदिते । अर्बुदे । तव ॥ २५ ॥

तेषाम् । सर्वेषाम् । ईशानाः । उत् । तिष्ठत । सम् । नह्यध्वम् । मित्राः । देवऽजनाः ।
यूयम् । इमम् । सम्ऽग्रामम् । सम्ऽजित्य । यथाऽलोकम् । वि । तिष्ठध्वम् ॥ २६ ॥

XI.9.23 Let both Arbudi and Triṣandhi pierce through our enemies, in order that, O Indra, Vṛitra-slayer, lord of might, we may slay of them, of our enemies, by thousands.

XI.9.24 The forest-trees, them of the forest-trees, herbs and plants, gandharvas and apsarases, serpents, gods, pure-folk (puṇyajana), Fathers -- all those, O Arbudi, do thou make our enemies to see, and do thou show forth specters.

XI.9.25 Mastery over you have the Maruts (gained), the heavenly Āditya, Brahmaṇaspati; mastery over you have both Indra and Agni, Dhatar, Mitra, Prajāpati; mastery over you have the seers gained (kṛ) -- exhibiting among the enemies -- in case of thy bite, O Arbudi.

XI.9.26 Masters (Iśāna) of them all, stand ye up, equip yourselves, ye friends, god-folks; having wholly conquered in this conflict, scatter ye to your several worlds.

(१०) दशमं सूक्तम्

(१-२७) सप्तविंशत्यृचस्यास्य सूक्तस्य भृग्वङ्गिरा ऋषिः । त्रिषन्धिर्देवता । (१) प्रथमर्चो विराट्पथ्याबृहती, (२) द्वितीयायास्त्र्यवसाना षट्पदा त्रिष्टुब्गर्भातिजगती, (३) तृतीयाया विराडास्तारपङ्क्तिः, (४) चतुर्थ्या विराडनुष्टुप्, (५-७, १०-११, १४-१५, १८-२०, २३-२४, २७) पञ्चम्यादितृचस्य दशम्येकादशीचतुर्दशीपञ्चदशीनामष्टादश्यादितृचस्य त्रयोविंशीचतुर्विंशीसप्तविंशीनाञ्चानुष्टुप्, (८) अष्टम्या विराट्त्रिष्टुप्, (९) नवम्याः पुरोविराट् पुरस्ताज्ज्योतिस्त्रिष्टुप्, (१२) द्वादश्याः पञ्चपदा पथ्यापङ्क्तिः, (१३) त्रयोदश्याः षट्पदा जगती, (१६) षोडश्यास्त्र्यवसाना षट्पदा ककुम्मत्यनुष्टुप्त्रिष्टुब्गर्भा शक्वरी, (१७) सप्तदश्याः पथ्यापङ्क्तिः, (२१) एकविंश्यास्त्रिपदा गायत्री, (२२) द्वाविंश्या विराट् पुरस्ताद्बृहती, (२५) पञ्चविंश्याः ककुप्, (२६) षड्विंश्याश्च प्रस्तारपङ्क्तिश्छन्दांसि ॥

उत्तिष्ठत सं नह्यध्वमुदाराः केतुभिः सह ।
सर्पा इतरजना रक्षांस्यमित्राननु धावत ॥१॥

ईशां वो वेद राज्यं त्रिषन्धे अरुणैः केतुभिः सह ।
ये अन्तरिक्षे ये दिवि पृथिव्यां ये च मानवाः ।
त्रिषन्धेस्ते चेतसि दुर्णामान उपासताम् ॥२॥

अयोमुखाः सूचीमुखा अथो विकङ्कतीमुखाः ।
क्रव्यादो वातरंहस आ सजन्त्वमित्रान्वज्रेण त्रिषन्धिना ॥३॥

अन्तर्धेहि जातवेद आदित्य कुणपं बहु ।
त्रिषन्धेरियं सेना सुहितास्तु मे वशे ॥४॥

उत् । तिष्ठत । सम् । नह्यध्वम् । उत्ऽआराः । केतुऽभिः । सह ।
सर्पाः । इतरऽजनाः । रक्षांसि । अमित्रान् । अनु । धावत ॥ १ ॥

ईशाम् । वः । वेद । राज्यम् । त्रिऽसंन्धे । अरुणैः । केतुऽभिः । सह । ये । अन्तरिक्षे ।
ये । दिवि । पृथिव्याम् । ये । च । मानवाः । त्रिऽसंधेः । ते । चेतसि । दुःऽनामानः ।
उप । आसताम् ॥ २ ॥

अयःऽमुखाः । सूचीऽमुखाः अथो इति । विकङ्कतीऽमुखाः । क्रव्यऽअदः । वातऽरंहसः ।
आ । सजन्तु । अमित्रान् । वज्रेण । त्रिऽसंधिना ॥ ३ ॥

अन्तः । धेहि । जातऽवेदः । आदित्य । कुणपम् । बहु ।
त्रिऽसंधेः । इयम् । सेना । सुऽहिता । अस्तु । मे । वशे ॥ ४ ॥

To conquer enemies : to Triṣandhi.

XI.10.1 Stand ye up, equip yourselves, ye specters, together with ensigns; ye serpents, other folks, demons, run after our enemies.

XI.10.2 Your mastery I know, (your) kingdom, O Triṣandhi, together with red ensigns; what in the atmosphere, what in the sky, and what men (mānava) (are) on the earth, let those ill-named ones sit (? upa-ās) in the mind (ceta) of Triṣandhi.

XI.10.3 Iron (ayas) mouthed, needle-mouthed, likewise thorn-tree (vikankaṭ) mouthed, let the flesh-eaters, of wind-swiftness, fasten on our enemies with the three-jointed (triṣandhi) thunderbolt.

XI.10.4 O Jātavedas, Āditya, put thou between much human flesh; let this army of Triṣandhi be well-placed in my control.

उत्तिष्ठ त्वं देवजनार्बुदे सेनया सह ।
अयं बलिर्व आहुतस्त्रिषन्धेराहुतिः प्रिया ॥५॥
शितिपदी सं द्यतु शरव्ये३यं चतुष्पदी ।
कृत्येमित्रेभ्यो भव त्रिषन्धेः सह सेनया ॥६॥
धूमाक्षी सं पततु कृधुकर्णी च क्रोशतु ।
त्रिषन्धेः सेनया जिते अरुणाः सन्तु केतवः ॥७॥
अवायन्तां पक्षिणो ये वयांस्यन्तरिक्षे दिवि ये चरन्ति ।
श्वापदो मक्षिकाः सं रभन्तामामादो गृध्राः कुणपे रदन्ताम् ॥८॥
यामिन्द्रेण संधां समधत्था ब्रह्मणा च बृहस्पते ।
तयाहमिन्द्रसंधया सर्वान्देवानिह हुव इतो जयत मामुतः ॥९॥
बृहस्पतिराङ्गिरस ऋषयो ब्रह्मसंशिताः ।
असुरक्षयणं वधं त्रिषंधिं दिव्याश्रयन् ॥१०॥

उत् । तिष्ठ । त्वम् । देवऽजन । अर्बुदे । सेनया । सह ।
अयम् । बलिः । वः । आऽहुतः । त्रिऽसंधेः । आऽहुतिः । प्रिया ॥ ५ ॥
शितिऽपदी । सम् । द्यतु । शरव्या । इयम् । चतुःऽपदी ।
कृत्ये । अमित्रेभ्यः । भव । त्रिऽसंधेः । सह । सेनया ॥ ६ ॥
धूमऽअक्षी । सम् । पततु । कृधुऽकर्णी । च । क्रोशतु ।
त्रिऽसंधेः । सेनया । जिते । अरुणाः । सन्तु । केतवः ॥ ७ ॥
अव । अयन्ताम् । पक्षिणः । ये । वयांसि । अन्तरिक्षे । दिवि । ये । चरन्ति ।
श्वापदः । मक्षिकाः । सम् । रभन्ताम् । आमऽअदः । गृध्राः । कुणपे । रदन्ताम ॥ ८ ॥
याम् । इन्द्रेण । सम्ऽधाम् । सम्ऽअधत्थाः । ब्रह्मणा । च । बृहस्पते ।
तया । अहम् । इन्द्रऽसंधया । सर्वान् । देवान् । इह । हुवे । इतः । जयत । मा । अमुतः ॥९॥
बृहस्पतिः । आङ्गिरसः । ऋषयः । ब्रह्मऽसंशिताः ।
असुरऽक्षयणम् । वधम् । त्रिऽसंधिम् । दिवि । आ । अश्रयन् ॥ १० ॥

XI.10.5 Stand thou up, O god-folk, O Arbudi, with the army; this tribute is offered (ā-hu) to you (pl.); the offering (is) dear to Triṣandhi.

XI.10.6 Let the white-footed one tie together, this shaft (śaravya), four footed; O witchcraft, be thou for our enemies, together with the army of Triṣandhi.

XI.10.7 Let the smoke-eyed (f.) one fall together, and the crop-eared one(f.) yell; it being conquered by the army of Triṣandhi, let the ensigns be red.

XI.10.8 Let the winged ones descend, the birds, they that go about in the atmosphere, in the sky; let the wild beasts, the flies, take hold together; let the raw-flesh-eating vultures scratch at the human carrion.

XI.10.9 The agreement (samdhā) which thou hast agreed on with Indra and with the brahman, O Bṛhaspati, by that Indra-agreement do I call hither all the gods; conquer ye on this side, not on that.

XI.10.10 Bṛhaspati of the Añgiras race, the seers sharpened by the brahman, set up (ā-śri) in the sky the Asura-destroying weapon, Triṣandhi.

येनासौ गुप्त आदित्य उभाविन्द्रश्च तिष्ठतः ।
त्रिषन्धिं देवा अभजन्तौजसे च बलाय च ॥११॥

सर्वाँल्लोकान्त्समजयन्देवा आहुत्यानया ।
बृहस्पतिराङ्गिरसो वज्रं यमसिञ्चतासुरक्षयणं वधम् ॥१२॥

बृहस्पतिराङ्गिरसो वज्रं यमसिञ्चतासुरक्षयणं वधम् ।
तेनाहममूं सेनां नि लिम्पामि बृहस्पतेमित्रान्हन्म्योजसा ॥१३॥

सर्वे देवा अत्यायन्ति ये अश्नन्ति वषट्कृतम् ।
इमां जुषध्वमाहुतिमितो जयत मामुतः ॥१४॥

सर्वे देवा अत्यायन्तु त्रिषन्धेराहुतिः प्रिया ।
संधां महतीं रक्षत ययाग्रे असुरा जिताः ॥१५॥

वायुरमित्राणामिष्वग्राण्याञ्चतु । इन्द्र एषां बाहून्प्रति भनक्तु मा शकन्प्रतिधामिषुम् ।
आदित्य एषामस्त्रं वि नाशयतु चन्द्रमा युतामगतस्य पन्थाम् ॥१६॥

येन । असौ । गुप्तः । आदित्यः । उभौ । इन्द्रः । च । तिष्ठतः ।
त्रिऽसंधिम् । देवाः । अभजन्त । ओजसे । च । बलाय । च ॥ ११ ॥

सर्वान् । लोकान् । सम् । अजयन् । देवाः । आऽहुत्या । अनया ।
बृहस्पतिः । आङ्गिरसः । वज्रम् । यम् । असिञ्चत । असुरऽक्षयणम् । वधम् ॥ १२ ॥

बृहस्पतिः । आङ्गिरसः । वज्रम् । यम । असिञ्चत । असुरऽक्षयणम् । वधम् । तेन ।
अहम् । अमूम् । सेनाम् । नि । लिम्पामि । बृहस्पते । अमित्रान् । हन्मि । ओजसा ॥१३॥

सर्वे । देवाः । अतिऽआयन्ति । ये । अश्नन्ति । वषट्ऽकृतम् ।
इमाम् । जुषध्वम् । आऽहुतिम् । इतः । जयत । मा । अमुतः ॥ १४ ॥

सर्वे । देवाः । अतिऽआयन्तु । त्रिऽसंधेः । आऽहुतिः । प्रिया ।
सम्ऽधाम् । महतीम् । रक्षत । यया । अग्रे । असुराः । जिताः ॥ १५ ॥

वायुः । अमित्राणाम् । इषुऽअग्राणि । आ । अञ्चतु ।
इन्द्रः । एषाम् । बाहून् । प्रति । भनक्तु । मा । शकन् । प्रतिऽधाम् । इषुम् ।
आदित्यः । एषाम् । अस्त्रम् । वि । नाशयतु । चन्द्रमाः । युताम् । अगतस्य । पन्थाम् ॥१६॥

XI.10.11 By whom yonder sun, and Indra, both stand protected Triṣandhi - the gods shared, in order to both force and strength.

XI.10.12 All worlds did the gods completely conquer by means of that offering (āhuti) -- the thunderbolt which Bṛhaspati of the Añgiras race poured, an Asura-destroying weapon.

XI.10.13 The thounderbolt which Bṛhaspati of the Añgiras race poured, an Asura-destroying weapon -- therewith do I blot out (ni-lip) yon army, O Bṛhaspati; I slay the enemies with force.

XI.10.14 All the gods come over hither, who partake of (the offering) made with vaṣat; enjoy ye this offering; conquer ye on this side, not on that.

XI.10.15 Let all the gods come over hither; the offering (is) dear to Triṣandhi; defend ye the great agreement by which in the beginning the Asuras were conquered.

XI.10.16 Let Vāyu bend up the arrow-points of the enemies; let Indra break back their arms; let them not be able to set the arrow; let Āditya make thier missile weapon astra disappear; let the moon put (yu) them on the track of what is not gone.

यदि प्रेयुर्देवपुरा ब्रह्म वर्माणि चक्रिरे ।
तनूपानं परिपाणं कृण्वाना यदुपोचिरे सर्वं तदरसं कृधि ॥१७॥

क्रव्यादानुवर्तयन्मृत्युना च पुरोहितम् ।
त्रिषन्धे प्रेहि सेनया जयामित्रान्प्र पद्यस्व ॥१८॥

त्रिषन्धे तमसा त्वममित्रान्परि वारय ।
पृषदाज्यप्रणुत्तानां मामीषां मोचि कश्चन ॥१९॥

शितिपदी सं पतत्वमित्राणाममूः सिचः ।
मुह्यन्त्वद्यामूः सेना अमित्राणां न्यर्बुदे ॥२०॥

मूढा अमित्रा न्यर्बुदे जह्येषां वरंवरम् ।
अनया जहि सेनया ॥२१॥

यश्च कवची यश्चाकवचोऽमित्रो यश्चाज्मनि ।
ज्यापाशैः कवचपाशैरज्मनाभिहतः शयाम् ॥२२॥

यदि । प्रऽईयुः । देवऽपुराः । ब्रह्म । वर्माणि । चक्रिरे ।
तनूऽपानम् । परिऽपानम् । कृण्वानाः । यत् । उपऽऊचिरे । सर्वम् । तत् । अरसम् । कृधि ॥
क्रव्यऽअदा । अनुऽवर्तयन् । मृत्युना । च । पुरःऽहितम् ।
त्रिऽसंधे । प्र । इहि । सेनया । जय । अमित्रान् । प्र । पद्यस्व ॥ १८ ॥
त्रिऽसंधे । तमसा । त्वम् । अमित्रान् । परि । वारय ।
पृषदाज्यऽप्रनुत्तानाम् । मा । अमीषाम् । मोचि । कः । चन ॥ १९ ॥
शितिऽपदी । सम । पततु । अमित्राणाम् । अमूः । सिचः[1] ।
मुह्यन्तु । अद्य । अमूः । सेनाः । अमित्राणाम् । निऽअर्बुदे ॥ २० ॥
मूढाः । अमित्राः । निऽअर्बुदे । जहि । एषाम् । वरम्ऽवरम् । अनया । जहि । सेनया ॥
यः । च । कवची । यः । च । अकवचः । अमित्रः । यः । च । अज्मनि ।
ज्याऽपाशैः । कवचऽपाशैः । अज्मना । अभिऽहतः । शयाम् ॥ २२ ॥

XI.10.17 If they have gone forward to the god's strongholds, have made the brahman their defenses; if (? yat) they have encouraged (? upa-vac) themselves, making a body-protection, a complete protection – all that do thou make sapless.

XI.10.18 Causing to follow the purohita with the flesh-eating (fire) and with death, O Triṣandhi, go forth with the army; conquer the enemies; go forward.

XI.10.19 O Triṣandhi, do thou envelop our enemies with darkness; of them yonder, thrust forth by the speckled butter, let none soever be freed.

XI.10.20 Let the white-footed one (f.) fall upon (? sam-pat) yonder armies of our enemies be confounded today, O Nyarbudi.

XI.10.21 Confounded (be) our enemies, O Nyarbudi; slay thou of them each best man (vara); slay (them) with this army.

XI.10.22 Whoever is mailed, and who without mail, and what enemy is in march (? ajman); by bowstring-fetters, by mail-fetters, smitten by the march let him lie.

ये वर्मिणो येऽवर्माणो अमित्रा ये च वर्मिणः ।
सर्वांस्ताँ अर्बुदे हताञ्छ्वानोऽदन्तु भूम्याम् ॥२३॥
ये रथिनो ये अरथा असादा ये च सादिनः ।
सर्वानदन्तु तान्हतान्गृध्राः श्येनाः पतत्रिणः ॥२४॥
सहस्रकुणपा शेतामामित्री सेना समरे वधानाम् । विविद्धा ककजाकृता ॥२५॥
मर्माविधं रोरुवतं सुपर्णैरदन्तु दुश्चितं मृदितं शयानम् ।
य इमां प्रतीचीमाहुतिममित्रो नो युयुत्सति ॥२६॥
यां देवा अनुतिष्ठन्ति यस्या नास्ति विराधनम् ।
तयेन्द्रो हन्तु वृत्रहा वज्रेण त्रिषन्धिना ॥२७॥

ये । वर्मिणः । ये । अवर्माणः । अमित्राः । ये । च । वर्मिणः ।
सर्वान् । तान् । अर्बुदे । हतान् । श्वानः । अदन्तु । भूम्याम् ॥ २३ ॥
ये । रथिनः । ये । अरथाः । असादाः । ये । च । सादिनः ।
सर्वान् । अदन्तु । तान् । हतान् । गृध्राः । श्येनाः । पतत्रिणः ॥ २४ ॥
सहस्रऽकुणपा । शेताम् । आमित्री । सेना । समऽअरे । वधानाम् । विऽविद्धा । ककजाऽकृता ॥२५॥
मर्माविधम् । रोरुवतम् । सुऽपर्णैः । अदन्तु । दुःऽचितम् । मृदितम् । शयानम् ।
यः । इमाम् । प्रतीचीम् । आऽहुतिम् । अमित्रः । नः । युयुत्सति ॥ २६ ॥
याम् । देवाः । अनुऽतिष्ठन्ति । यस्याः । न । अस्ति । विऽराधनम् ।
तया । इन्द्रः । हन्तु । वृत्रऽहा । वज्रेण । त्रिऽसंधिना ॥ २७ ॥

॥ इत्येकादशं काण्डम् ॥

[एकादशकाण्डे सूक्तानि १०, ऋचः ३१३]

XI.10.23 Who have defenses, who have no defenses, and the enemies who have defenses – all those, O Arbudi, being slain, let dogs eat on the ground.

XI.10.24 Who have chariots, who have no chariots, those without seats and they who have seats (sāda) – all those, being slain, let vultures, falcons, birds (patatrin) eat.

XI.10.25 Let the army of our enemies lie with thousand corpses (kuṇapa) in the conflict of weapons, pierced through, cut to pieces(?).

XI.10.26 Let the eagles (suparṇā) eat him, pierced to the vitals, crying, loudly, lying crushed, the evil-minded one – what enemy of ours whishes to fight against this opposing offering.

XI.10.27 (The offeirng) which the gods follow (anu-sthā), of which there is no failure -- with that let Indra, Vṛitra-slayer, slay, with the three-jointed thunderbolt.

Here ends Kaṇḍa XI,
Hymns 10, Verses 313

Kāṇḍa - XII

द्वादशं काण्डम्

अथ द्वादशं काण्डम् ॥

(१) प्रथमं सूक्तम्

(१-६३) त्रिषष्टयृचस्यास्य सूक्तस्याथर्वा ऋषिः । भूमिर्देवता । (१, ३, १७, २९, ३१, ५५, ६०) प्रथमातृतीयासप्तदश्ये-कोनत्रिंश्येकत्रिंशीपञ्चपञ्चाशीषष्टीनामृचां त्रिष्टुप्, (२) द्वितीयाया भुरिक्त्रिष्टुप्, (४-६, १०, ३८) चतुर्थ्यादितृचस्य दशम्यष्टात्रिंश्योश्च त्र्यवसाना षट्पदा जगती, (७) सप्तम्याः प्रस्तारपङ्क्तिः, (८, ११) अष्टम्येकादश्योस्त्र्यवसाना षट्पदा विराडष्टिः, (९) नवम्याः परानुष्टुप्त्रिष्टुप्, (१२-१३, ३७) द्वादशीत्रयोदशीसप्तत्रिंशीनां त्र्यवसाना पञ्चपदा शक्वरी, (१४) चतुर्दश्या महाबृहती, (१५) पञ्चदश्याः पञ्चपदा शक्वरी, (१६, २१) षोडश्येकविंश्योरेकावसाना साम्नी त्रिष्टुप्, (१८) अष्टादश्यास्त्र्यवसाना षट्पदा त्रिष्टुबनुष्टुब्गर्भातिशक्वरी, (१९) एकोनविंश्या उरोबृहती, (२०) विंश्या विराडुरोबृहती, (२२) द्वाविंश्यास्त्र्यवसाना षट्पदा विराडतिजगती, (२३) त्रयोविंश्याः पञ्चपदा विराडतिजगती, (२४) चतुर्विंश्याः पञ्चपदानुष्टुब्गर्भा जगती, (२५) पञ्चविंश्यास्त्र्यवसाना सप्तपदोष्णिगनुष्टुब्गर्भा शक्वरी, (२६-२८, ३३, ३५, ३९-४०, ५०, ५४, ५६, ५९, ६३) षड्विंश्यादितृचस्य त्रयस्त्रिंशीपञ्चत्रिंश्ये-कोनचत्वारिंशीचत्वारिंशीपञ्चाशीचतुष्पञ्चाशीषट्पञ्चाश्येकोनषष्टीत्रिषष्टीनाञ्चानुष्टुप्, (३०) त्रिंश्या विराड्गायत्री, (३२) द्वात्रिंश्याः पुरस्ताज्ज्योतिस्त्रिष्टुप्, (३४) चतुस्त्रिंश्यास्त्र्यवसाना षट्पदा त्रिष्टुब्बृहती-गर्भातिजगती, (३६) षट्त्रिंश्या विपरीतपादलक्ष्मा पङ्क्तिः, (४१) एकचत्वारिंश्यास्त्र्यवसाना षट्पदा ककुम्मती शक्वरी, (४२) द्विचत्वारिंश्याः स्वराडनुष्टुप्, (४३) त्रिचत्वारिंश्या विराडास्तारपङ्क्तिः, (४४-४५, ४९) चतुश्चत्वारिंशीपञ्चचत्वारिंश्येकोनपञ्चाशीनां जगती, (४६) षट्चत्वारिंश्याः षट्पदा-नुष्टुब्गर्भा पराशक्वरी, (४७) सप्तचत्वारिंश्याः षट्पदोष्णिगनुष्टुब्गर्भा परातिशक्वरी, (४८) अष्ट-चत्वारिंश्याः पुरोऽनुष्टुप्त्रिष्टुप्, (५१) एकपञ्चाश्यास्त्र्यवसाना षट्पदानुष्टुब्गर्भा ककुम्मती शक्वरी, (५२) द्विपञ्चाश्याः पञ्चपदानुष्टुब्गर्भा परातिजगती, (५३) त्रिपञ्चाश्याः पुरोबार्हतानुष्टुप्, (५७) सप्तपञ्चाश्याः पुरोऽतिजागता जगती, (५८) अष्टपञ्चाश्याः पुरस्ताद्बृहती, (६१) एकषष्ट्याः पुरोबार्हता त्रिष्टुप्, (६२) द्विषष्ट्याश्च पराविराड्त्रिष्टुप् छन्दांसि ॥

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति ।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ॥१॥
असंबाधं मध्यतो मानवानां यस्या उद्वतः प्रवतः समं बहु ।
नानावीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः ॥२॥

सत्यम् । बृहत् । ऋतम् । उग्रम् । दीक्षा । तपः । ब्रह्म । यज्ञः । पृथिवीम् । धारयन्ति ।
सा । नः । भूतस्य । भव्यस्य । पत्नी । उरुम् । लोकम् । पृथिवी । नः । कृणोतु ॥ १ ॥
असम्ऽबाधम् । मध्यतः । मानवानाम् । यस्याः । उत्ऽवतः । प्रऽवतः । समम् । बहु ।
नानाऽवीर्याः । ओषधीः । या । बिभर्ति । पृथिवी । नः । प्रथताम् । राध्यताम् । नः ॥ २ ॥

Bhūmi : Earth

XII.1.1 Great (bṛhant) truth, formidable right, consecration, penance, brahman, and sacrifice sustain the earth; let her for us, mistress of what is and what is to be -- let the earth make for us wide room (loka).

XII.1.2 Unoppressedness in the midst of men (mānava); whose are the ascents (udvat), the advances (pravat), the much plain (sama); who bears the herbs of various virtue (nānāvīrya) – let the earth be spread out for us, be prosperous for us.

यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टयः संबभूवुः ।
यस्यामिदं जिन्वति प्राणदेजत्सा नो भूमिः पूर्वपेये दधातु ॥३॥
यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः ।
या बिभर्ति बहुधा प्राणदेजत्सा नो भूमिर्गोष्वप्यन्ने दधातु ॥४॥
यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन् ।
गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु ॥५॥
विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी ।
वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु ॥६॥
यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम् ।
सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा ॥७॥
यार्णवेधि सलिलमग्र आसीद्यां मायाभिरन्वचरन्मनीषिणः ।
यस्या हृदयं परमे व्योमन्त्सत्येनावृतममृतं पृथिव्याः ।
सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे ॥८॥

यस्याम् । समुद्रः । उत । सिन्धुः । आपः । यस्याम् । अन्नम् । कृष्टयः । सम्ऽबभूवुः ।
यस्याम् । इदम् । जिन्वति । प्राणत् । एजत् । सा । नः । भूमिः । पूर्वऽपेये । दधातु ॥ ३ ॥
यस्याः । चतस्रः । प्रऽदिशः । पृथिव्याः । यस्याम् । अन्नम् । कृष्टयः । सम्ऽबभूवुः ।
या । बिभर्ति । बहुऽधा । प्राणत् । एजत् । सा । नः । भूमिः । गोषु । अपि । अन्ने । दधातु ॥
यस्याम् । पूर्वे । पूर्वऽजनाः । विऽचक्रिरे । यस्याम् । देवाः । असुरान् । अभिऽअवर्तयन् ।
गवाम् । अश्वानाम् । वयसः । च । विऽस्था । भगम् । वर्चः । पृथिवी । नः । दधातु ॥५॥
विश्वम्ऽभरा । वसुऽधानी । प्रतिऽस्था । हिरण्यऽवक्षाः । जगतः । निऽवेशनी ।
वैश्वानरम् । बिभ्रती । भूमिः । अग्निम् । इन्द्रऽऋषभा । द्रविणे । नः । दधातु ॥ ६ ॥
याम् । रक्षन्ति । अस्वप्नाः । विश्वऽदानीम् । देवाः । भूमिम् । पृथिवीम् । अप्रऽमादम् ।
सा । नः । मधु । प्रियम् । दुहाम् । अथो इति । उक्षतु । वर्चसा ॥ ७ ॥
या । अर्णवे । अधि । सलिलम् । अग्रे । आसीत् । याम् । मायाभिः । अनुऽअचरन् ।
मनीषिणः । यस्याः । हृदयम् । परमे । विऽओमन् । सत्येन । आऽवृतम् । अमृतम् ।
पृथिव्याः । सा । नः । भूमिः । त्विषिम् । बलम् । राष्ट्रे । दधातु । उत्ऽतमे ॥ ८ ॥

XII.1.3 On whom (are) the ocean and the river (sindhu), the waters; on whom food, plowings, came into being; on whom quickens this that breathes, that stirs —let that earth (bhūmi) set us in first drinking.

XII.1.4 Whose, the earth's (are) the four quarters on whom food, plowings, came into being; who bears manifoldly what breaths, what stirs -- let that earth set us among kine, also in inexhaustibleness.

XII.1.5 On whom the people of old formerly spread themselves, on whom the gods overcame the Asuras; the station of kine, of horses, of birds — let the earth assign us fortune, splendor.

XII.1.6 All-bearing, good-holding, firm-standing, gold-backed, reposer of moving things, bearing the universal fire, let the earth, whose bull (ṛṣabha) is Indra, set us in property.

XII.1.7 She the earth, whom the gods, sleepless, defend all the time without failure -- let her yield to us honey, what is dear; then let her sprinkle us with splendor.

XII.1.8 She who in the beginning was sea (salila) upon the ocean; whom the skilful moved after with their devices; the earth whose immortal heart covered with truth is in highest firmament -- let that earth assign to us brilliancy, strength, in highest royalty.

यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति ।
सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा ॥९॥
यामश्विनावमिमातां विष्णुर्यस्यां विचक्रमे ।
इन्द्रो यां चक्र आत्मनेऽनमित्रां शचीपतिः ।
सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः ॥१०॥
गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्योनमस्तु ।
बभ्रुं कृष्णां रोहिणीं विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम् ।
अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम् ॥११॥
यत्ते मध्यं पृथिवि यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः ।
तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः ॥
पर्जन्यः पिता स उ नः पिपर्तु ॥१२॥

यस्याम् । आपः । परिऽचराः । समानीः । अहोरात्रे इति । अप्रऽमादम् । क्षरन्ति ।
सा । नः । भूमिः । भूरिऽधारा । पयः । दुहाम् । अथो इति । उक्षतु । वर्चसा ॥ ९ ॥
याम् । अश्विनौ । अमिमाताम् । विष्णुः । यस्याम् । विऽचक्रमे ।
इन्द्रः । याम् । चक्रे । आत्मने । अनमित्राम् । शचीऽपतिः ।
सा । नः । भूमिः । वि । सृजताम् । माता । पुत्राय । मे । पयः ॥ १० ॥
गिरयः । ते । पर्वताः । हिमऽवन्तः । अरण्यम् । ते । पृथिवि । स्योनम् । अस्तु ।
बभ्रुम् । कृष्णाम् । रोहिणीम् । विश्वऽरूपाम् । ध्रुवाम् । भूमिम् । पृथिवीम् । इन्द्रऽगुप्ताम् ।
अजीतः । अहतः । अक्षतः । अधि । अस्थाम् । पृथिवीम् । अहम् ॥ ११ ॥
यत् । ते । मध्यम् । पृथिवि । यत् । च । नभ्यम् । याः । ते । ऊर्जः । तन्वः । सम्ऽबभूवुः ।
तासु । नः । धेहि । अभि । नः । पवस्व । माता । भूमिः । पुत्रः । अहम् । पृथिव्याः ।
पर्जन्यः । पिता । सः । ऊं इति । नः । पिपर्तु ॥ १२ ॥

XII.1.9 On whom the circulating waters flow the same, night and day, without failure -- let that earth of many streams yield us milk; then let her sprinkle (us) with splendor.

XII.1.10 Whom the Aśvins measured; on whom Viṣṇu strode out; whom Indra, lord of might, made free from enemies for himself -- let that earth to us, a mother to a son, release milk.

XII.1.11 Let thy hills, snowy mountains, let thy forest-land, O earth, be pleasant; upon the brown, black, red, all-formed, fixed earth, the earth guarded by Indra – I, unharassed, unsmitten, unwounded, have stood upon the earth.

XII.1.12 What is thy middle, O earth, and what thy navel, what refreshments arose out of thy body -- in them do thou set us; be purifying toward us; earth is mother, I am earth's son; Parjanya is father -- let him save us.

यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः ।
यस्यां मीयन्ते स्वरवः पृथिव्यामूर्ध्वाः शुक्रा आहुत्याः पुरस्तात् ।
सा नो भूमिर्वर्धयद्वर्धमाना ॥१३॥
यो नो द्वेषत्पृथिवि यः पृतन्याद्योभिदासान्मनसा यो वधेन ।
तं नो भूमे रन्धय पूर्वकृत्वरि ॥१४॥
त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः ।
तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य उद्यन्त्सूर्यो रश्मिभिरातनोति ॥१५॥
ता नः प्रजाः सं दुह्रतां समग्रा वाचो मधु पृथिवि धेहि मह्यम् ॥१६॥
विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम् ।
शिवां स्योनामनु चरेम विश्वहा ॥१७॥

यस्याम् । वेदिम् । परिऽगृह्णन्ति । भूम्याम् । यस्याम् । यज्ञम् । तन्वते । विश्वऽकर्माणः ।
यस्याम् । मीयन्ते । स्वरवः । पृथिव्याम् । ऊर्ध्वाः । शुक्राः । आऽहुत्याः । पुरस्तात् ।
सा । नः । भूमिः । वर्धयत् । वर्धमाना ॥ १३ ॥
यः । नः । द्वेषत् । पृथिवि । यः । पृतन्यात् । यः । अभिऽदासात् । मनसा । यः । वधेन ।
तम् । नः । भूमे । रन्धय । पूर्वऽकृत्वरि ॥ १४ ॥
त्वत् । जाताः । त्वयि । चरन्ति । मर्त्याः । त्वम् । बिभर्षि । द्विऽपदः । त्वम् । चतुःऽपदः । तव ।
इमे । पृथिवि । पञ्च । मानवाः । येभ्यः । ज्योतिः । अमृतम् । मर्त्येभ्यः । उतऽयन् । सूर्यः ।
रश्मिऽभिः । आऽतनोति ॥ १५ ॥
ताः । नः । प्रऽजाः । सम् । दुह्रताम् । समऽअग्राः । वाचः । मधु । पृथिवि । धेहि । मह्यम् ॥
विश्वऽस्वम् । मातरम् । ओषधीनाम् । ध्रुवाम् । भूमिम् । पृथिवीम् । धर्मणा । धृताम् ।
शिवाम् । स्योनाम् । अनु । चरेम । विश्वहा ॥ १७ ॥

XII.1.13 On what earth they enclose the sacrificial hearth; on what men of all works extend the sacrifice; on what earth are set up the sacrificial posts, erect, bright, before the oblation — let that earth, increasiing, make us increase.

XII.1.14 Whoso shall hate us, O earth; whoso shall fight, whoso shall vex with mind, who with deadly weapon — him, O prior-acting earth, do thou put in our power.

XII.1.15 Born from thee, mortals go about upon thee; thou bearest bipeds, thou quadrupeds; thine, O earth, are these five races of men, for whom mortals, the rising sun extends with his rays immortal light.

XII.1.16 Let those creatures, without exception, together yield fruit to us; the honey of speech, O earth, do thou assign unto me.

XII.1.17 The all-producing mother of herbs, the fixed earth, the earth maintained by ordinance, the auspicious, the pleasant, may we go about over always.

महत्सधस्थं महती बभूविथ महान्वेग एजथुर्वेपथुष्टे ।
महांस्त्वेन्द्रो रक्षत्यप्रमादम् ।
सा नो भूमे प्र रोचय हिरण्यस्येव संदृशि मा नो द्विक्षत कश्चन ॥१८॥
अग्निर्भूम्यामोषधीष्वग्निमापो बिभ्रत्यग्निरश्मसु ।
अग्निरन्तः पुरुषेषु गोष्वश्वेष्वग्नयः ॥१९॥
अग्निर्दिव आ तपत्यग्नेर्देवस्योर्वन्तरिक्षम् ।
अग्निं मर्तास इन्धते हव्यवाहं घृतप्रियम् ॥२०॥
अग्निवासाः पृथिव्यसितज्ञूस्त्विषीमन्तं संशितं मा कृणोतु ॥२१॥
भूम्यां देवेभ्यो ददति यज्ञं हव्यमरंकृतम् ।
भूम्यां मनुष्या जीवन्ति स्वधयान्नेन मर्त्याः ।
सा नो भूमिः प्राणमायुर्दधातु जरदष्टिं मा पृथिवी कृणोतु ॥२२॥

महत् । सधऽस्थम् । महती । बभूविथ । महान् । वेगः । एजथुः । वेपथुः । ते ।
महान् । त्वा । इन्द्रः । रक्षति । अप्रऽमादम् ।
सा । नः । भूमे । प्र । रोचय । हिरण्यस्यऽइव । सम्ऽदृशि । मा । नः । द्विक्षत । कः । चन ॥
अग्निः । भूम्याम् । ओषधीषु । अग्निम् । आपः । बिभ्रति । अग्निः । अश्मऽसु ।
अग्निः । अन्तः । पुरुषेषु । गोषु । अश्वेषु । अग्नयः ॥ १९ ॥
अग्निः । दिवः । आ । तपति । अग्नेः । देवस्य । उरु । अन्तरिक्षम् ।
अग्निम् । मर्तासः । इन्धते । हव्यऽवाहम् । घृतऽप्रियम् ॥ २० ॥
अग्निऽवासाः । पृथिवी । असितऽज्ञूः । त्विषिऽमन्तम् । सम्ऽशितम् । मा । कृणोतु ॥२१॥
भूम्याम् । देवेभ्यः । ददति । यज्ञम् । हव्यम् । अरम्ऽकृतम् ।
भूम्याम् । मनुष्याः । जीवन्ति । स्वधया । अन्नेन । मर्त्याः ।
सा । नः । भूमिः । प्राणम् । आयुः । दधातु । जरत्ऽअष्टिम् । मा । पृथिवी । कृणोतु ॥

XII.1.18 Thou hast become great, a great station; great is thy trembling, stirring, quaking; great Indra defends thee unremittingly. Do thou, O earth, make us to shine forth as in the aspect of gold; let no one soever hate us.

XII.1.19 Agni is in the earth, in the herbs; the waters bear Agni; Agni in the stones; Agni is within men; in kine, in horses are Agnis.

XII.1.20 Agni sends heat from the sky; the wide atmosphere is god Agni's; mortals kindle Agni oblation-bearer, ghee-lover.

XII.1.21 Let the earth, fire-clad, black-kneed, make me sharpened, brilliant.

XII.1.22 On the earth they give to the gods the sacrifice, the oblation, duly prepared; on the earth mortal men live by svadhā, by food; let that earth assign us breath, lfe-time; let earth make me one who attains old age.

यस्ते गन्धः पृथिवि संबभूव यं बिभ्रत्योषधयो यमापः ।
यं गन्धर्वा अप्सरसश्च भेजिरे तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चन ॥२३॥
यस्ते गन्धः पुष्करमाविवेश यं संजभ्रुः सूर्याया विवाहे ।
अमर्त्याः पृथिवि गन्धमग्रे तेन मा सुरभिं कृणु मा नो द्विक्षत कश्चन ॥२४॥
यस्ते गन्धः पुरुषेषु स्त्रीषु पुंसु भगो रुचिः ।
यो अश्वेषु वीरेषु यो मृगेषूत हस्तिषु ।
कन्यायां वर्चो यद्भूमे तेनास्माँ अपि सं सृज मा नो द्विक्षत कश्चन ॥२५॥
शिला भूमिरश्मा पांसुः सा भूमिः संधृता धृता ।
तस्यै हिरण्यवक्षसे पृथिव्या अकरं नमः ॥२६॥
यस्यां वृक्षा वानस्पत्या ध्रुवास्तिष्ठन्ति विश्वहा ।
पृथिवीं विश्वधायसं धृतामच्छावदामसि ॥२७॥
उदीराणा उतासीनास्तिष्ठन्तः प्रक्रामन्तः ।
पद्भ्यां दक्षिणसव्याभ्यां मा व्यथिष्महि भूम्याम् ॥२८॥

यः । ते । गन्धः । पृथिवि । सम्ऽबभूव । यम् । बिभ्रति । ओषधयः । यम् । आपः ।
यम् । गन्धर्वाः । अप्सरसः । च । भेजिरे । तेन । मा । सुरभिम् । कृणु । मा । नः । द्विक्षत । कः । चन ॥

यः । ते । गन्धः । पुष्करम् । आऽविवेश । यम् । सम्ऽजभ्रुः । सूर्यायाः । विऽवाहे ।
अमर्त्याः । पृथिवि । गन्धम् । अग्रे । तेन । मा । सुरभिम् । कृणु । मा । नः । द्विक्षत । कः । चन ॥

यः । ते । गन्धः । पुरुषेषु । स्त्रीषु । पुम्ऽसु । भगः । रुचिः ।
यः । अश्वेषु । वीरेषु । यः । मृगेषु । उत । हस्तिषु ।
कन्यायाम् । वर्चः । यत् । भूमे । तेन । अस्मान् । अपि । सम् । सृज । मा । नः । द्विक्षत । कः । चन ॥

शिला । भूमिः । अश्मा । पांसुः । सा । भूमिः । सम्ऽधृता । धृता ।
तस्यै । हिरण्यऽवक्षसे । पृथिव्यै । अकरम् । नमः ॥ २६ ॥

यस्याम् । वृक्षाः । वानस्पत्याः । ध्रुवाः । तिष्ठन्ति । विश्वहा ।
पृथिवीम् । विश्वऽधायसम् । धृताम् । अच्छऽआवदामसि ॥ २७ ॥

उत्ऽईराणाः । उत । आसीनाः । तिष्ठन्तः । प्रऽक्रामन्तः ।
पत्ऽभ्याम् । दक्षिणऽसव्याभ्याम् । मा । व्यथिष्महि । भूम्याम् ॥ २८ ॥

XII.1.23 What odor of thine, O earth, came into being, which the herbs, which the waters bear, which the Gandharvas and Apsarases shared -- with that do thou make me odorous; let no one soever hate us.

XII.1.24 What odor of thine entered into the blue lotus; which they brought together at Sūrya's wedding – the immortals, O earth, what odor in the beginning – with that do thou make me odorous; let no one soever hate us.

XII.1.25 What odor of thine is in human beings; in women, in men, portion, pleasure; what in horses, in heroes, what in wild animals and in elephants; what splendor, O earth, in a maiden – with that do thou unite us also; let no one soever hate us.

XII.1.26 Rock is earth, stone, dust; this earth (is) held together, held; to that earth, gold-backed have I paid homage.

XII.1.27 On whom stand always fixed the trees, the forest trees, the all-supporting earth that is held (together) do we address.

XII.1.28 Arising, also sitting, standing, striding forth, with right and left feet, let us not stagger upon the earth.

विमृग्वरीं पृथिवीमा वदामि क्षमां भूमिं ब्रह्मणा वावृधानाम् ।
ऊर्जं पुष्टं बिभ्रतीमन्नभागं घृतं त्वाभि नि षीदेम भूमे ॥२९॥
शुद्धा न आपस्तन्वे क्षरन्तु यो नः सेदुरप्रिये तं नि दध्मः ।
पवित्रेण पृथिवि मोत्पुनामि ॥३०॥
यास्ते प्राचीः प्रदिशो या उदीचीर्यास्ते भूमे अधराद्याश्च पश्चात् ।
स्योनास्ता मह्यं चरते भवन्तु मा नि पप्तं भुवने शिश्रियाणः ॥३१॥
मा नः पश्चान्मा पुरस्तान्नुदिष्ठा मोत्तरादधरादुत ।
स्वस्ति भूमे नो भव मा विदन्परिपन्थिनो वरीयो यावया वधम् ॥३२॥
यावत्तेभि विपश्यामि भूमे सूर्येण मेदिना ।
तावन्मे चक्षुर्मा मेष्टोत्तरामुत्तरां समाम् ॥३३॥
यच्छयानः पर्यावर्ते दक्षिणं सव्यमभि भूमे पार्श्वम् ।
उत्तानास्त्वा प्रतीचीं यत्पृष्टीभिरधिशेमहे ।
मा हिंसीस्तत्र नो भूमे सर्वस्य प्रतिशीवरि ॥३४॥

विऽमृग्वरीम् । पृथिवीम् । आ । वदामि । क्षमाम् । भूमिम् । ब्रह्मणा । ववृधानाम् ।
ऊर्जम् । पुष्टम् । बिभ्रतीम् । अन्नऽभागम् । घृतम् । त्वा । अभि । नि । सीदेम । भूमे ॥२९॥
शुद्धाः । नः । आपः । तन्वे । क्षरन्तु । यः । नः । सेदुः । अप्रिये । तम् । नि । दध्मः ।
पवित्रेण । पृथिवि । मा । उत् । पुनामि ॥ ३० ॥
याः । ते । प्राचीः । प्रऽदिशः । याः । उदीचीः । याः । ते । भूमे । अधरात् । याः । च । पश्चात् ।
स्योनाः । ताः । मह्यम् । चरते । भवन्तु । मा । नि । पप्तम् । भुवने । शिश्रियाणः ॥३१॥
मा । नः । पश्चात् । मा । पुरस्तात् । नुदिष्ठाः । मा । उत्तरात् । अधरात् । उत ।
स्वस्ति । भूमे । नः । भव । मा । विदन् । परिऽपन्थिनः । वरीयः । यवय । वधम् ॥३२॥
यावत् । ते । अभि । विऽपश्यामि । भूमे । सूर्येण । मेदिना ।
तावत् । मे । चक्षुः । मा । मेष्ट । उत्तराम्ऽउत्तराम् । समाम् ॥ ३३ ॥
यत् । शयानः । परिऽआवर्ते । दक्षिणम् । सव्यम् । अभि । भूमे । पार्श्वम् ।
उत्तानाः । त्वा । प्रतीचीम् । यत् । पृष्टीभिः । अधिऽशेमहे ।
मा । हिंसीः । तत्र । नः । भूमे । सर्वस्य । प्रतिऽशीवरि ॥ ३४ ॥

XII.1.29 The cleansing earth do I address, the patient earth, increasing by worship; may we sit down, O earth, upon thee, that bearest refreshment, prosperity, food-portion, ghee.

XII.1.30 Let cleansed waters flow for our body; what mucus is ours, that we deposit on him we love not; with a purifier, O earth, do I purify myself.

XII.1.31 What forward directions are thine, what upward, what are thine, O earth, down ward, and what behind, let those be pleasant to me going about; let me not fall down supported on creation (Bhuvana).

XII.1.32 Do not push us behind, nor in front, nor above and below; become thou welfare for us, O earth; let not the waylayers find us; keep very far off the deadly weapon.

XII.1.33 How much of thee I look forth upon, O earth, with the sun for ally, so far let my sight not fail, from one year to another.

XII.1.34 In that, lying, I turn myself about upon the right (or) the left side, O earth; in that we with our ribs lie stretched out upon thee that meetest us -- do not in that case injure us, O earth thou underlier of everything.

यत्ते भूमे विखनामि क्षिप्रं तदपि रोहतु ।
मा ते मर्म विमृग्वरि मा ते हृदयमर्पिपम् ॥३५॥

ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः ।
ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दुहाताम् ॥३६॥

यापं सर्पं विजमाना विमृग्वरी यस्यामासन्नग्नयो ये अप्स्व१न्तः ।
परा दस्यून्ददती देवपीयूनिन्द्रं वृणाना पृथिवी न वृत्रम् ।
शक्राय दध्रे वृषभाय वृष्णे ॥३७॥

यस्यां सदोहविर्धाने यूपो यस्यां निमीयते ।
ब्रह्माणो यस्यामर्चन्त्यृग्भिः साम्ना यजुर्विदः ।
युज्यन्ते यस्यामृत्विजः सोममिन्द्राय पातवे ॥३८॥

यस्यां पूर्वे भूतकृत ऋषयो गा उदानृचुः ।
सप्त सत्रेण वेधसो यज्ञेन तपसा सह ॥३९॥

यत् । ते । भूमे । विऽखनामि । क्षिप्रम् । तत् । अपि । रोहतु ।
मा । ते । मर्म । विऽमृग्वरि । मा । ते । हृदयम् । अर्पिपम् ॥ ३५ ॥

ग्रीष्मः । ते । भूमे । वर्षाणि । शरत् । हेमन्तः । शिशिरः । वसन्तः ।
ऋतवः । ते । विऽहिताः । हायनीः । अहोरात्रे इति । पृथिवि । नः । दुहाताम् ॥ ३६ ॥

या । अप । सर्पम् । विजमाना । विऽमृग्वरी । यस्याम् । आसन् । अग्नयः । ये । अप्ऽसु ।
अन्तः । परा । दस्यून् । ददती । देवऽपीयून् । इन्द्रम् । वृणाना । पृथिवी । न । वृत्रम् ।
शक्राय । दध्रे । वृषभाय । वृष्णे ॥ ३७ ॥

यस्याम् । सदोहविर्धाने इति सदःऽहविर्धाने । यूपः । यस्याम् । निऽमीयते ।
ब्रह्माणः । यस्याम् । अर्चन्ति । ऋक्ऽभिः । साम्ना । यजुःऽविदः ।
युज्यन्ते । यस्याम् । ऋत्विजः । सोमम् । इन्द्राय । पातवे ॥ ३८ ॥

यस्याम । पूर्वे । भूतऽकृतः । ऋषयः । गाः । उत्ऽआनृचुः ।
सप्त । सत्रेण । वेधसः । यज्ञेन । तपसा । सह ॥ ३९ ॥

XII.1.35 What of thee, O earth, I dig out, let that quickly grow over; let me not hit thy vitals nor thy heart, O cleansing one.

XII.1.36 Let thy hot season, O earth, rainy season, autumn, winter, cool season, spring – let thine arranged seasons, years, let day and night, O earth, yield milk to us.

XII.1.37 She who, cleansing one, trembling away the serpent; on whom were the fires that are within the waters abandoing the god-insulting barbarians, choosing, she the earth, Indra not Vṛitra, kept herself for the mighty one, the virile bull.

XII.1.38 On whom are the seat and oblation-holder; on whom the sacrificial post is planted; on whom worshipers praise with verses, with the chant, knowing the sacricial formulas; on whom are joined the priests for Indra to drink the soma;

XII.1.39 On whom the former being-making seers sang out the kine - - the seven pious ones by their session, together with sacrifice (and) penance;

सा नो भूमिरा दिशतु यद्धनं कामयामहे ।
भगो अनुप्रयुङ्क्तामिन्द्र एतु पुरोगवः ॥४०॥

यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्यैलिबाः ।
युध्यन्ते यस्यामाक्रन्दो यस्यां वदति दुन्दुभिः ।
सा नो भूमिः प्र णुदतां सपत्नानसपत्नं मा पृथिवी कृणोतु ॥४१॥

यस्यामन्नं व्रीहियवौ यस्या इमाः पञ्च कृष्टयः ।
भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे ॥४२॥

यस्याः पुरो देवकृताः क्षेत्रे यस्या विकुर्वते ।
प्रजापतिः पृथिवीं विश्वगर्भामाशामाशां रण्यां नः कृणोतु ॥४३॥

निधिं बिभ्रती बहुधा गुहा वसु मणिं हिरण्यं पृथिवी ददातु मे ।
वसूनि नो वसुदा रासमाना देवी दधातु सुमनस्यमाना ॥४४॥

जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम् ।
सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती ॥४५॥

सा । नः । भूमिः । आ । दिशतु । यत् । धनम् । कामयामहे ।
भगः । अनुऽप्रयुङ्क्ताम् । इन्द्रः । एतु । पुरःऽगवः ॥ ४० ॥

यस्याम् । गायन्ति । नृत्यन्ति । भूम्याम् । मर्त्याः । विऽऐलबाः ।
युध्यन्ते । यस्याम् । आऽक्रन्दः । यस्याम् । वदति । दुन्दुभिः ।
सा । नः । भूमिः । प्र । नुदताम् । सऽपत्नान् । असपत्नम् । मा । पृथिवी । कृणोतु ॥ ४१ ॥

यस्याम् । अन्नम् । व्रीहिऽयवौ । यस्याः । इमाः । पञ्च । कृष्टयः ।
भूम्यै । पर्जन्यऽपत्न्यै । नमः । अस्तु । वर्षऽमेदसे ॥ ४२ ॥

यस्याः । पुरः । देवऽकृताः । क्षेत्रे । यस्याः । विऽकुर्वते ।
प्रजाऽपतिः । पृथिवीम् । विश्वऽगर्भाम् । आशाम्ऽआशाम् । रण्याम् । नः । कृणोतु ॥ ४३ ॥

निऽधिम् । बिभ्रती । बहुऽधा । गुहा । वसु । मणिम् । हिरण्यम् । पृथिवी । ददातु । मे ।
वसूनि । नः । वसुऽदाः । रासमाना । देवी । दधातु । सुऽमनस्यमाना ॥ ४४ ॥

जनम् । बिभ्रती । बहुऽधा । विऽवाचसम् । नानाऽधर्माणम् । पृथिवी । यथाऽओकसम् ।
सहस्रम् । धाराः । द्रविणस्य । मे । दुहाम् । ध्रुवाऽइव । धेनुः । अनपऽस्फुरन्ती ॥ ४५ ॥

XII.1.40 Let that earth appoint unto us what riches we desire; let Bhaga join on after; let Indra go (as our) forerunner.

XII.1.41 On whom, the earth, mortals sing (and) dance with loud noises; on whom they fight; on whom speaks the shout, the drum – let that earth push forth our rivals; let earth make me free from rivals.

XII.1.42 On whom is food, rice and barley; whose are these five races – to the earth, whose spouse is Parjanya, fattened by the rain, be homage.

XII.1.43 Whose are the god-made strongholds; in whose field (men) fall out – the earth, womb of everything, let Prajāpati make pleasant to us, spot by spot.

XII.1.44 Bearing treasure (and) good in many places hiddenly, let the earth give me jewel, gold; giver of good, betowing good things on us, let the divine one assign (them to us) with favouring mind.

XII.1.45 Let the earth, bearing in many places people of different speech, of diverse customs, according to their homes, yeild me a thousand streams of property, like a steady unresisting milch-cow.

यस्ते सर्पो वृश्चिकस्तृष्टदंश्मा हेमन्तजब्धो भृमलो गुहा शये ।
क्रिमिर्जिन्वत्पृथिवि यद्यदेजति प्रावृषि तन्नः सर्पन्मोप सृपद्यच्छिवं तेन नो मृड ॥४६॥
ये ते पन्थानो बहवो जनायना रथस्य वर्त्मानसश्च यातवे ।
यैः संचरन्त्युभये भद्रपापास्तं पन्थानं जयेमानमित्रमतस्करं यच्छिवं तेन नो मृड ॥४७॥
मल्वं बिभ्रती गुरुभृद्भद्रपापस्य निधनं तितिक्षुः ।
वराहेण पृथिवी संविदाना सूकराय वि जिहीते मृगाय ॥४८॥
ये त आरण्याः पशवो मृगा वने हिताः सिंहा व्याघ्राः पुरुषादश्चरन्ति ।
उलं वृकं पृथिवि दुच्छुनामित ऋक्षीकां रक्षो अप बाधयास्मत् ॥४९॥
ये गन्धर्वा अप्सरसो ये चारायाः किमीदिनः ।
पिशाचान्त्सर्वा रक्षांसि तानस्मद्भूमे यावय ॥५०॥

यः । ते । सर्पः । वृश्चिकः । तृष्टऽदंश्मा । हेमन्तऽजब्धः । भृमलः । गुहा । शये ।
क्रिमिः । जिन्वत् । पृथिवि । यत्ऽयत् । एजति । प्रावृषि । तत् । नः । सर्पत् । मा ।
उप । सृपत् । यत् । शिवम् । तेन । नः । मृड ॥ ४६ ॥

ये । ते । पन्थानः । बहवः । जनऽअयनाः । रथस्य । वर्त्म । अनसः । च । यातवे ।
यैः । सम्ऽचरन्ति । उभये । भद्रऽपापाः । तम् । पन्थानम् । जयेम । अनमित्रम् ।
अतस्करम् । यत् । शिवम् । तेन । नः । मृड ॥ ४७ ॥

मल्वम् । बिभ्रती । गुरुऽभृत् । भद्रऽपापस्य । निऽधनम् । तितिक्षुः ।
वराहेण । पृथिवी । सम्ऽविदाना । सूकराय । वि । जिहीते । मृगाय ॥ ४८ ॥

ये । ते । आरण्याः । पशवः । मृगाः । वने । हिताः । सिंहाः । व्याघ्राः । पुरुषऽअदः । चरन्ति ।
उलम् । वृकम् । पृथिवि । दुच्छुनाम् । इतः । ऋक्षीकाम् । रक्षः । अप । बाधय । अस्मत् ॥

ये । गन्धर्वाः । अप्सरसः । ये । च । अरायाः । किमीदिनः ।
पिशाचान् । सर्वा । रक्षांसि । तान् । अस्मत् । भूमे । यवय ॥ ५० ॥

XII.1.46 What stinging harsh-biting serpent of thine lies in secret, winter-harmed, torpid; whatever worm O earth, becoming lively, stirs in the early rainy season –let that, crawling, not crawl upon us; be thou gracious to us with that which is propitious.

XII.1.47 What many roads thou hast, for people to go upon, a track for the chariot, and for the going of the cart, by which men of both kinds, excellent and evil go about – that road, free from enemies, free from robbers, may we conquer; be thou gracious to us with that which is propitious.

XII.1.48 Bearing the fool, bearer of what is heavy, enduring the death of the excellent and of the evil, the earth, in concord with the boar, opens itself to the wild hog.

XII.1.49 What forest animals of thine, wild beasts set in the woods, lions, tigers, go about man-eating - the jackal, the wolf, O earth, misfortune, the ṛkṣikā, the demon, do thou force away from us here.

XII.1.50 What Gandharvas, Apsarases (there are), and what arayas, kimīdins: the piśācas, all demons -- them do thou keep away from us, O earth.

यां द्विपादः पक्षिणः संपतन्ति हंसाः सुपर्णाः शकुना वयांसि ।
यस्यां वातो मातरिश्वेयते रजांसि कृण्वंश्च्यावयंश्च वृक्षान् ।
वातस्य प्रवामुपवामनु वात्यर्चिः ॥५१॥
यस्यां कृष्णमरुणं च संहिते अहोरात्रे विहिते भूम्यामधि ।
वर्षेण भूमिः पृथिवी वृतावृता सा नो दधातु भद्रया प्रिये धामनिधामनि ॥५२॥
द्यौश्च म इदं पृथिवी चान्तरिक्षं च मे व्यचः ।
अग्निः सूर्य आपो मेधां विश्वे देवाश्च सं ददुः ॥५३॥
अहमस्मि सहमान उत्तरो नाम भूम्याम् ।
अभीषाडस्मि विश्वाषाडाशामाशां विषासहिः ॥५४॥
अदो यद्देवि प्रथमाना पुरस्ताद्देवैरुक्ता व्यसर्पो महित्वम् ।
आ त्वा सुभूतमविशत्तदानीमकल्पयथाः प्रदिशश्चतस्रः ॥५५॥
ये ग्रामा यदरण्यं याः सभा अधि भूम्याम् ।
ये संग्रामाः समितयस्तेषु चारु वदेम ते ॥५६॥

याम् । द्विऽपादः । पक्षिणः । सम्ऽपतन्ति । हंसाः । सुऽपर्णाः । शकुनाः । वयांसि ।
यस्याम् । वातः । मातरिश्वा । ईयते । रजांसि । कृण्वन् । च्यवयन् । च । वृक्षान् ।
वातस्य । प्रऽवाम् । उपऽवाम् । अनु । वाति । अर्चिः ॥ ५१ ॥
यस्याम् । कृष्णम् । अरुणम् । च । संहिते इति सम्ऽहिते । अहोरात्रे इति । विहिते इति
विऽहिते । भूम्याम् । अधि । वर्षेण । भूमिः । पृथिवी । वृता । आऽवृता । सा । नः ।
दधातु । भद्रया । प्रिये । धामनिऽधामनि ॥ ५२ ॥
द्यौः । च । मे । इदम् । पृथिवी । च । अन्तरिक्षम् । च । मे । व्यचः ।
अग्निः । सूर्यः । आपः । मेधाम् । विश्वे । देवाः । च । सम् । ददुः ॥ ५३ ॥
अहम् । अस्मि । सहमानः । उत्तरः । नाम । भूम्याम् ।
अभीषाट् । अस्मि । विश्वाषाट् । आशाम्ऽआशाम् । विऽससहिः ॥ ५४ ॥
अदः । यत् । देवि । प्रथमाना । पुरस्तात् । देवैः । उक्ता । विऽअसर्पः । महिऽत्वम् ।
आ । त्वा । सुऽभुतम् । अविशत् । तदानीम् । अकल्पयथाः । प्रऽदिशः । चतस्रः ॥५५॥
ये । ग्रामाः । यत् । अरण्यम् । याः । सभाः । अधि । भूम्याम् ।
ये । सम्ऽग्रामाः । सम्ऽइतयः । तेषु । चारु । वदेम । ते ॥ ५६ ॥

XII.1.51 She, to whom two-footed winged-ones fly together, swans, eagles, hawks, birds; on whom the wind, Mātariśvan, goes about, making clouds of dust and setting in motion the trees -- flame blows after the forth-blowing, the toward-blowing, of the wind.

XII.1.52 On whom the black and the ruddy, combined, (namely) day and night, (are) disposed upon the earth; the broad earth, wrapped (and) covered with rain -- let her kindly set us in each loved abode.

XII.1.53 Both heaven and earth and atmosphere (have given) me this expanse; fire, sun, waters, and all the gods have together given me wisdom.

XII.1.54 I am overpowering, superior by name on the earth; I am subduing, all-overpowering, vanquishing in every region.

XII.1.55 When yonder, O divine one, spreading thyself forward, told by the gods, thou didst expand to greatness, then entered into thee well-being; thou didst make fit the four directions.

XII.1.56 What villages, what forest, what assemblies, (are) upon the earth, what hosts, gatherings -- in them may we speak what is pleasant to thee.

अश्व इव रजो दुधुवे वि ताञ्जनान्य आक्षियन्पृथिवीं यादजायत ।
मन्द्राग्रेत्वरी भुवनस्य गोपा वनस्पतीनां गृभिरोषधीनाम् ॥५७॥
यद्वदामि मधुमत्तद्वदामि यदीक्षे तद्वनन्ति मा ।
त्विषीमानस्मि जूतिमानवान्यान्हन्मि दोधतः ॥५८॥
शन्तिवा सुरभिः स्योना कीलालोध्नी पयस्वती ।
भूमिरधि ब्रवीतु मे पृथिवी पयसा सह ॥५९॥
यामन्वैच्छद्धविषा विश्वकर्मान्तरर्णवे रजसि प्रविष्टाम् ।
भुजिष्यं पात्रं निहितं गुहा यदाविर्भोगे अभवन्मातृमद्भ्यः ॥६०॥
त्वमस्यावपनी जनानामदितिः कामदुघा पप्रथाना ।
यत्त ऊनं तत्त आ पूरयाति प्रजापतिः प्रथमजा ऋतस्य ॥६१॥
उपस्थास्ते अनमीवा अयक्ष्मा अस्मभ्यं सन्तु पृथिवि प्रसूताः ।
दीर्घं न आयुः प्रतिबुध्यमाना वयं तुभ्यं बलिहृतः स्याम ॥६२॥

अश्वःऽइव । रजः । दुधुवे । वि । तान् । जनान् । ये । आऽअक्षियन् । पृथिवीम् । यात् ।
अजायत । मन्द्रा । अग्रऽइत्वरी । भुवनस्य । गोपाः । वनस्पतीनाम् । गृभिः । ओषधीनाम् ॥
यत् । वदामि । मधुऽमत् । तत् । वदामि । यत् । ईक्षे । तत् । वनन्ति । मा ।
त्विषिऽमान् । अस्मि । जूतिऽमान् । अव । अन्यान् । हन्मि । दोधतः ॥ ५८ ॥
शन्तिऽवा । सुरभिः । स्योना । कीलालऽऊध्नी । पयस्वती ।
भूमिः । अधि । ब्रवीतु । मे । पृथिवी । पयसा । सह ॥ ५९ ॥
याम् । अनुऽऐच्छत् । हविषा । विश्वऽकर्मा । अन्तः । अर्णवे । रजसि । प्रऽविष्टाम् ।
भुजिष्यम् । पात्रम् । निऽहितम् । गुहा । यत् । आविः । भोगे । अभवत् । मातृमत्ऽभ्यः ॥
त्वम् । असि । आऽवपनी । जनानाम् । अदितिः । कामऽदुघा । पप्रथाना ।
यत् । ते । ऊनम् । तत् । ते । आ । पूरयाति । प्रजाऽपतिः । प्रथमऽजाः । ऋतस्य ॥६१॥
उपऽस्थाः । ते । अनमीवाः । अयक्ष्माः । अस्मभ्यम् । सन्तु । पृथिवि । प्रऽसूताः ।
दीर्घम् । नः । आयुः । प्रतिऽबुध्यमानाः । वयम् । तुभ्यम् । बलिऽहृतः । स्याम ॥६२॥

XII.1.57 As a horse the dust, she has shaken apart those people who dwelt upon the earth since she was born -- pleasing, going at the head, keeper of creation, container of forest trees, of herbs.

XII.1.58 What I speak, rich in honey I speak it; what I view, that they win me; brilliant am I, possessed of swiftness; I smite down others that are violent.

XII.1.59 Tranquil, fragrant, pleasant, with sweet drink in her udder, rich in milk, let earth bless me, earth together with milk.

XII.1.60 Whom Viśvakarmān sought after with oblation within the ocean, when she was entered into the mist; an enjoyable vessel that was deposited in secret became manifest in enjoyment for them that have mothers.

XII.1.61 Thou art the scatterer of people, (art) a wish-fulfilling Aditi, spreading out; what of thee is deficient, may Prajāpati, first-born of righteousness, fill that up for thee.

XII.1.62 Let standers upon thee, free from disease, free from yakṣma, be produced for us, O earth; awakening to meet our long lifetime, may we be tribute-bearers to thee.

भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम् ।
संविदाना दिवा कवे श्रियां मा धेहि भूत्याम् ॥६३॥

भूमे । मातः । नि । धेहि । मा । भद्रया । सुऽप्रतिस्थितम् ।
सम्ऽविदाना । दिवा । कवे । श्रियाम् । मा । धेहि । भूत्याम् ॥ ६३ ॥

(२) द्वितीयं सूक्तम्

(१–५५) पञ्चपञ्चाशदृचस्यास्य सूक्तस्य भृगुर्ऋषिः । (१–२०, ३४–५५) प्रथमादिविंशत्यृचां चतुस्त्रिंश्यादि-द्वाविंशतेश्चाग्निर्मन्त्रोक्ता वा, (२१–३३) एकविंश्यादित्रयोदशानाञ्च मृत्युर्देवता । (१, ४, १०–११, २१–३३, ५३) प्रथमाचतुर्थीदशम्येकादशीनामेकविंश्यादित्रयोदशानां त्रिपञ्चाश्याश्च त्रिष्टुप्, (२, ५, १२–१५, १७, १९–२०, ३४–३६, ३८–३९, ४१, ४३, ५१, ५४) द्वितीयापञ्चम्योर्द्वादश्यादिचतसृणां सप्तदश्येकोन-विंशीविंशीनां चतुस्त्रिंश्यादितृचस्याष्टात्रिंश्येकोनचत्वारिंश्येकचत्वारिंशीनां त्रिचत्वारिंश्येकपञ्चाशीचतु-ष्पञ्चाशीनाञ्चानुष्टुप्, (३) तृतीयाया आस्तारपङ्क्तिः, (६) षष्ठ्या भुरिगार्षी पङ्क्तिः, (७, ४५) सप्तमी-पञ्चचत्वारिंश्योर्जगती, (८, ४८–४९) अष्टम्यष्टचत्वारिंश्येकोनपञ्चाशीनां भुरिक्त्रिष्टुप्, (९) नवम्या अनुष्टुब्गर्भा विपरीतपादलक्ष्मा पङ्क्तिः (१६) षोडश्याः ककुम्मती पराबृहत्यनुष्टुप्, (१८) अष्टादश्या निचृदनुष्टुप्, (३७) सप्तत्रिंश्याः पुरस्ताद्बृहती, (४०) चत्वारिंश्याः पुरस्तात्ककुम्मत्यनुष्टुप्, (४२) द्विचत्वारिंश्यास्त्रिपदैकावसाना भुरिगार्ची गायत्री, (४४) चतुश्चत्वारिंश्या एकावसाना द्विपदार्ची बृहती, (४६) षट्चत्वारिंश्या एकावसाना द्विपदा साम्नी त्रिष्टुप्, (४७) सप्तचत्वारिंश्याः पञ्चपदा बार्हतवैराजगर्भा जगती, (५०) पञ्चाश्या उपरिष्टाद्विराड्बृहती, (५२) द्विपञ्चाश्याः पुरस्ताद्विराड्बृहती, (५५) पञ्चपञ्चाश्याश्च बृहतीगर्भा त्रिष्टुप् छन्दांसि ॥

नडमा रोह न ते अत्र लोक इदं सीसं भागधेयं त एहि ।
यो गोषु यक्ष्मः पुरुषेषु यक्ष्मस्तेन त्वं साकमधराङ्परेहि ॥१॥
अघशंसदुःशंसाभ्यां करेणानुकरेण च ।
यक्ष्मं च सर्वं तेनेतो मृत्युं च निरजामसि ॥२॥
निरितो मृत्युं निर्ऋतिं निररातिमजामसि ।
यो नो द्वेष्टि तमद्ध्यग्ने अक्रव्याद्यमु द्विष्मस्तमु ते प्र सुवामसि ॥३॥

नडम् । आ । रोह । न । ते । अत्र । लोकः । इदम् । सीसम् । भागऽधेयम् । ते । आ । इहि ।
यः । गोषु । यक्ष्मः । पुरुषेषु । यक्ष्मः । तेन । त्वम् । साकम् । अधराङ् । परा । इहि ॥ १ ॥
अघशंसऽदुःशंसाभ्याम् । करेण । अनुऽकरेण । च ।
यक्ष्मम् । च । सर्वम् । तेन । इतः । मृत्युम् । च । निः । अजामसि ॥ २ ॥
निः । इतः । मृत्युम् । निःऽऋतिम् । निः । अरातिम् । अजामसि । यः । नः । द्वेष्टि । तम् ।
अद्धि । अग्ने । अक्रव्यऽअत् । यम् । ऊं इति । द्विष्मः । तम् । ऊं इति । ते । प्र । सुवामसि ॥

XII.1.63 O mother earth, do thou kindly set me down well established; in concord with the heaven, O sage, do thou set me in fortune, in prosperity.

Agniḥ

The flesh-eating and the householder's fires

XII.2.1 Ascend the reeds; no place for thee is here, this lead is thy portion; come, what yakṣma is in kine, yakṣma in men, in company with that do thou go forth downward.

XII.2.2 By evil-plotter and ill-plotter, by actor and helper, both all yakṣma and death do we thereby drive out from here.

XII.2.3 Out from here do we drive death, perdition, out the niggard; whoso hates us, him, O non-flesh-eating Agni, do thou eat; whomso we hate.

यद्यग्निः क्रव्याद्यदि वा व्याघ्र इमं गोष्ठं प्रविवेशान्योकाः ।
तं माषाज्यं कृत्वा प्र हिणोमि दूरं स गच्छत्वप्सुषदोप्यग्नीन् ॥४॥
यत्त्वा क्रुद्धाः प्रचक्रुर्मन्युना पुरुषे मृते ।
सुकल्पमग्ने तत्त्वया पुनस्त्वोद्दीपयामसि ॥५॥
पुनस्त्वादित्या रुद्रा वसवः पुनर्ब्रह्मा वसुनीतिरग्ने ।
पुनस्त्वा ब्रह्मणस्पतिराधाद्दीर्घायुत्वाय शतशारदाय ॥६॥
यो अग्निः क्रव्यात्प्रविवेश नो गृहमिमं पश्यन्नितरं जातवेदसम् ।
तं हरामि पितृयज्ञाय दूरं स घर्ममिन्धां परमे सधस्थे ॥७॥
क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः ।
इहायमितरो जातवेदा देवो देवेभ्यो हव्यं वहतु प्रजानन् ॥८॥
क्रव्यादमग्निमिषितो हरामि जनान्दृंहन्तं वज्रेण मृत्युम् ।
नि तं शास्मि गार्हपत्येन विद्वान्पितृणां लोकेपि भागो अस्तु ॥९॥

यदि । अग्निः । क्रव्यऽअत् । यदि । वा । व्याघ्रः । इमम् । गोऽस्थम् । प्रऽविवेश । अनिऽओकाः ।
तम् । माषऽआज्यम् । कृत्वा । प्र । हिणोमि । दूरम् । सः । गच्छतु । अप्सुऽसदः । अपि । अग्नीन् ॥
यत् । त्वा । क्रुद्धाः । प्रऽचक्रुः । मन्युना । पुरुषे । मृते ।
सुऽकल्पम् । अग्ने । तत् । त्वया । पुनः । त्वा । उत् । दीपयामसि ॥ ५ ॥
पुनः । त्वा । आदित्याः । रुद्राः । वसवः । पुनः । ब्रह्मा । वसुऽनीतिः । अग्ने ।
पुनः । त्वा । ब्रह्मणः । पतिः । आ । अधात् । दीर्घायुऽत्वाय । शतऽशारदाय ॥ ६ ॥
यः । अग्निः । क्रव्यऽअत् । प्रऽविवेश । नः । गृहम् । इमम् । पश्यन् । इतरम् । जातऽवेदसम् ।
तम् । हरामि । पितृऽयज्ञाय । दूरम् । सः । घर्मम् । इन्धाम् । परमे । सधऽस्थे ॥ ७ ॥
क्रव्यऽअदम् । अग्निम् । प्र । हिणोमि । दूरम् । यमऽराज्ञः । गच्छतु । रिप्रऽवाहः ।
इह । अयम् । इतरः । जातऽवेदाः । देवः । देवेभ्यः । हव्यम् । वहतु । प्रऽजानन् ॥ ८ ॥
क्रव्यऽअदम् । अग्निम् । इषितः । हरामि । जनान् । दृंहन्तम् । वज्रेण । मृत्युम् ।
नि । तम् । शास्मि । गार्हऽपत्येन । विद्वान् । पितृणाम् । लोके । अपि । भागः । अस्तु ॥

XII.2.4 If the flesh-eating Agni, or if the tiger-like, hath entered this stall, being not at home, him having made him to have beans for sacrificial butter, I send far forth; let him go unto the Agnis that have seat in the waters.

XII.2.5 If angry men put thee forth, with fury, a man having died, that O Agni, is easy to be arranged by thee; we make thee flame up again.

XII.2.6 The Ādityas, the Rudras, the Vasus (have set) thee again; again, O Agni, the priest, conductor of good; Brahmaṇaspati hath set thee again, in order to length of life-time to a hundred autumns.

XII.2.7 If the flesh-eating Agni hath entered our house, seeing this other Jātavedas, him I take after for the Father's sacrifice; let him kindle the hot drink in the highest station.

XII.2.8 I send far forth the flesh-eating Agni; let him go, carrying evil, to Yama's subjects; here let this other Jātavedas carry the oblation, a god to the gods, foreknowing.

XII.2.9 I, being sent, take the flesh-eating Agni, a death, making people fixed with the thuderbolt; I, knowing, separate him from the householder's fire; also in the world of the Father's be he (their) portion.

क्र॒व्याद॑म॒ग्निं श॑शमा॒नमु॒क्थ्यं॑१ प्र हि॑णोमि प॒थिभिः॑ पितृ॒याणैः॑ ।
मा दे॑व॒याने॒ः पुन॒रा गा॒ अत्रै॒वैधि॑ पि॒तृषु॑ जागृहि॒ त्वम् ॥१०॥
समि॑न्धते॒ संक॑सुकं स्व॒स्तये॑ शु॒द्धा भव॑न्तः॒ शुच॑यः पाव॒काः ।
जहा॑ति रि॒प्रमत्येन॑ एति॒ समि॑द्धो अ॒ग्निः सु॒पुना॑ पुनाति ॥११॥
दे॒वो अ॒ग्निः संक॑सुको दि॒वस्पृ॒ष्ठान्यारु॑हत् ।
मु॒च्यमा॑नो॒ निरेण॒सोमो॑ग॒स्माँ अशा॑स्त्याः ॥१२॥
अ॒स्मिन्व॒यं संक॑सुके अ॒ग्नौ रि॒प्राणि॑ मृज्महे ।
अभू॑म य॒ज्ञिया॑ः शु॒द्धाः प्र ण॒ आयूं॑षि तारिषत् ॥१३॥
संक॑सुको॒ विक॑सुको निर्ऋ॒थो यश्च॑ निस्व॒रः ।
ते ते॒ यक्ष्मं॒ सवे॑दसो दू॒राद्दू॒रम॑नीनशन् ॥१४॥
यो नो॒ अश्वे॑षु वी॒रेषु॒ यो नो॒ गोष्व॑जा॒विषु॑ ।
क्र॒व्यादं॒ निर्णु॑दामसि॒ यो अ॒ग्निर्ज॑न॒योप॑नः ॥१५॥

क्र॒व्य॒ऽअद॑म् । अ॒ग्निम् । श॒श॒मा॒नम् । उ॒क्थ्य॑म् । प्र । हि॒णो॒मि॒ । प॒थिऽभिः॑ । पि॒तृ॒ऽयानैः॑ ।
मा । दे॒व॒ऽयानैः॑ । पुन॑रिति । आ । गा॒ः । अत्र॑ । ए॒व । ए॒धि॒ । पि॒तृषु॑ । जा॒गृ॒हि॒ । त्वम् ॥
सम् । इ॒न्ध॒ते॒ । सम्ऽक॑सुकम् । स्व॒स्तये॑ । शु॒द्धाः । भव॑न्तः । शुच॑यः । पा॒व॒काः ।
जहा॑ति । रि॒प्रम् । अति॑ । एन॑ः । ए॒ति॒ । सम्ऽइ॑द्धः । अ॒ग्निः । सु॒ऽपुना॑ । पु॒ना॒ति॒ ॥११॥
दे॒वः । अ॒ग्निः । सम्ऽक॑सुकः । दि॒वः । पृ॒ष्ठानि॑ । आ । अ॒रु॒ह॒त् ।
मु॒च्यमा॑नः । निः । एन॑सः । अमो॑क् । अ॒स्मान् । अशा॑स्त्याः ॥ १२ ॥
अ॒स्मिन् । व॒यम् । सम्ऽक॑सुके । अ॒ग्नौ । रि॒प्राणि॑ । मृ॒ज्म॒हे॒ ।
अभू॑म । य॒ज्ञिया॑ः । शु॒द्धाः । प्र । न॒ः । आयूं॑षि । ता॒रि॒ष॒त् ॥ १३ ॥
सम्ऽक॑सुकः । विऽक॑सुकः । नि॒ःऽऋ॒थः । यः । च॒ । नि॒ऽस्व॒रः ।
ते । ते॒ । यक्ष्म॑म् । सऽवे॑दसः । दू॒रात् । दू॒रम् । अ॒नी॒न॒श॒न् ॥ १४ ॥
यः । न॒ः । अश्वे॑षु । वी॒रेषु॑ । यः । न॒ः । गोषु॑ । अ॒ज॒ऽअ॒विषु॑ ।
क्र॒व्य॒ऽअद॑म् । निः । नु॒दा॒मा॒सि॒ । यः । अ॒ग्निः । ज॒न॒ऽयोप॑नः ॥ १५ ॥

XII.2.10 The flesh-eating Agni, active, praiseworthy, I send forth by the roads that the Fathers go; come thou not back by those that the gods go; be thou just there; watch thou over the Fathers.

XII.2.11 They kindle the devouring one in order to well-being, becoming cleansed, purifyng; he abandons evil, passes over sin; Agni, kindled, purifies with a good purifier.

XII.2.12 God Agni the devouring hath ascended the backs of the sky; being released out of sin, he hath released us from imprecation.

XII.2.13 On this devouring Agni do we wipe off evils; we have become fit for sacrifice, cleansed; may he prolong our life-times.

XII.2.14 The crushing, the bursting, the destroying and the noiseless -- they, of like possessions, have made from far thy yakṣma to disappear afar.

XII.2.15 The flesh-eating one that is in our horses, heroes, that is in our kine, goats and sheep, do we thrust out -- the fire that obstructs the people.

अन्येभ्यस्त्वा पुरुषेभ्यो गोभ्यो अश्वेभ्यस्त्वा ।
निः क्रव्यादं नुदामसि यो अग्निर्जीवितयोपनः ॥१६॥
यस्मिन्देवा अमृजत यस्मिन्मनुष्या उत ।
तस्मिन्घृतस्तावो मृष्ट्वा त्वमग्ने दिवं रुह ॥१७॥
समिद्धो अग्न आहुत स नो माभ्यपक्रमीः ।
अत्रैव दीदिहि द्यवि ज्योक्च सूर्यं दृशे ॥१८॥
सीसे मृड्ढ्वं नडे मृड्ढ्वमग्नौ संकसुके च यत् ।
अथो अव्यां रामायां शीर्षक्तिमुपबर्हणे ॥१९॥
सीसे मलं सादयित्वा शीर्षक्तिमुपबर्हणे ।
अव्यामसिक्न्यां मृष्ट्वा शुद्धा भवत यज्ञियाः ॥२०॥
परं मृत्यो अनु परेहि पन्थां यस्त एष इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमीहेमे वीरा बहवो भवन्तु ॥२१॥

अन्येभ्यः । त्वा । पुरुषेभ्यः । गोभ्यः । अश्वेभ्यः । त्वा ।
निः । क्रव्यऽअदम् । नुदामसि । यः । अग्निः । जीवितऽयोपनः ॥ १६ ॥
यस्मिन् । देवाः । अमृजत । यस्मिन् । मनुष्याः । उत ।
तस्मिन् । घृतऽस्तावः । मृष्ट्वा । आ । त्वम् । अग्ने । दिवम् । रुह ॥ १७ ॥
समऽइद्धः । अग्ने । आहुत । सः । नः । मा । अभिऽअपक्रमीः ।
अत्र । एव । दीदिहि । द्यवि । ज्योक् । च । सूर्यम् । दृशे ॥ १८ ॥
सीसे । मृड्ढ्वम् । नडे । मृड्ढ्वम् । अग्नौ । समऽकसुके । च । यत् ।
अथो इति । अव्याम् । रामायाम् । शीर्षक्तिम् । उपऽबर्हणे ॥ १९ ॥
सीसे । मलम् । सादयित्वा । शीर्षक्तिम् । उपऽबर्हणे ।
अव्याम् । असिक्न्याम् । मृष्ट्वा । शुद्धाः । भवत । यज्ञियाः ॥ २० ॥
परम् । मृत्यो इति । अनु । परा । इहि । पन्थाम् । यः । ते । एषः । इतरः । देवऽयानात् ।
चक्षुष्मते । शृण्वते । ते । ब्रवीमि । इह । इमे । वीराः । बहवः । भवन्तु ॥२१॥

XII.2.16 Thee from inexhaustible men, kine, horses, thee the flesh-eating one do we thrust out -- the fire that obstructs life.

XII.2.17 On what the gods wiped off, on what human beings also -- on that having wiped off the drops of ghee, O Agni, do thou mount the sky.

XII.2.18 Being kindled, O Agni, thou to whom oblations are made, go thou not away against us; shine just here by day, and that (we) long see the sun.

XII.2.19 Wipe ye off on the lead; wipe ye off on the reeds; and what on the consuming fire; likewise on the dark ewe; headache on the pillow.

XII.2.20 Having settled what is foul upon the lead and headache upon the pillow, having wiped off on the black ewe, be ye cleansed, fit for sacrifice.

Mṛtyuḥ

XII.2.21 Go away, O death, along a distant road which is thine here, other than that the gods go upon; I speak to thee having sight, hearing; let these many heroes be here.

इमे जीवा वि मृतैराववृत्रन्नभूद्भद्रा देवहूतिर्नो अद्य ।
प्राञ्चो अगाम नृतये हसाय सुवीरासो विदथमा वदेम ॥२२॥
इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम् ।
शतं जीवन्तः शरदः पुरूचीस्तिरो मृत्युं दधतां पर्वतेन ॥२३॥
आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति स्थ ।
तान्वस्त्वष्टा सुजनिमा सजोषाः सर्वमायुर्नयतु जीवनाय ॥२४॥
यथाहान्यनुपूर्वं भवन्ति यथर्तव ऋतुभिर्यन्ति साकम् ।
यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम् ॥२५॥
अश्मन्वती रीयते सं रभध्वं वीरयध्वं प्र तरता सखायः ।
अत्रा जहीत ये असन्दुरेवा अनमीवानुत्तरेमाभि वाजान् ॥२६॥
उत्तिष्ठता प्र तरता सखायोऽश्मन्वती नदी स्यन्दत इयम् ।
अत्रा जहीत ये असन्नशिवाः शिवान्त्स्योनानुत्तरेमाभि वाजान् ॥२७॥

इमे । जीवाः । वि । मृतैः । आ । अववृत्रन् । अभूत् । भद्रा । देवऽहूतिः । नः । अद्य ।
प्राञ्चः । अगाम । नृतये । हसाय । सुऽवीरासः । विदथम् । आ । वदेम ॥ २२ ॥
इमम् । जीवेभ्यः । परिऽधिम् । दधामि । मा । एषाम् । नु । गात् । अपरः । अर्थम् । एतम् ।
शतम् । जीवन्तः । शरदः । पुरूचीः । तिरः । मृत्युम् । दधताम् । पर्वतेन ॥ २३ ॥
आ । रोहत । आयुः । जरसम् । वृणानाः । अनुऽपूर्वम् । यतमानाः । यति । स्थ ।
तान् । वः । त्वष्टा । सुऽजनिमा । सऽजोषाः । सर्वम् । आयुः । नयतु । जीवनाय ॥ २४॥
यथा । अहानि । अनुऽपूर्वम् । भवन्ति । यथा । ऋतवः । ऋतुऽभिः । यन्ति । साकम् ।
यथा । न । पूर्वम् । अपरः । जहाति । एव । धातः । आयूंषि । कल्पय । एषाम् ॥ २५ ॥
अश्मन्ऽवती । रीयते । सम् । रभध्वम् । वीरयध्वम् । प्र । तरत । सखायः ।
अत्र । जहीत । ये । असन् । दुःऽएवाः । अनमीवान् । उत् । तरेम । अभि । वाजान् ॥
उत् । तिष्ठत । प्र । तरत । सखायः । अश्मन्ऽवती । नदी । स्यन्दते । इयम् ।
अत्र । जहीत । ये । असन् । अशिवाः । शिवान् । स्योनान् । उत् । तरेम । अभि । वाजान् ॥

XII.2.22 These living ones have turned away from the dead; our invocation of the gods hath been auspicious today; we have gone forward unto dancing, unto laughter; may we, rich in heroes, address counsel.

XII.2.23 I set this enclosure for the living; let not another of them now go to that goal; living a hundred numerous autumns, let them set an obstacle to death with a mountain.

XII.2.24 Mount, choosing old age for life-time, pressing on, one after another, as many as ye be; you here let Tvaṣṭṛ, him of good births, in accord, lead on to living your whole life-time.

XII.2.25 As days take place one after another, as seasons go along with seasons, as an after one does not desert a preceding -- so O creator, arrange their life-times.

XII.2.26 The stony one flows; take ye hold together; play the hero, pass over, O friends; quit them that are of evil courses; may we pass up unto powers that are free from disease.

XII.2.27 Stand up, pass over, O friends; the stony river here runs; quit ye here them that are unpropitious; may we pass up unto propitious pleasant powers.

वैश्वदेवीं वर्चस आ रभध्वं शुद्धा भवन्तः शुचयः पावकाः ।
अतिक्रामन्तो दुरिता पदानि शतं हिमाः सर्ववीरा मदेम ॥२८॥
उदीचीनैः पथिभिर्वायुमद्भिरतिक्रामन्तोवरान्परेभिः ।
त्रिः सप्त कृत्व ऋषयः परेता मृत्युं प्रत्यौहन्पदयोपनेन ॥२९॥
मृत्योः पदं योपयन्त एत द्राघीय आयुः प्रतरं दधानाः ।
आसीना मृत्युं नुदता सधस्थेथ जीवासो विदथमा वदेम ॥३०॥
इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा सं स्पृशन्ताम् ।
अनश्रवो अनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥३१॥
व्याकरोमि हविषाहमेतौ तौ ब्रह्मणा व्य१हं कल्पयामि ।
स्वधां पितृभ्यो अजरां कृणोमि दीर्घेणायुषा समिमान्त्सृजामि ॥३२॥
यो नो अग्निः पितरो हृत्स्व१न्तराविवेशामृतो मर्त्येषु ।
मय्यहं तं परि गृह्णामि देवं मा सो अस्मान्द्विक्षत मा वयं तम् ॥३३॥

वैश्वऽदेवीम् । वर्चसे । आ । रभध्वम् । शुद्धाः । भवन्तः । शुचयः । पावकाः ।
अतिऽक्रामन्तः । दुःऽइता । पदानि । शतम् । हिमाः । सर्वऽवीराः । मदेम ॥ २८ ॥
उदीचीनैः । पथिऽभिः । वायुमत्ऽभिः । अतिऽक्रामन्तः । अवरान् । परेभिः ।
त्रिः । सप्त । कृत्वः । ऋषयः । पराऽइताः । मृत्युम् । प्रति । औहन् । पदऽयोपनेन ॥
मृत्योः । पदम् । योपयन्तः । आ । इत । द्राघीयः । आयुः । प्रऽतरम् । दधानाः ।
आसीनाः । मृत्युम् । नुदत । सधऽस्थे । अथ । जीवासः । विदथम् । आ । वदेम ॥३०॥
इमाः । नारीः । अविधवाः । सुऽपत्नीः । आऽअञ्जनेन । सर्पिषा । सम् । स्पृशन्ताम् ।
अनश्रवः । अनमीवाः । सुऽरत्नाः । आ । रोहन्तु । जनयः । योनिम् । अग्रे ॥ ३१ ॥
विऽआकरोमि । हविषा । अहम् । एतौ । तौ । ब्रह्मणा । वि । अहम् । कल्पयामि ।
स्वधाम् । पितृऽभ्यः । अजराम् । कृणोमि । दीर्घेण । आयुषा । सम् । इमान् । सृजामि ॥
यः । नः । अग्निः । पितरः । हृत्ऽसु । अन्तः । आऽविवेश । अमृतः । मर्त्येषु । मयि ।
अहम् । तम् । परि । गृह्णामि । देवम् । मा । सः । अस्मान् । द्विक्षत । मा । वयम् । तम् ॥

XII.2.28 Take ye hold on that of all the gods in order to splendor, becoming cleansed clear purifying; stepping over difficult tracks, may we revel a hundred winters with all our heroes.

XII.2.29 By upward roads, full of wind, by distant ones, stepping over those that are lower, thrice seven times did the departed seers bear back death with the track-obstructor.

XII.2.30 Come ye, obstructing the track of death, assuming further on a longer life-time; sitting in your station, thrust ye death; then may we, living, speak to the council.

XII.2.31 Let these women, not widows, well-spoused, touch themselves with ointment, with butter; tearless, without disease, with good treasures, let the wives ascend first to the place of union.

XII.2.32 I separate these two by oblation; I shape them apart with a spell; I make for the Fathers unwasting svadhā; I unite these with a long life-time.

XII.2.33 What Agni, O Fathers, hath entered into our hearts, an immortal into mortals, that god do I enclose in me; let him not hate us, nor let us (hate) him.

अपावृत्य गार्हपत्यात्क्रव्यादा प्रेत दक्षिणा ।
प्रियं पितृभ्य आत्मने ब्रह्मभ्यः कृणुता प्रियम् ॥३४॥
द्विभागधनमादाय प्र क्षिणात्यवर्त्या ।
अग्निः पुत्रस्य ज्येष्ठस्य यः क्रव्यादनिराहितः ॥३५॥
यत्कृषते यद्वनुते यच्च वस्नेन विन्दते ।
सर्वं मर्त्यस्य तन्नास्ति क्रव्याच्चेदनिराहितः ॥३६॥
अयज्ञियो हतवर्चा भवति नैनेन हविरत्तवे ।
छिनत्ति कृष्या गोर्धनाद्यं क्रव्यादनुवर्तते ॥३७॥
मुहुर्गृध्यैः प्र वदत्यार्तिं मर्त्यो नीत्य ।
क्रव्याद्यानग्निरन्तिकादनुविद्वान्वितावति ॥३८॥
ग्राह्या गृहाः सं सृज्यन्ते स्त्रिया यन्म्रियते पतिः ।
ब्रह्मैव विद्वानेष्यो३ यः क्रव्यादं निरादधत् ॥३९॥

अपऽआवृत्य । गार्हऽपत्यात् । क्रव्यऽअदा । प्र । इत । दक्षिणा ।
प्रियम् । पितृऽभ्यः । आत्मने । ब्रह्मऽभ्यः । कृणुत । प्रियम् ॥ ३४ ॥
द्विभागऽधनम् । आऽदाय । प्र । क्षिणाति । अवर्त्या ।
अग्निः । पुत्रस्य । ज्येष्ठस्य । यः । क्रव्यऽअत् । अनिःऽआहितः ॥ ३५ ॥
यत् । कृषते । यत् । वनुते । यत् । च । वस्नेन । विन्दते ।
सर्वम् । मर्त्यस्य । तत् । न । अस्ति । क्रव्यऽअत् । च । इत् । अनिःऽआहितः ॥ ३६ ॥
अयज्ञियः । हतऽवर्चाः । भवति । न । एनेन । हविः । अत्तवे ।
छिनत्ति । कृष्याः । गोः । धनात् । यम् । क्रव्यऽअत् । अनुऽवर्तते ॥ ३७ ॥
मुहुः । गृध्यैः । प्र । वदति । आर्तिम् । मर्त्यः । निऽइत्य ।
क्रव्यऽअत् । यान् । अग्निः । अन्तिकात् । अनुऽविद्वान् । विऽतावति ॥ ३८ ॥
ग्राह्याः । गृहाः । सम् । सृज्यन्ते । स्त्रियाः । यत् । म्रियते । पतिः ।
ब्रह्मा । एव । विद्वान् । एष्यः । यः । क्रव्यऽअदम् । निःऽआदधत् ॥ ३९ ॥

Agniḥ

XII.2.34 Having turned away from the householder's fire, go ye forth to the right with the flesh-eating one; do ye what is dear to the Fathers, to self, what is dear to the priests.

XII.2.35 The flesh-eating Agni that is unremoved, taking to himself the double-portioned riches of the oldest son, destroys him with ruin.

XII.2.36 What one plows, what one wins, and what one gains by pay -- all that is not a mortal's; if the flesh-eating one be unremoved.

XII.2.37 He becomes unfit for sacrifice, of smitten splendor; not by him is the oblation to be eaten; (him) the flesh-eating one cuts off from plowing, kine, riches, whom it pursues.

XII.2.38 A mortal, going down to mishap, speaks forth repeatedly with greedy ones; whom the flesh-eating Agni, from near by after-knowing, follows.

XII.2.39 The houses are united with seizure when a woman's husband dies; a knowing priest is to be sought, who shall remove the flesh-eating one.

यद्रिप्रं शमलं चकृम यच्च दुष्कृतम् ।
आपो मा तस्माच्छुम्भन्त्वग्नेः संकसुकाच्च यत् ॥४०॥

ता अधरादुदीचीराववृत्रन्प्रजानतीः पथिभिर्देवयानैः ।
पर्वतस्य वृषभस्याधि पृष्ठे नवाश्चरन्ति सरितः पुराणीः ॥४१॥

अग्ने अक्रव्यान्निः क्रव्यादं नुदा देवयजनं वह ॥४२॥

इमं क्रव्यादा विवेशायं क्रव्यादमन्वगात् ।
व्याघ्रौ कृत्वा नानानं तं हरामि शिवापरम् ॥४३॥

अन्तर्धिर्देवानां परिधिर्मनुष्याणामग्निर्गार्हपत्य उभयानन्तरा श्रितः ॥४४॥

जीवानामायुः प्र तिर त्वमग्ने पितृणां लोकमपि गच्छन्तु ये मृताः ।
सुगार्हपत्यो वितपन्नरातिमुषामुषां श्रेयसीं धेह्यस्मै ॥४५॥

सर्वानग्ने सहमानः सपत्नानैषामूर्जं रयिमस्मासु धेहि ॥४६॥

यत् । रिप्रम् । शमलम् । चकृम । यत् । च । दुःऽकृतम् ।
आपः । मा । तस्मात् । शुम्भन्तु । अग्नेः । समऽकसुकात् । च । यत् ॥ ४० ॥

ताः । अधरात् । उदीचीः । आ । अववृत्रन् । प्रऽजानतीः । पथिऽभिः । देवऽयानैः ।
पर्वतस्य । वृषभस्य । अधि । पृष्ठे । नवाः । चरन्ति । सरितः । पुराणीः ॥ ४१ ॥

अग्ने । अक्रव्यऽअत् । निः । क्रव्यऽअदम् । नुद । आ । देवऽयजनम् । वह ॥ ४२ ॥

इमम् । क्रव्यऽअत् । आ । विवेश । अयम् । क्रव्यऽअदम् । अनु । अगात् ।
व्याघ्रौ । कृत्वा । नानानम् । तम् । हरामि । शिवऽअपरम् ॥ ४३ ॥

अन्तःऽधिः । देवानाम् । परिऽधिः । मनुष्याणाम् । अग्निः । गार्हऽपत्यः । उभयान् । अन्तरा । श्रितः ॥

जीवानाम् । आयुः । प्र । तिर । त्वम् । अग्ने । पितृणाम् । लोकम् । अपि । गच्छन्तु । ये । मृताः ।
सुऽगार्हपत्यः । विऽतपन् । अरातिम् । उषामऽउषाम् । श्रेयसीम् । धेहि । अस्मै ॥ ४५ ॥

सर्वान् । अग्ने । सहमानः । सऽपत्नान् । आ । एषाम् । ऊर्जम् । रयिम् । अस्मासु । धेहि ॥

XII.2.40 What evil, pollution we have committed, and what ill - doing, from that let the waters cleanse me, and also from the crushing Agni.

XII.2.41 These fore-knowing ones have turned hither upward from below by roads that the gods go upon; upon the back of the virile mountain the ancient streams go about new.

XII.2.42 O non-flesh-eating Agni, push out the flesh-eating one; bring the god-sacrificing one.

XII.2.43 The flesh-eating one entered into this man; he has gone after the flesh-eating one; having made two tigers severally, I take him, who is other than propitious.

XII.2.44 Concealment of the gods, defense of men, the householder's fire is set between both classes.

XII.2.45 Lengthen thou out, O Agni, the life-time of the living; let them who are dead go unto the world of the Fathers; do thou, a good householder's fire, burning away the niggard, assign to this man an ever better dawn.

XII.2.46 Overcoming, O Agni; all (our) rivals, do thou assign to us their refreshment and wealth.

इममिन्द्रं वह्निं पप्रिमन्वारभध्वं स वो निर्वक्षद्दुरितादवद्यात् ।
तेनाप हत शरुमापतन्तं तेन रुद्रस्य परि पातास्ताम् ॥४७॥
अनड्वाहं प्लवमन्वारभध्वं स वो निर्वक्षद्दुरितादवद्यात् ।
आ रोहत सवितुर्नावमेतां षड्भिरुर्वीभिरमतिं तरेम ॥४८॥
अहोरात्रे अन्वेषि बिभ्रत्क्षेम्यस्तिष्ठन्प्रतरणः सुवीरः ।
अनातुरान्त्सुमनसस्तल्प बिभ्रज्ज्योगेव नः पुरुषगन्धिरेधि ॥४९॥
ते देवेभ्य आ वृश्चन्ते पापं जीवन्ति सर्वदा ।
क्रव्याद्यानग्निरन्तिकादश्व इवानुवपते नडम् ॥५०॥
येऽश्रद्धा धनकाम्या क्रव्यादा समासते ।
ते वा अन्येषां कुम्भीं पर्यादधति सर्वदा ॥५१॥
प्रेव पिपतिषति मनसा मुहुरा वर्तते पुनः ।
क्रव्याद्यानग्निरन्तिकादनुविद्वान्वितावति ॥५२॥

इमम । इन्द्रम् । वह्निम् । पप्रिम् । अनुऽआरभध्वम् । सः । वः । निः । वक्षत् । दुःऽइतात् ।
अवद्यात् । तेन । अप । हत । शरुम् । आऽपतन्तम् । तेन । रुद्रस्य । परि । पात । अस्ताम् ॥
अनड्वाहम् । प्लवम् । अनुऽआरभध्वम् । सः । वः । निः । वक्षत् । दुःऽइतात् । अवद्यात् ।
आ । रोहत । सवितुः । नावम् । एताम् । षट्ऽभिः । उर्वीभिः । अमतिम् । तरेम ॥ ४८ ॥

अहोरात्रे इति । अनु । एषि । बिभ्रत् । क्षेम्यः । तिष्ठन् । प्रऽतरणः । सुऽवीरः ।
अनातुरान् । सुऽमनसः । तल्प । बिभ्रत् । ज्योक् । एव । नः । पुरुषऽगन्धिः । एधि ॥ ४९॥

ते । देवेभ्यः । आ । वृश्चन्ते । पापम् । जीवन्ति । सर्वदा ।
क्रव्यऽअत् । यान् । अग्निः । अन्तिकात् । अश्वःऽइव । अनुऽवपते । नडम् ॥ ५० ॥

ये । अश्रद्धाः । धनऽकाम्या । क्रव्यऽअदा । सम्ऽआसते ।
ते । वै । अन्येषाम् । कुम्भीम् । परिऽआदधति । सर्वदा ॥ ५१ ॥

प्रऽइव । पिपतिषति । मनसा । मुहुः । आ । वर्तते । पुनः ।
क्रव्यऽअत् । यान् । अग्निः । अन्तिकात् । अनुऽविद्वान् । विऽतावति ॥ ५२ ॥

XII.2.47 Take ye hold after this saving carrier Indra : he shall carry you out of difficulty and reproach; by him smite away the on-flying shaft; by him ward off Rudra's hurled missile.

XII.2.48 Lay ye hold after the draft-ox (as) float; he shall carry you out of difficulty and reproach; mount this boat of Savitṛ ; may we cross over misery by the six wide direction.

XII.2.49 Day and night thou goest after, bearing, standing comfortable, prolonging (life), having good heroes; bearing, O couch, healthful, well-minded ones, do thou long be for us smelling of men.

XII.2.50 They fall under the wrath of the gods, they live always evilly, after whom the flesh-eating fire, from near by, like a horse, scatters reeds.

XII.2.51 Whoever, without faith, from desire of riches then sit together with the flesh-eating one, they verily feed the fire about the pot of others.

XII.2.52 He desires, as it were, to fly forth with his mind; repeatedly he returns again-- they whom the flesh-eating Agni, from near by, after knowing follows.

अविः कृष्णा भागधेयं पशूनां सीसं क्रव्यादपि चन्द्रं त आहुः ।
माषाः पिष्टा भागधेयं ते हव्यमरण्यान्या गह्वरं सचस्व ॥५३॥
इषीकां जरतीमिष्ट्वा तिल्पिञ्जं दण्डनं नडम् ।
तमिन्द्र इध्मं कृत्वा यमस्याग्निं निरादधौ ॥५४॥
प्रत्यञ्चमर्कं प्रत्यर्पयित्वा प्रविद्वान्पन्थां वि ह्याविवेश ।
परामीषामसून्दिदेश दीर्घेणायुषा समिमान्त्सृजामि ॥५५॥

अविः । कृष्णा । भागऽधेयम् । पशूनाम् । सीसम् । क्रव्यऽअत् । अपि । चन्द्रम् । ते ।
आहुः । माषाः । पिष्टाः । भागऽधेयम् । ते । हव्यम् । अरण्यान्याः । गह्वरम् । सचस्व ॥५३॥
इषीकाम् । जरतीम् । इष्ट्वा । तिल्पिञ्जम् । दण्डनम् । नडम् ।
तम् । इन्द्रः । इध्मम् । कृत्वा । यमस्य । अग्निम् । निःऽआदधौ ॥ ५४ ॥
प्रत्यञ्चम् । अर्कम् । प्रतिऽअर्पयित्वा । प्रऽविद्वान् । पन्थाम् । वि । हि । आऽविवेश ।
परा । अमीषाम् । असून् । दिदेश । दीर्घेण । आयुषा । सम् । इमान् । सृजामि ॥५५॥

(३) तृतीयं सूक्तम्

(१–६०) षष्टयृचस्यास्य सूक्तस्य यम ऋषिः । स्वर्गौदनाग्नयो देवताः । (१, ४२–४३, ४७) प्रथमर्चो द्विचत्वारिंशी-त्रिचत्वारिंशीसप्तचत्वारिंशीनाञ्च भुरिक्त्रिष्टुप्, (२–७, ९–११, १४–१६, १८–२०, २३, २५–३३, ३५–३८ ४०–४१, ४५–४६, ४८–५४) द्वितीयादितृचद्वयस्य नवम्यादितृचस्य चतुर्दश्यादितृचस्याष्टादश्यादितृचस्य त्रयोविंश्याः पञ्चविंश्यादिनवानां पञ्चत्रिंश्यादिचतसृणां चत्वारिंश्येकचत्वारिंशीपञ्चचत्वारिंशीषट्चत्वारिंशीनामष्टचत्वारिंश्यादिसप्तानाञ्च त्रिष्टुप्, (८, १२, २१–२२, २४) अष्टमीद्वादश्येकविंशीद्वाविंशीचतुर्विंशीनां जगती, (१३, १७) त्रयोदशीसप्तदश्योः स्वराडार्षी पङ्क्तिः, (३४) चतुस्त्रिंश्या विराड्गर्भा त्रिष्टुप्, (३९) एकोनचत्वारिंश्या अनुष्टुब्गर्भा त्रिष्टुप्, (४४) चतुश्चत्वारिंश्याः पराबृहती त्रिष्टुप्; (५५–६०) पञ्चपञ्चाश्यादिषण्णाञ्च त्र्यवसाना सप्तपदा शङ्कुमत्यतिजागतशाक्वरातिशाक्वरधात्र्यगर्भातिधृतिश्छन्दांसि [(५६) षट्पञ्चाश्या विराट् कृतिः, अवशिष्टानाञ्च कृतिः] ॥

पुमान्पुंसोधि तिष्ठ चर्मेहि तत्र ह्वयस्व यतमा प्रिया ते ।
यावन्तावग्रे प्रथमं समेयथुस्तद्वां वयो यमराज्ये समानम् ॥१॥

पुमान् । पुंसः । अधि । तिष्ठ । चर्म । इहि । तत्र । ह्वयस्व । यतमा । प्रिया । ते ।
यावन्तौ । अग्रे । प्रथमम् । सम्ऽएयथुः । तत् । वाम् । वयः । यमऽराज्ये । समानम् ॥१॥

XII.2.53 A black ewe of cattle portion; lead, too, they call thy gold, O flesh-eating one; ground beans are thy portion (as) oblation; seek thou the thicket of the forest-spirit.

XII.2.54 Having made offering of withered cane, of tilpiñja, of daṇḍana, of reeds; having made fuel of this, Indra removed Yama's fire.

XII.2.55 Having sent in opposition an opposing song, I, foreknowing, have entered abroad on the road; I have directed away the lifebreaths of them yonder; these here I unite with long lifetime.

Cremation as a sacrifice

XII.3.1 Stand, a man, upon men; go to the hide; call thither her who is dear to thee; of what age ye two first came together in the beginning, let that be your same age in Yama's realm.

तावद्वां चक्षुस्तति वीर्याणि तावत्तेजस्ततिधा वाजिनानि ।
अग्निः शरीरं सचते यदैधोधा पक्वान्मिथुना सं भवाथः ॥२॥
समस्मिँल्लोके समु देवयाने सं स्मा समेतं यमराज्येषु ।
पूतौ पवित्रैरुप तद्ध्वयेथां यद्यद्रेतो अधि वां संबभूव ॥३॥
आपस्पुत्रासो अभि सं विशध्वमिमं जीवं जीवधन्याः समेत्य ।
तासां भजध्वममृतं यमाहुर्यमोदनं पचति वां जनित्री ॥४॥
यं वां पिता पचति यं च माता रिप्रान्निर्मुक्त्यै शमलाच्च वाचः ।
स ओदनः शतधारः स्वर्ग उभे व्याप नभसी महित्वा ॥५॥
उभे नभसी उभयांश्च लोकान्ये यज्वनामभिजिताः स्वर्गाः ।
तेषां ज्योतिष्मान्मधुमान्यो अग्रे तस्मिन्पुत्रैर्जरसि सं श्रयेथाम् ॥६॥
प्राचींप्राचीं प्रदिशमा रभेथामेतं लोकं श्रद्दधानाः सचन्ते ।
यद्वां पक्वं परिविष्टमग्नौ तस्य गुप्तये दम्पती सं श्रयेथाम् ॥७॥

तावत् । वाम् । चक्षुः । तति । वीर्याणि । तावत् । तेजः । ततिऽधा । वाजिनानि ।
अग्निः । शरीरम् । सचते । यदा । एधः । अध । पक्वात् । मिथुना । सम् । भवाथः ।
सम् । अस्मिन् । लोके । सम् । ऊं इति । देवऽयाने । सम् । स्म । सम्ऽएतम् । यमऽराज्येषु ।
पूतौ । पवित्रैः । उप । तत् । ह्वयेथाम् । यत्ऽयत् । रेतः । अधि । वाम् । सम्ऽबभूव ॥ ३ ॥
आपः । पुत्रासः । अभि । सम् । विशध्वम् । इमम् । जीवम् । जीवऽधन्याः । सम्ऽएत्य ।
तासाम् । भजध्वम् । अमृतम् । यम् । आहुः । यम् । ओदनम् । पचति । वाम् । जनित्री ॥४॥
यम् । वाम् । पिता । पचति । यम् । च । माता । रिप्रात् । निःऽमुक्त्यै । शमलात् । च ।
वाचः । सः । ओदनः । शतऽधारः । स्वःऽगः । उभे इति । वि । आप । नभसी इति । महिऽत्वा ॥५॥
उभे इति । नभसी इति । उभयान् । च । लोकान् । ये । यज्वनाम् । अभिऽजिताः । स्वःऽगाः ।
तेषाम् । ज्योतिष्मान् । मधुऽमान् । यः । अग्रे । तस्मिन् । पुत्रैः । जरसि । सम् । श्रयेथाम् ॥६॥
प्राचीम्ऽप्राचीम् । प्रऽदिशम् । आ । रभेथाम् । एतम् । लोकम् । श्रत्ऽदधानाः । सचन्ते ।
यत् । वाम् । पक्वम् । परिऽविष्टम् । अग्नौ । तस्य । गुप्तये । दंपती इति दम्ऽपती । सम् ।
श्रयेथाम् ॥ ७ ॥

XII.3.2 So much (be) your sight, so many your powers, so great your brilliancy, so many-fold your energies; Agni fastens on the body when (it is his) fuel; then, O paired ones, shall ye come into being from what is cooked.

XII.3.3 Together in this world, together on the (road) the gods travel, together also unite ye in the realms of Yama; purified by purifiers, call ye to yourselves whatever seed came into being from you.

XII.3.4 Enter together, you sons, into the waters, coming together, you rich in life, unto this living one; of them share you the one which they call immortal, the rice-dish which your generatrix cooks.

XII.3.5 What one your father cooks, and what one mother, in order to release from evil and from pollution of speech – that hundred-streamed, heaven-going rice-dish had permeated with greatness both firmaments.

XII.3.6 Both firmaments, and worlds of both kinds, what heaven-going ones are conquered of the sacrificers – which one of them is chiefly full of light, full of honey, in that combine ye with your sons in old age.

XII.3.7 Take you hold upon each forward direction; to this world they that have faith attach themselves; what of you that is cooked is served up in the fire, combine you, O husband and wife, in order to its guarding.

दक्षिणां दिशमभि नक्षमाणौ पर्यावर्तेथामभि पात्रमेतत् ।
तस्मिन्वां यमः पितृभिः संविदानः पक्काय शर्म बहुलं नि यच्छात् ॥८॥
प्रतीचीं दिशामियमिद्वरं यस्यां सोमो अधिपा मृडिता च ।
तस्यां श्रयेथां सुकृतः सचेथामधा पक्कान्मिथुना सं भवाथः ॥९॥
उत्तरं राष्ट्रं प्रजयोत्तरावद्दिशामुदीची कृणवन्नो अग्रम् ।
पाङ्क्तं छन्दः पुरुषो बभूव विश्वैर्विश्वाङ्गैः सह सं भवेम ॥१०॥
ध्रुवेयं विराण्नमो अस्त्वस्यै शिवा पुत्रेभ्य उत मह्यमस्तु ।
सा नो देव्यदिते विश्ववार इर्य इव गोपा अभि रक्ष पक्कम् ॥११॥
पितेव पुत्रानभि सं स्वजस्व नः शिवा नो वाता इह वान्तु भूमौ ।
यमोदनं पचतो देवते इह तन्नस्तप उत सत्यं च वेत्तु ॥१२॥
यद्यत्कृष्णः शकुन एह गत्वा त्सरन्विषक्तं बिल आससाद ।
यद्वा दास्यार्द्रहस्ता समङ्क्त उलूखलं मुसलं शुम्भतापः ॥१३॥

दक्षिणाम् । दिशम् । अभि । नक्षमाणौ । परिऽआवर्तेथाम् । अभि । पात्रम् । एतत् ।
तस्मिन् । वाम् । यमः । पितृऽभिः । सम्ऽविदानः । पक्काय । शर्म । बहुलम् । नि । यच्छात् ॥
प्रतीचीम् । दिशाम् । इयम् । इत् । वरम् । यस्याम् । सोमः । अधिऽपाः । मृडिता । च ।
तस्याम् । श्रयेथाम् । सुऽकृतः । सचेथाम् । अध । पक्कात् । मिथुना । सम् । भवाथः ॥
उत्तरम् । राष्ट्रम् । प्रऽजया । उत्तरऽवत् । दिशाम् । उदीची । कृणवत् । नः । अग्रम् ।
पाङ्क्तम् । छन्दः । पुरुषः । बभूव । विश्वैः । विश्वऽअङ्गैः । सह । सम् । भवेम ॥ १० ॥
ध्रुवा । इयम् । विऽराट् । नमः । अस्तु । अस्यै । शिवा । पुत्रेभ्यः । उत । मह्यम् । अस्तु ।
सा । नः । देवि । अदिते । विश्वऽवारे । इर्यःऽइव । गोपाः । अभि । रक्ष । पक्कम् ॥११॥
पिताऽइव । पुत्रान् । अभि । सम् । स्वजस्व । नः । शिवाः । नः । वाताः । इह । वान्तु । भूमौ ।
यम् । ओदनम् । पचतः । देवते इति । इह । तम् । नः । तपः । उत । सत्यम् । च । वेत्तु ॥
यत्ऽयत् । कृष्णः । शकुनः । आ । इह । गत्वा । त्सरन् । विऽसक्तम् । बिले । आऽससाद ।
यत् । वा । दासी । आर्द्रऽहस्ता । सम्ऽअङ्क्ते । उलूखलम् । मुसलम् । शुम्भत । आपः ॥

XII.3.8 Attaining unto the southern quarter, turn you about into this vessel; in it shall Yama, in concord with the Fathers, assure abundant protection unto your cooked.

XII.3.9 This western of the quarters verily is a thing to be preferred, in which Soma is over-ruler and favourer; to it resort you; attach yourselves to the well-doers; then. O paired ones, shall ye come into being from what is cooked.

XII.3.10 A superior realm, having superiority by progeny, may the northern of the quarters make our apex; a five-fold meter hath the man become; may we come into being together with all, having all their limbs.

XII.3.11 This fixed (quarter) is virāj; homage be to it; let it be propitious to sons and to me; do thou O goddess Aditi, having all choice things, like an active herdsman defend our cooked.

XII.3.12 Do you embrace us, as a father his sons; let propitious winds blow here for us on the earth; what rice-dish the two deities cook here, let that know our penance and also truth.

XII.3.13 Whenever the black bird (sauna) coming hither, hath sat upon the orifice, surprising what is resolved, or when the barbarian woman with wet hands smears over -- cleanse, you waters, the mortar (and) pestle.

अयं ग्रावा पृथुबुध्नो वयोधाः पूतः पवित्रैरप हन्तु रक्षः ।
आ रोह चर्म महि शर्म यच्छ मा दंपती पौत्रमघं नि गाताम् ॥१४॥
वनस्पतिः सह देवैर्न आगन्रक्षः पिशाचाँ अपबाधमानः ।
स उच्छ्रयातै प्र वदाति वाचं तेन लोकाँ अभि सर्वाञ्जयेम ॥१५॥
सप्त मेधान्पशवः पर्यगृह्णन्य एषां ज्योतिष्माँ उत यश्चकर्श ।
त्रयस्त्रिंशद्देवतास्तान्त्सचन्ते स नः स्वर्गमभि नेष लोकम् ॥१६॥
स्वर्गं लोकमभि नो नयासि सं जायया सह पुत्रैः स्याम ।
गृह्णामि हस्तमनु मैत्वत्र मा नस्तारीन्निर्ऋतिर्मो अरातिः ॥१७॥
ग्राहिं पाप्मानमति ताँ अयाम तमो व्यस्य प्र वदासि वल्गु ।
वानस्पत्य उद्यतो मा जिहिंसीर्मा तण्डुलं वि शरीर्देवयन्तम् ॥१८॥
विश्वव्यचा घृतपृष्ठो भविष्यन्त्सयोनिर्लोकमुप याह्येतम् ।
वर्षवृद्धमुप यच्छ शूर्पं तुषं पलावानप तद्विनक्तु ॥१९॥

अयम् । ग्रावा । पृथुऽबुध्नः । वयःऽधाः । पूतः । पवित्रैः । अप । हन्तु । रक्षः । आ ।
रोह । चर्म । महि । शर्म । यच्छ । मा । दंपती इति दम्ऽपती । पौत्रम् । अघम् । नि । गाताम् ॥१४॥
वनस्पतिः । सह । देवैः । नः । आ । अगन् । रक्षः । पिशाचान् । अपऽबाधमानः ।
सः । उत् । श्रयातै । प्र । वदाति । वाचम् । तेन । लोकान् । अभि । सर्वान् । जयेम ॥
सप्त । मेधान् । पशवः । परि । अगृह्णन् । यः । एषाम् । ज्योतिष्मान् । उत । यः । चकर्श ।
त्रयःऽत्रिंशत् । देवताः । तान् । सचन्ते । सः । नः । स्वःऽगम् । अभि । नेष । लोकम् ॥
स्वःऽगम् । लोकम् । अभि । नः । नयासि । सम् । जायया । सह । पुत्रैः । स्याम । गृह्णामि ।
हस्तम् । अनु । मा । आ । एतु । अत्र । मा । नः । तारीत् । निःऽऋतिः । मो इति । अरातिः ॥
ग्राहिम् । पाप्मानम् । अति । तान् । अयाम । तमः । वि । अस्य । प्र । वदासि । वल्गु ।
वानस्पत्यः । उत्ऽयतः । मा । जिहिंसीः । मा । तण्डुलम् । वि । शरीः । देवऽयन्तम् ॥
विश्वऽव्यचाः । घृतऽपृष्ठः । भविष्यन् । सऽयोनिः । लोकम् । उप । याहि । एतम् ।
वर्षऽवृद्धम् । उप । यच्छ । शूर्पम् । तुषम् । पलावान् । अप । तत् । विनक्तु ॥ १९ ॥

XII.3.14 Let this pressing-stone, broad-based, vigor-bestowing, purified by purifiers, smite away the demon; mount thou the hide; yield great protection; let not the husband and wife fall into evil proceeding from grand sons.

XII.3.15 The forest tree hath come to us together with the gods, forcing off the demon, the piśācas; he shall rise up, shall speak forth his voice; with him may we conquer all worlds.

XII.3.16 Seven sacrifices the cattle enclosed --which of them was full of light, and which was pining; to them thirty deities attach themselves; do thou conduct us unto the heavenly world.

XII.3.17 Unto the heavenly world shalt thou conduct us; we be united with wife, with sons; I grasp hand; let her come here after me; let not destruction pass us, nor the niggard.

XII.3.18 The seizure, evil -- may we go beyond them; dissipate thou the darkness; mayest thou speak forth what is agreeable; made of forest tree, uplifted, do not injure; do not crush to pieces the god-loving rice-grain.

XII.3.19 About to become all-expanded, ghee-backed, go thou, of like origin, unto that world; hand thou the rain-increased sieve; let that winnow away the husk, the chaff.

त्रयो लोकाः संमिता ब्राह्मणेन द्यौरेवासौ पृथिव्य१न्तरिक्षम् ।
अंशून्गृभीत्वान्वारभेथामा प्यायन्तां पुनरा यन्तु शूर्पम् ॥२०॥
पृथग्रूपाणि बहुधा पशूनामेकरूपो भवसि सं समृद्ध्या ।
एतां त्वचं लोहिनीं तां नुदस्व ग्रावा शुम्भाति मलग इव वस्त्रा ॥२१॥
पृथिवीं त्वा पृथिव्यामा वेशयामि तनूः समानी विकृता त एषा ।
यद्यद्द्युत्तं लिखितमर्पणेन तेन मा सुस्रोर्ब्रह्मणापि तद्वपामि ॥२२॥
जनित्रीव प्रति हर्यासि सूनुं सं त्वा दधामि पृथिवीं पृथिव्या ।
उखा कुम्भी वेद्यां मा व्यथिष्ठा यज्ञायुधैराज्येनातिषक्ता ॥२३॥
अग्निः पचन्रक्षतु त्वा पुरस्तादिन्द्रो रक्षतु दक्षिणतो मरुत्वान् ।
वरुणस्त्वा दृंहाद्धरुणे प्रतीच्या उत्तरात्त्वा सोमः सं ददातै ॥२४॥
पूताः पवित्रैः पवन्ते अभ्राद्दिवं च यन्ति पृथिवीं च लोकान् ।
ता जीवला जीवधन्याः प्रतिष्ठाः पात्र आसिक्ताः पर्यग्निरिन्धाम् ॥२५॥

त्रयः । लोकाः । समऽमिताः । ब्राह्मणेन । द्यौः । एव । असौ । पृथिवी । अन्तरिक्षम् ।
अंशून् । गृभीत्वा । अनुऽआरभेथाम् । आ । प्यायन्ताम् । पुनः । आ । यन्तु । शूर्पम् ॥२०॥
पृथक् । रूपाणि । बहुऽधा । पशूनाम् । एकऽरूपः । भवसि । सम् । समऽऋद्ध्या ।
एताम् । त्वचम् । लोहिनीम् । ताम् । नुदस्व । ग्रावा । शुम्भाति । मलगःऽइव । वस्त्रा ॥२१
पृथिवीम् । त्वा । पृथिव्याम् । आ । वेशयामि । तनूः । समानी । विऽकृता । ते । एषा ।
यत्ऽयत् । द्युत्तम् । लिखितम् । अर्पणेन । तेन । मा । सुस्रोः । ब्रह्मणा । अपि । तत् । वपामि ॥
जनित्रीऽइव । प्रति । हर्यासि । सूनुम् । सम् । त्वा । दधामि । पृथिवीम् । पृथिव्या ।
उखा । कुम्भी । वेद्याम् । मा । व्यथिष्ठाः । यज्ञऽआयुधैः । आज्येन । अतिऽसक्ता ॥ २३ ॥
अग्निः । पचन् । रक्षतु । त्वा । पुरस्तात् । इन्द्रः । रक्षतु । दक्षिणतः । मरुत्वान् ।
वरुणः । त्वा । दृंहात् । धरुणे । प्रतीच्याः । उत्तरात् । त्वा । सोमः । सम् । ददातै ।॥२४॥
पूताः । पवित्रैः । पवन्ते । अभ्रात् । दिवम् । च । यन्ति । पृथिवीम् । च । लोकान् ।
ताः । जीवलाः । जीवऽधन्याः । प्रतिऽस्थाः । पात्रे । आऽसिक्ताः । परि । अग्निः । इन्धाम् ॥

XII.3.20 The three worlds are commensurate with the brāhmaṇa; yon heaven, earth, atmosphere; having seized the (soma) stalks, take you hold after; let them swell up; let them come again to the sieve.

XII.3.21 Manifoldly separate (are) the forms of cattle; thou becomes one formed together with success; that red skin -- that thrust thou (away, the pressing-stone shall cleanse like a fuller the garments.

XII.3.22 Thee that art earth I make enter into earth; this like body of thee separated; whatever of thee is burnt (or) scratched by driving; with that do not leak; I cover that over by a spell (trick).

XII.3.23 Mayest thou welcome as a mother a son; I unite thee, that art earth with the earth; a kettle, a vessel, do not stagger upon the sacrificial hearth, overhung by the implements of offering (and) by sacrificial butter.

XII.3.24 Let Agni, cooking, defend thee on the east; let Indra, with the Maruts, defend on the south; may Varuṇa fix thee in the maintenance of the western (quarter); on the north may Soma give thee together.

XII.3.25 Purified with purifiers, they purify themselves from the cloud; they go both to heaven and to earth (as their) worlds; them, lively, rich in life, firm-standing, poured into the vessel, let the fire kindle about.

आ यन्ति दिवः पृथिवीं सचन्ते भूम्याः सचन्ते अध्यन्तरिक्षम् ।
शुद्धाः सतीस्ता उ शुम्भन्त एव ता नः स्वर्गमभि लोकं नयन्तु ॥२६॥
उतेव प्रभ्वीरुत संमितास उत शुक्राः शुचयश्चामृतासः ।
ता ओदनं दंपतिभ्यां प्रशिष्टा आपः शिक्षन्तीः पचता सुनाथाः ॥२७॥
संख्याता स्तोकाः पृथिवीं सचन्ते प्राणापानैः संमिता ओषधीभिः ।
असंख्याता ओप्यमानाः सुवर्णाः सर्वं व्यापुः शुचयः शुचित्वम् ॥२८॥
उद्योधन्त्यभि वल्गन्ति तप्ताः फेनमस्यन्ति बहुलांश्च बिन्दून् ।
योषेव दृष्ट्वा पतिमृत्वियायैतैस्तण्डुलैर्भवता समापः ॥२९॥
उत्थापय सीदतो बुध्न एनानद्भिरात्मानमभि सं स्पृशन्ताम् ।
अमासि पात्रैरुदकं यदेतन्मितास्तण्डुलाः प्रदिशो यदीमाः ॥३०॥
प्र यच्छ पर्शुं त्वरया हरौषमहिंसन्त ओषधीर्दान्तु पर्वन् ।
यासां सोमः परि राज्यं बभूवामन्युता नो वीरुधो भवन्तु ॥३१॥

आ । यन्ति । दिवः । पृथिवीम् । सचन्ते । भूम्याः । सचन्ते । अधि । अन्तरिक्षम् ।
शुद्धाः । सतीः । ताः । ऊं इति । शुम्भन्ते । एव । ताः । नः । स्वःऽगम् । अभि । लोकम् । नयन्तु ॥
उतऽइव । प्रऽभ्वीः । उत । समऽमितासः । उत । शुक्राः । शुचयः । च । अमृतासः ।
ताः । ओदनम् । दंपतिऽभ्याम् । प्रऽशिष्टाः । आपः । शिक्षन्तीः । पचत । सुऽनाथाः ॥
समऽख्याताः । स्तोकाः । पृथिवीम् । सचन्ते । प्राणापानैः । समऽमिताः । ओषधीभिः ।
असम्ऽख्याताः । आऽउप्यमानाः । सुऽवर्णाः । सर्वम् । वि । आपुः । शुचयः । शुचिऽत्वम् ॥२८॥
उत् । योधन्ति । अभि । वल्गन्ति । तप्ताः । फेनम् । अस्यन्ति । बहुलान् । च । बिन्दून् ।
योषाऽइव । दृष्ट्वा । पतिम् । ऋत्वियाय । एतैः । तण्डुलैः । भवत । सम् । आपः ॥ २९ ॥
उत् । स्थापय । सीदतः । बुध्ने । एनान् । अत्ऽभिः । आत्मानम् । अभि । सम् । स्पृशन्ताम् ।
अमासि । पात्रैः । उदकम् । यत् । एतत् । मिताः । तण्डुलाः । प्रऽदिशः । यदि । इमाः ॥३०॥
प्र । यच्छ । पर्शुम् । त्वरय । आ । हर । ओषम् । अहिंसन्तः । ओषधीः । दान्तु । पर्वन् ।
यासाम् । सोमः । परि । राज्यम् । बभूव । अमन्युताः । नः । वीरुधः । भवन्तु ॥ ३१ ॥

XII.3.26 They come from the sky, they fasten on the earth; from the earth they fasten upon the atmosphere; being cleansed, they just cleanse themselves; let them conduct us to the heavenly world.

XII.3.27 Both as it were prevailing and also commensurate, also bright and clean, immortal – as such do you, O waters, directed, helping, cook the rich-dish for the two spouses, you of good refuge.

XII.3.28 The numbered drops fasten on the earth, being commensurate with breaths and expirations, with herbs; being scattered on, unnumbered, of good color, the clean ones, have obtained all cleanness.

XII.3.29 They struggle up, they dance on, being heated; they hurl foam and abundant drops; like a woman that is in her season, seeing her husband, unite yourselves, O waters, with these rice-grains.

XII.3.30 Make thou them stand up. as they sit on the bottom, let them touch themselves all over with the waters; I have measured with vessels the water that is here; measured are the rice-grains that are these directions.

XII.3.31 Reach thou forth the sickle, hasten, take quickly; let them, not harming, cut the herbs at the joint; they of whom Soma compassed the kingship – let the plants be without-wrath toward us.

नवं बर्हिरोदनाय स्तृणीत प्रियं हृदश्चक्षुषो वल्ग्वस्तु ।
तस्मिन्देवाः सह दैवीर्विशन्त्विमं प्राश्नन्त्वृतुभिर्निषद्य ॥३२॥
वनस्पते स्तीर्णमा सीद बर्हिरग्निष्टोमैः संमितो देवताभिः ।
त्वष्ट्रेव रूपं सुकृतं स्वधित्यैना एहाः परि पात्रे ददृश्राम् ॥३३॥
षष्ट्यां शरत्सु निधिपा अभीच्छात्स्वः पक्वेनाभ्यश्नवातै ।
उपैनं जीवान्पितरश्च पुत्रा एतं स्वर्गं गमयान्तमग्नेः ॥३४॥
धर्ता ध्रियस्व धरुणे पृथिव्या अच्युतं त्वा देवताश्च्यावयन्तु ।
तं त्वा दंपती जीवन्तौ जीवपुत्रावुद्वासयातः पर्यग्निधानात् ॥३५॥
सर्वान्त्समागा अभिजित्य लोकान्यावन्तः कामाः समतीतृपस्तान् ।
वि गाहेथामायवनं च दर्विरेकस्मिन्पात्रे अध्युद्धरैनम् ॥३६॥
उप स्तृणीहि प्रथय पुरस्ताद्घृतेन पात्रमभि घारयैतत् ।
वाश्रेवोस्रा तरुणं स्तनस्युमिमं देवासो अभिहिङ्कृणोत ॥३७॥

नवम् । बर्हिः । ओदनाय । स्तृणीत । प्रियम् । हृदः । चक्षुषः । वल्गु । अस्तु ।
तस्मिन् । देवाः । सह । दैवीः । विशन्तु । इमम् । प्र । अश्नन्तु । ऋतुऽभिः । निऽसद्य ॥३२॥
वनस्पते । स्तीर्णम् । आ । सीद । बर्हिः । अग्निऽस्तोमैः । समऽमितः । देवताभिः ।
त्वष्ट्राऽइव । रूपम् । सुऽकृतम् । स्वऽधित्या । एना । एहाः । परि । पात्रे । ददृश्राम् ।
षष्ट्याम् । शरत्ऽसु । निधिऽपाः । अभि । इच्छात् । स्वः । पक्वेन । अभि । अश्नवातै ।
उप । एनम् । जीवान् । पितरः । च । पुत्राः । एतम् । स्वःऽगम् । गमय । अन्तम् । अग्नेः ॥
धर्ता । ध्रियस्व । धरुणे । पृथिव्याः । अच्युतम् । त्वा । देवताः । च्यवयन्तु ।
तम् । त्वा । दंपती इति दम्ऽपती । जीवन्तौ । जीवऽपुत्रौ । उत् । वासयातः । परि ।
अग्निऽधानात् ॥ ३५ ॥

सर्वान् । समऽआगाः । अभिऽजित्य । लोकान् । यावन्तः । कामाः । सम् । अतीतृपः । तान् ।
वि । गाहेथाम् । आऽयवनम् । च । दर्विः । एकस्मिन् । पात्रे । अधि । उत् । हर । एनम् ॥३६॥

उप । स्तृणीहि । प्रथय । पुरस्तात् । घृतेन । पात्रम् । अभि । घारय । एतत् ।
वाश्राऽइव । उस्रा । तरुणम् । स्तनस्युम् । इमम् । देवासः । अभिऽहिङ्कृणोत ॥ ३७ ॥

XII.3.32 Strew you a new barhis for the rice-dish; be it dear to the heart, agreeable to the eye; on it let the gods (and) the divine ones settle together; sitting down, let them partake of this with the seasons.

XII.3.33 O forest tree, sit on the strewn barhis, being commensurate with the Agni-praises, with the deities; like a form well made by an artisan with a knife, so let the eager ones be seen round about in the vessel.

XII.3.34 In sixty autumns may he seek unto the treasure-keepers; may he attain unto the sky with the cooked (offering); may both fathers (and) sons live upon him, make thou this one to go unto the heaven-going end of the fire.

XII.3.35 A maintainer, maintain thyself in the maintenance of the earth; thee that art unmoved let the deities make to move; thee shall the two spouses, living having living sons, cause to remove out of the fire-holder.

XII.3.36 Thou hast come together unto all the worlds, having conquered; however many the desires, thou hast made them wholly satisfied; plunge ye in -- both the stirring-stick and the spoon; take thou him up upon one vessel.

XII.3.37 Strew thou on, spread forward, smear over with ghee this vessel; as a lowing cow (toward) a young (calf) desiring the teat, do you, O gods, utter the sound hing toward this one.

उपास्तरीरकरो लोकमेतमुरुः प्रथतामसमः स्वर्गः ।
तस्मिञ्छ्रयातै महिषः सुपर्णो देवा एनं देवताभ्यः प्र यच्छान् ॥३८॥
यद्यज्जाया पचति त्वत्परःपरः पतिर्वा जाये त्वत्तिरः ।
सं तत्सृजेथां सह वां तदस्तु संपादयन्तौ सह लोकमेकम् ॥३९॥
यावन्तो अस्याः पृथिवीं सचन्ते अस्मत्पुत्राः परि ये संबभूवुः ।
सर्वांस्ताँ उप पात्रे ह्वयेथां नाभिं जानानाः शिशवः समायान् ॥४०॥
वसोर्या धारा मधुना प्रपीना घृतेन मिश्रा अमृतस्य नाभयः ।
सर्वास्ता अव रुन्धे स्वर्गः षष्ट्यां शरत्सु निधिपा अभीऽच्छात् ॥४१॥
निधिं निधिपा अभ्येऽनमिच्छादनीश्वरा अभितः सन्तु येऽन्ये ।
अस्माभिर्दत्तो निहितः स्वर्गस्त्रिभिः काण्डैस्त्रीन्त्स्वर्गानरुक्षत् ॥४२॥
अग्नी रक्षस्तपतु यद्विदेवं क्रव्यात्पिशाच इह मा प्र पास्त ।
नुदाम एनमप रुध्मो अस्मदादित्या एनमङ्गिरसः सचन्ताम् ॥४३॥

उप । अस्तरीः । अकरः । लोकम् । एतम् । उरुः । प्रथताम् । असमः । स्वःऽगः ।
तस्मिन् । श्रयातै । महिषः । सुऽपर्णः । देवाः । एनम् । देवताभ्यः । प्र । यच्छान् ॥३८॥
यत्ऽयत् । जाया । पचति । त्वत् । परःऽपरः । पतिः । वा । जाये । त्वत् । तिरः । सम् ।
तत् । सृजेथाम् । सह । वाम् । तत् । अस्तु । सम्ऽपादयन्तौ । सह । लोकम् । एकम् ॥

यावन्तः । अस्याः । पृथिवीम् । सचन्ते । अस्मत् । पुत्राः । परि । ये । सम्ऽबभूवुः ।
सर्वान् । तान् । उप । पात्रे । ह्वयेथाम् । नाभिम् । जानानाः । शिशवः । सम्ऽआयान् ॥

वसोः । याः । धाराः । मधुना । प्रऽपीनाः । घृतेन । मिश्राः । अमृतस्य । नाभयः । सर्वाः ।
ताः । अव । रुन्धे । स्वःऽगः । षष्ट्याम् । शरत्ऽसु । निधिऽपाः । अभि । इच्छात् ॥

निऽधिम् । निधिऽपाः । अभि । एनम् । इच्छात् । अनीश्वराः । अभितः । सन्तु । ये । अन्ये ।
अस्माभिः । दत्तः । निऽहितः । स्वःऽगः । त्रिऽभिः । काण्डैः । त्रीन् । स्वःऽगान् । अरुक्षत् ॥
अग्निः । रक्षः । तपतु । यत् । विऽदेवम् । क्रव्यऽअत् । पिशाचः । इह । मा । प्र । पास्त ।
नुदामः । एनम् । अप । रुध्मः । अस्मत् । आदित्याः । एनम् । अङ्गिरसः । सचन्ताम् ॥

XII.3.38 Thou hast strewn on, hast made that world; let the broad unequalled heavenly world spread itself out; to it shall resort the mighty eagle; the gods shall reach him forth to the deities.

XII.3.39 What in any case thy wife cooks beyond thee, or thy husband, O wife, in secret from thee, that do ye unite; that be yours together; agreeing together upon one world.

XII.3.40 How many of her fasten on the earth, what sons came forth into being from us – all those do you call to you in the vessel; knowing the navel, the young ones shall come together.

XII.3.41 What streams of good, fattened with honey, mixed with ghee, navels of immortality – all those doth the heaven-goer take possession of; in sixty autumns may he seek unto the treasure-keepers.

XII.3.42 He shall seek unto it, treasure-keepers unto a treasure; let thsoe who are others be not lords about; given by us, deposited, heaven-going with three divisions it has ascended to three heavens.

XII.3.43 Let Agni burn the demon that is godless; let the flesh-eating piśāca not have a draught here; we thrust him, we bar him away from us; let the Ādityas, the Añgirases, fasten on him.

आदित्येभ्यो अङ्गिरोभ्यो मध्विदं घृतेन मिश्रं प्रति वेदयामि ।
शुद्धहस्तौ ब्राह्मणस्यानिहत्यैतं स्वर्गं सुकृतावपीतम् ॥४४॥
इदं प्रापमुत्तमं काण्डमस्य यस्माल्लोकात्परमेष्ठी समाप ।
आ सिञ्च सर्पिर्घृतवत्समङ्ग्ध्येष भागो अङ्गिरसो नो अत्र ॥४५॥
सत्याय च तपसे देवताभ्यो निधिं शेवधिं परि दद्म एतम् ।
मा नो द्यूतेव गान्मा समित्यां मा स्मान्यस्मा उत्सृजता पुरा मत् ॥४६॥
अहं पचाम्यहं ददामि ममेदु कर्मन्करुणेधि जाया ।
कौमारो लोको अजनिष्ट पुत्रोऽन्वारभेथां वय उत्तरावत् ॥४७॥
न किल्बिषमत्र नाधारो अस्ति न यन्मित्रैः सममान एति ।
अनूनं पात्रं निहितं न एतत्पक्तारं पक्वः पुनरा विशाति ॥४८॥
प्रियं प्रियाणां कृणवाम तमस्ते यन्तु यतमे द्विषन्ति ।
धेनुरनड्वान्वयोवय आयदेव पौरुषेयमप मृत्युं नुदन्तु ॥४९॥

आदित्येभ्यः । अङ्गिरःऽभ्यः । मधु । इदम् । घृतेन । मिश्रम् । प्रति । वेदयामि ।
शुद्धऽहस्तौ । ब्राह्मणस्य । अनिऽहत्य । एतम् । स्वःऽगम् । सुऽकृतौ । अपि । इतम् ॥४४॥
इदम् । प्र । आपम् । उत्ऽतमम् । काण्डम् । अस्य । यस्मात् । लोकात् । परमेऽस्थी । समऽआप ।
आ । सिञ्च । सर्पिः । घृतऽवत् । सम् । अङ्ग्धि । एषः । भागः । अङ्गिरसः । नः । अत्र ॥
सत्याय । च । तपसे । देवताभ्यः । निऽधिम् । शेवऽधिम् । परि । दद्मः । एतम् । मा ।
नः । द्यूते । अव । गात् । मा । समऽइत्याम् । मा । स्म । अन्यस्मै । उत् । सृजत । पुरा । मत् ॥
अहम् । पचामि । अहम् । ददामि । मम । इत् । ऊं इति । कर्मन् । करुणे । अधि । जाया ।
कौमारः । लोकः । अजनिष्ट । पुत्रः । अनुऽआरभेथाम् । वयः । उत्तरऽवत् ॥ ४७ ॥
न । किल्बिषम् । अत्र । न । आऽधारः । अस्ति । न । यत् । मित्रैः । समऽअममानः । एति ।
अनूनम् । पात्रम् । निऽहितम् । नः । एतत् । पक्तारम् । पक्वः । पुनः । आ । विशाति ॥४८॥
प्रियम् । प्रियाणाम् । कृणवाम । तमः । ते । यन्तु । यतमे । द्विषन्ति ।
धेनुः । अनड्वान् । वयःऽवयः । आऽयत् । एव । पौरुषेयम् । अप । मृत्युम् । नुदन्तु ॥४९॥

XII.3.44 To the Ādityas, the Añgirases, I announce this honey mingled with ghee; with cleansed hands, not smiting down (anyting of) the Brahman's, go you, O well-doers, unto this heavenly world.

XII.3.45 I have obtained this highest division of it, from which world the most exalted one obtained completely; pour thou on the butter; anoint with ghee; this is the portion of our Añgiras here.

XII.3.46 Unto truth, unto penance, and unto the deities, we deliver this deposit, (this) treasure; let it not be lost in our play, nor in the meeting; do not ye release it to another in preference to me.

XII.3.47 I cook; I give; verily upon my action (and) deed the wife; a virgin world hath been born, a son; take you hold after vigor that hath what is superior.

XII.3.48 No offense is here, nor support, nor that one goes agreeing with friends; this vessel of ours is set down not empty; the coooked shall enter again him that cooked it.

XII.3.49 May we do what is dear to them that are dear; whosoever hate (us), let them go to darkness; milch-cow, draft-ox, each coming vigor -- let them thrust away the death that comes from men.

समग्नयो विदुरन्यो अन्यं य ओषधीः सचते यश्च सिन्धून् ।
यावन्तो देवा दिव्या३तपन्ति हिरण्यं ज्योतिः पचतो बभूव ॥५०॥
एषा त्वचां पुरुषे सं बभूवानग्नाः सर्वे पशवो ये अन्ये ।
क्षत्रेणात्मानं परि धापयाथोमोतं वासो मुखमोदनस्य ॥५१॥
यदक्षेषु वदा यत्समित्यां यद्वा वदा अनृतं वित्तकाम्या ।
समानं तन्तुमभि संवसानौ तस्मिन्त्सर्वं शमलं सादयाथः ॥५२॥
वर्षं वनुष्वापि गच्छ देवांस्त्वचो धूमं पर्युत्पातयासि ।
विश्वव्यचा घृतपृष्ठो भविष्यन्त्सयोनिर्लोकमुप याह्येतम् ॥५३॥
तन्वं स्वर्गो बहुधा वि चक्रे यथा विद आत्मन्नन्यवर्णाम् ।
अपाजैत्कृष्णां रुशतीं पुनानो या लोहिनी तां ते अग्नौ जुहोमि ॥५४॥
प्राच्यै त्वा दिशे३ग्नयेधिपतयेसितायं रक्षित्र आदित्यायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ॥५५॥

सम् । अग्नयः । विदुः । अन्यः । अन्यम् । यः । ओषधीः । सचते । यः । च । सिन्धून् ।
यावन्तः । देवाः । दिवि । आऽतपन्ति । हिरण्यम् । ज्योतिः । पचतः । बभूव ॥ ५० ॥
एषा । त्वचाम् । पुरुषे । सम् । बभूव । अनग्नाः । सर्वे । पशवः । ये । अन्ये ।
क्षत्रेण । आत्मानम् । परि । धापयाथः । अमाऽउतम् । वासः । मुखम् । ओदनस्य ॥५१॥
यत् । अक्षेषु । वदाः । यत् । समऽइत्याम् । यत् । वा । वदाः । अनृतम् । वित्तऽकाम्या ।
समानम् । तन्तुम् । अभि । सम्ऽवसानौ । तस्मिन् । सर्वम् । शमलम् । सादयाथः ॥ ५२ ॥
वर्षम् । वनुष्व । अपि । गच्छ । देवान् । त्वचः । धूमम् । परि । उत् । पातयासि ।
विश्वऽव्यचाः । घृतऽपृष्ठः । भविष्यन् । सऽयोनिः । लोकम् । उप । याहि । एतम् ॥ ५३ ॥
तन्वम् । स्वःऽगः । बहुऽधा । वि । चक्रे । यथा । विदे । आत्मन् । अन्यऽवर्णाम् ।
अप । अजैत् । कृष्णाम् । रुशतीम् । पुनानः । या । लोहिनी । ताम् । ते । अग्नौ । जुहोमि ॥
प्राच्यै । त्वा । दिशे । अग्नये । अधिऽपतये । असिताय । रक्षित्रे । आदित्याय । इषुऽमते ।
एतम् । परि । दद्मः । तम् । नः । गोपायत । आ । अस्माकम् । आऽएतोः । दिष्टम् ।
नः । अत्र । जरसे । नि । नेषत् । जरा । मृत्यवे । परि । नः । ददातु । अथ । पक्वेन ।
सह । सम् । भवेम ॥ ५५ ॥

XII.3.50 The fires are in concord, one with another – he that fastens on the herbs, and he that (fastens on) the rivers; as many gods as send heat in the sky – gold hath become the light of him that cooks.

XII.3.51 This one of skins hath come into being on man; not naked are all the animals that are other; you cause to wrap youselves with authority, a home-woven garment, the mouth of the rice-dish.

XII.3.52 What (untruth) thou shalt speak at the dice, what at the meeting, or what untruth thou shalt speak from desire of gain – clothing yourselves in the same web, you shall settle in it all pollution.

XII.3.53 Win thou rain; go unto the gods; thou shalt make smoke fly up out of the skin; about to become all expanded, ghee-backed, go thou, of like origin, unto that world.

XII.3.54 The heaven-goer hath variously changed his body, as he finds in himself one of another color; he hath conquered off the black one, purifying a shining one; the one that is red, that I offer to thee in the fire.

XII.3.55 To the eastern quarter, to Agni as overlord, to the black (serpent) as defender, to Āditya having arrows, we commit thee here; guard you him for us until our coming; may he lead on our appointed (life-time) here unto old age; let old age commit us unto death; then may we be united with the cooked (offering).

दक्षिणायै त्वा दिश इन्द्रायाधिपतये तिरश्चिराजये रक्षित्रे यमायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्केन सह सं भवेम ॥५६॥
प्रतीच्यै त्वा दिशे वरुणायाधिपतये पृदाकवे रक्षित्रेऽन्नायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्केन सह सं भवेम ॥५७॥
उदीच्यै त्वा दिशे सोमायाधिपतये स्वजाय रक्षित्रेऽशन्या इषुमत्यै ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्केन सह सं भवेम ॥५८॥
ध्रुवायै त्वा दिशे विष्णवेऽधिपतये कल्माषग्रीवाय रक्षित्र ओषधीभ्य इषुमतीभ्यः ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्केन सह सं भवेम ॥५९॥

दक्षिणायै । त्वा । दिशे । इन्द्राय । अधिऽपतये । तिरश्चिऽराजये । रक्षित्रे । यमाय । इषुऽमते । एतम् ॥ ० ॥ ५६ ॥

प्रतीच्यै । त्वा । दिशे । वरुणाय । अधिऽपतये । पृदाकवे । रक्षित्रे । अन्नाय । इषुऽमते ॥ ० ॥५७॥

उदीच्यै । त्वा । दिशे । सोमाय । अधिऽपतये । स्वजाय । रक्षित्रे । अशन्यै । इषुऽमत्यै ॥ ० ॥ ५८ ॥

ध्रुवायै । त्वा । दिशे । विष्णवे । अधिऽपतये । कल्माषऽग्रीवाय । रक्षित्रे । ओषधीभ्यः । इषुऽमतीभ्यः ॥ ० ॥ ५९ ॥

XII.3.56 To the southern quarter, to Indra as overlord, to the cross-lined (serpent) as defender, to Yama having arrows, we commit thee here; guard you etc. etc.

XII.3.57 To the western quarter, to Varuṇa as overlord, to the pṛdāku as defender, to food having arrows, we commit thee here; guard you etc.etc.

XII.3.58 To the northern quarter, to Soma as overlord, to the constrictor as defender, to the thunderbolt having arrows, we commit thee here; guard you etc.etc.

XII.3.59 To the fixed quarter, to Viṣhṇu as overlord, to the spotted-necked (serpent) as defender, to the herbs having arrows we commit thee here; guard you etc. etc.

ऊर्ध्वायै त्वा दिशे बृहस्पतयेऽधिपतये श्वित्राय रक्षित्रे वर्षायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ॥६०॥

ऊर्ध्वायै । त्वा । दिशे । बृहस्पतये । अधिऽपतये । श्वित्राय । रक्षित्रे । वर्षाय । इषुऽमते ।
एतम् । परि । दद्मः । तम् । नः । गोपायत । आ । अस्माकम् । आऽएतोः ।
दिष्टम् । नः । अत्र । जरसे । नि । नेषत् । जरा । मृत्यवे । परि । नः । ददातु । अथ ।
पक्वेन । सह । सम् । भवेम ॥ ६० ॥

(४) चतुर्थं सूक्तम्

(१-५३) त्रिपञ्चाशदृचस्यास्य सूक्तस्य कश्यप ऋषिः । वशा देवता । (१-६, ८-१९, २१-३१, ३३-४१, ४३-५३) प्रथमादिषडृचामष्टम्यादिद्वादशानामेकविंश्याद्येकादशानां त्रयस्त्रिंश्यादिनवानां त्रिचत्वारिंश्याद्येकादशानाञ्चानुष्टुप्, (७) सप्तम्या भुरिगनुष्टुप्, (२०) विंश्या विराडनुष्टुप्, (३२) द्वात्रिंश्या उष्णिग्बृहतीगर्भानुष्टुप्, (४२) द्विचत्वारिंश्याश्च बृहतीगर्भानुष्टुप् छन्दांसि ॥

ददामीत्येव ब्रूयादनु चैनामभुत्सत ।
वशां ब्रह्मभ्यो याचद्भ्यस्तत्प्रजावदपत्यवत् ॥१॥
प्रजया स वि क्रीणीते पशुभिश्चोप दस्यति ।
य आर्षेयेभ्यो याचद्भ्यो देवानां गां न दित्सति ॥२॥
कूटयास्य सं शीर्यन्ते श्लोणया काटमर्दति ।
बण्डया दह्यन्ते गृहाः काणया दीयते स्वम् ॥३॥

ददामि । इति । एव । ब्रूयात् । अनु । च । एनाम् । अभुत्सत ।
वशाम् । ब्रह्मऽभ्यः । याचत्ऽभ्यः । तत् । प्रजाऽवत् । अपत्यऽवत् ॥ १ ॥
प्रऽजया । सः । वि । क्रीणीते । पशुऽभिः । च । उप । दस्यति ।
यः । आर्षेयेभ्यः । याचत्ऽभ्यः । देवानाम् । गाम् । न । दित्सति ॥ २ ॥
कूटया । अस्य । सम् । शीर्यन्ते । श्लोणया । काटम् । अर्दति ।
बण्डया । दह्यन्ते । गृहाः । काणया । दीयते । स्वम् ॥ ३ ॥

XII.3.60 To the upward quarter, to Bṛhaspati as overlord, to the white (serpent) as defender, to rain having arrows, we commit thee here; guard ye etc.etc.

The cow (vaśā) as belonging exclusively to the Brahmans

XII.4.1 I give (her) -- thus should he say, if they have noticed her -- (I give) the cow to the priests that ask for her; that brings progeny, descendants.

XII.4.2 He bargains away his progeny and becomes exhausted of cattle who is not willing to give the cow of the gods to the sons of seers that ask for her.

XII.4.3 By a hornless one they are crushed for him; by a lame one he falls into a pit; by a crippled one his homes are burned by a one-eyed one his possessions are taken away.

विलोहितो अधिष्ठानाच्छक्को विन्दति गोपतिम् ।
तथा वशायाः संविद्यं दुरदभ्ना ह्यु१च्यसे ॥४॥
पदोरस्या अधिष्ठानाद्विक्लिन्दुर्नाम विन्दति ।
अनामनात्सं शीर्यन्ते या मुखेनोपजिघ्रति ॥५॥
यो अस्याः कर्णावास्कुनोत्या स देवेषु वृश्चते ।
लक्ष्म कुर्व इति मन्यते कनीयः कृणुते स्वम् ॥६॥
यदस्याः कस्मै चिद्भोगाय बालान्कश्चित्प्रकृन्तति ।
ततः किशोरा म्रियन्ते वत्सांश्च घातुको वृकः ॥७॥
यदस्या गोपतौ सत्या लोम ध्वाङ्क्षो अजीहिडत् ।
ततः कुमारा म्रियन्ते यक्ष्मो विन्दत्यनामनात् ॥८॥
यदस्याः पल्पूलनं शकृद्दासी समस्यति ।
ततोपरूपं जायते तस्मादव्येष्यदेनसः ॥९॥

विऽलोहितः । अधिऽस्थानात् । शक्कः । विन्दति । गोऽपतिम् ।
तथा । वशायाः । समऽविद्यम् । दुरदभ्ना । हि । उच्यसे ॥ ४ ॥
पदोः । अस्याः । अधिऽस्थानात् । विऽक्लिन्दुः । नाम । विन्दति ।
अनामनात् । सम् । शीर्यन्ते । याः । मुखेन । उपऽजिघ्रति ॥ ५ ॥
यः । अस्याः । कर्णौ । आऽस्कुनोति । आ । सः । देवेषु । वृश्चते ।
लक्ष्म । कुर्वे । इति । मन्यते । कनीयः । कृणुते । स्वम् ॥ ६ ॥
यत् । अस्याः । कस्मै । चित् । भोगाय । बालान् । कः । चित् । प्रऽकृन्तति ।
ततः । किशोराः । म्रियन्ते । वत्सान् । च । घातुकः । वृकः ॥ ७ ॥
यत् । अस्याः । गोऽपतौ । सत्याः । लोम । ध्वाङ्क्षः । अजीहिडत् ।
ततः । कुमाराः । म्रियन्ते । यक्ष्मः । विन्दति । अनामनात् ॥ ८ ॥
यत् । अस्याः । पल्पूलनम् । शकृत् । दासी । समऽअस्यति ।
ततः । अपऽरूपम् । जायते । तस्मात् । अविऽएष्यत् । एनसः ॥ ९ ॥

XII.4.4 Anaemia from the station of the dung visits the master of kine; so is the agreement of the cow; for door-damaging art thou called.

XII.4.5 From the station of the two feet of her, soaking namely visits (him); unexpectedly are they crushed who snuff at her with the mouth.

XII.4.6 Whoever punches the two ears of her, he falls under the wrath of the gods; if he thinks "I am making a mark", he makes his possessions less.

XII.4.7 If, for any one's advantage, any one cuts off the tail-tuft of her, then his colts die, and the wolf slays his calves.

XII.4.8 If of her, while being with her master, a cow hath vexed the hair, then his boys die, the yakṣma visits him unexpectedly.

XII.4.9 If the lye, the dung of her a barbarian woman flings together, then is born what is deformed, what will not escape from that sin.

जायमानाभि जायते देवान्त्सब्राह्मणान्वशा ।
तस्माद्ब्रह्मभ्यो देयैषा तदाहुः स्वस्य गोपनम् ॥१०॥
य एनां वनिमायन्ति तेषां देवकृता वशा ।
ब्रह्मज्येयं तदब्रुवन्य एनां निप्रियायते ॥११॥
य आर्षेयेभ्यो याचद्भ्यो देवानां गां न दित्सति ।
आ स देवेषु वृश्चते ब्राह्मणानां च मन्यवे ॥१२॥
यो अस्य स्याद्वशाभोगो अन्यामिच्छेत तर्हि सः ।
हिंस्ते अदत्ता पुरुषं याचितां च न दित्सति ॥१३॥
यथा शेवधिर्निहितो ब्राह्मणानां तथा वशा ।
तामेतदच्छायन्ति यस्मिन्कस्मिंश्च जायते ॥१४॥
स्वमेतदच्छायन्ति यद्वशां ब्राह्मणा अभि ।
यथैनानन्यस्मिञ्जिनीयादेवास्या निरोधनम् ॥१५॥

जायमाना । अभि । जायते । देवान् । सऽब्राह्मणान् । वशा ।
तस्मात् । ब्रह्मऽभ्यः । देया । एषा । तत् । आहुः । स्वस्य । गोपनम् ॥ १० ॥
ये । एनाम् । वनिम् । आऽयन्ति । तेषाम् । देवऽकृता । वशा ।
ब्रह्मऽज्येयम् । तत् । अब्रुवन् । यः । एनाम् । निऽप्रियायते ॥ ११ ॥
यः । आर्षेयेभ्यः । याचत्ऽभ्यः । देवानाम् । गाम् । न । दित्सति ।
आ । सः । देवेषु । वृश्चते । ब्राह्मणानाम् । च । मन्यवे ॥ १२ ॥
यः । अस्य । स्यात् । वशाऽभोगः । अन्याम् । इच्छेत । तर्हि । सः ।
हिंस्ते । अदत्ता । पुरुषम् । याचिताम् । च । न । दित्सति ॥ १३ ॥
यथा । शेवऽधिः । निऽहितः । ब्राह्मणानाम् । तथा । वशा ।
ताम् । एतत् । अच्छऽआयन्ति । यस्मिन् । कस्मिन् । च । जायते ॥ १४ ॥
स्वम् । एतत् । अच्छऽआयन्ति । यत् । वशाम् । ब्राह्मणाः । अभि ।
यथा । एनान् । अन्यस्मिन् । जिनीयात् । एव । अस्याः । निऽरोधनम् ॥ १५ ॥

XII.4.10 When being born, the cow is born for the gods together with the Brāhmans; therefore; she is to be given to the priests; that people call the guarding of one's possessions.

XII.4.11 They who come to the winning of her, theirs is the godmade cow; they calle it brāhman-scathing, if anyone keeps her to himself.

XII.4.12 Whoever is not willing to give the cow of the gods the the sons of seers that ask for her, he falls under the wrath of the gods and the fury of the Brāhmans.

XII.4.13 Whatever may be his use for the cow, he should then seek another; she ungiven, harms a man, if he is not willing to give her when asked for.

XII.4.14 As a deposited treasure, so of the Brāhmans is the cow; accordingly they come unto her, in whosesoever possession she is born.

XII.4.15 They come thus unto their own property, namely the Brāhmans unto the cow; as one might scathe them in any other respect, so is the keeping back of her.

चरे॑दे॒वा त्रै॑हाय॒णादवि॑ज्ञातगदा स॒ती ।
व॒शां च॑ वि॒द्यान्ना॑रद ब्रा॒ह्म॒णास्तर्ह्ये॒ष्याः ॥१६॥
य ए॑ना॒मव॑शा॒माह॑ दे॒वाना॒ं निहि॑तं नि॒धिम् ।
उ॒भौ तस्मै॑ भवाश॒र्वौ प॑रि॒क्रम्येषु॑मस्यतः ॥१७॥
यो अ॑स्या॒ ऊधो॒ न वेदाथो॑ अ॒स्या स्तना॑नु॒त ।
उ॒भये॑नै॒वास्मै॑ दु॒हे दातु॑ं चेदश॑कद्व॒शाम् ॥१८॥
दु॒र॒द॒भ्नैन॒मा श॑ये याचि॒तां च॒ न दित्स॑ति ।
नास्मै॒ कामा॒ः समृ॑ध्यन्ते॒ याम॑दत्त्वा॒ चिकी॑र्षति ॥१९॥
दे॒वा व॒शाम॑याच॒न्मुखं॑ कृत्वा ब्राह्म॑णम् ।
तेषा॒ं सर्वे॑षा॒मद॑द॒द्धेडं॒ न्ये॑ति॒ मानु॑षः ॥२०॥
हेडं॑ पश॒ूनां न्ये॑ति ब्रा॒ह्म॒णेभ्योद॑दद्व॒शाम् ।
दे॒वाना॒ं निहि॑तं भा॒गं मर्त्य॒श्चेन्नि॑प्रिया॒यते॑ ॥२१॥

चरे॑त् । ए॒व । आ । त्रै॒हा॒य॒नात् । अवि॑ज्ञातऽगदा । स॒ती ।
व॒शाम् । च॒ । वि॒द्यात् । ना॒र॒द॒ । ब्रा॒ह्म॒णाः । तर्हि॑ । ए॒ष्याः ॥ १६ ॥
यः । ए॒नाम् । अव॑शाम् । आह॑ । दे॒वाना॑म् । निऽहि॑तम् । नि॒ऽधिम् ।
उ॒भौ । तस्मै॑ । भ॒वा॒श॒र्वौ । प॒रि॒ऽक्रम्य॑ । इषु॑म् । अ॒स्य॒तः ॥ १७ ॥
यः । अ॒स्याः । ऊध॑ः । न । वेद॑ । अथो॒ इति॑ । अ॒स्याः । स्तना॑न् । उ॒त ।
उ॒भये॑न । ए॒व । अ॒स्मै॒ । दु॒हे॒ । दातु॑म् । च॒ । इत् । अश॑कत् । व॒शाम् ॥ १८ ॥
दु॒र॒द॒भ्ना । ए॒न॒म् । आ । श॒ये॒ । या॒चि॒ताम् । च॒ । न । दित्स॑ति ।
न । अ॒स्मै॒ । कामा॑ः । सम् । ऋ॒ध्य॒न्ते॒ । याम् । अद॑त्त्वा । चिकी॑र्षति ॥ १९ ॥
दे॒वाः । व॒शाम् । अ॒या॒च॒न् । मुख॑म् । कृ॒त्वा । ब्राह्म॑णम् ।
तेषा॑म् । सर्वे॑षाम् । अद॑दत् । हेड॑म् । नि । ए॒ति॒ । मानु॑षः ॥ २० ॥
हेड॑म् । प॒शू॒नाम् । नि । ए॒ति॒ । ब्रा॒ह्म॒णेभ्य॑ः । अद॑दत् । व॒शाम् ।
दे॒वाना॑म् । निऽहि॑तम् । भा॒गभ् । मर्त्य॑ः । च॒ । इत् । नि॒ऽप्रि॒य॒यते॑ ॥ २१ ॥

XII.4.16 She may go about until the space of three years, being of unrecognized speech; should he know the cow, O Nārada, then the Brāhmans are to be sought.

XII.4.17 Whoever declares her to be not the cow, the deposited deposit of the gods, at him Bhava and Śarva, both striding about, hurl the arrow.

XII.4.18 Whoever knows not the udder of her, and likewise the teats of her, to him she yields milk with both, if he has been able to give the cow.

XII.4.19 Door-damaging lies she on him, if he is not willing to give her when asked for; he does not succeed in the desires which, without having given her, he would fain accomplish.

XII.4.20 The gods asked for the cow, having made the Brāhman their mouth; the wrath of them all incurs the man who gives not.

XII.4.21 He incurs the wrath of cattle who gives not the cow to the Brāhmans -- if a mortal keeps to himself the deposited portion of the gods.

यदन्ये शतं याचेयुर्ब्राह्मणा गोपतिं वशाम्।
अथैनां देवा अब्रुवन्नेवं ह विदुषो वशा ॥२२॥
य एवं विदुषेदत्त्वाथान्येभ्यो ददद्वशाम्।
दुर्गा तस्मा अधिष्ठाने पृथिवी सहदेवता ॥२३॥
देवा वशामयाचन्यस्मिन्नग्रे अजायत।
तामेतां विद्यान्नारदः सह देवैरुदाजत ॥२४॥
अनपत्यमल्पपशुं वशा कृणोति पूरुषम्।
ब्राह्मणैश्च याचितामथैनां निप्रियायते ॥२५॥
अग्नीषोमाभ्यां कामाय मित्राय वरुणाय च।
तेभ्यो याचन्ति ब्राह्मणास्तेष्वा वृश्चतेददत् ॥२६॥
यावदस्या गोपतिर्नोपशृणुयादृचः स्वयम्।
चरेदस्य तावद्गोषु नास्य श्रुत्वा गृहे वसेत् ॥२७॥

यत्। अन्ये। शतम्। याचेयुः। ब्राह्मणाः। गोऽपतिम्। वशाम्।
अथ। एनाम्। देवाः। अब्रुवन्। एवम्। ह। विदुषः। वशा ॥ २२ ॥
यः। एवम्। विदुषे। अदत्त्वा। अथ। अन्येभ्यः। ददत्। वशाम्।
दुःऽगा। तस्मै। अधिऽस्थाने। पृथिवी। सहऽदेवता ॥ २३ ॥
देवाः। वशाम्। अयाचन्। यस्मिन्। अग्रे। अजायत।
ताम्। एताम्। विद्यात्। नारदः। सह। देवैः। उत्। आजत ॥ २४ ॥
अनपत्यम्। अल्पऽपशुम्। वशा। कृणोति। पुरुषम्।
ब्राह्मणैः। च। याचिताम्। अथ। एनाम्। निऽप्रियायते ॥ २५ ॥
अग्नीषोमाभ्याम्। कामाय। मित्राय। वरुणाय। च।
तेभ्यः। याचन्ति। ब्राह्मणाः। तेषु। आ। वृश्चते। अददत् ॥ २६ ॥
यावत्। अस्याः। गोऽपतिः। न। उपऽशृणुयात्। ऋचः। स्वयम्।
चरेत्। अस्य। तावत्। गोषु। न। अस्य। श्रुत्वा। गृहे। वसेत् ॥ २७ ॥

XII.4.22 If a hundred other Brāhmaṇs should ask the cow of its master, yet the gods said of her : the cow is his who knoweth thus.

XII.4.23 Whoever, not having given her to one who knoweth thus, then shall give the cow to others, hard to go upon for him in his station is the earth with its deity.

XII.4.24 The gods asked the cow (of him) in whose possession she was first born; that same one may Nārada know; together with the gods he drove her away.

XII.4.25 The cow makes a man destitute of descendants, poor in cattle, if when she is asked for by the Brāhmans, then he keeps her to himself.

XII.4.26 For Agni and Soma, for Love, for Mitra and for Varuna -- for these the Brāhmans ask her; under thier wrath falls he who gives not.

XII.4.27 So long as the master of her should not himself ovrhear the verses, so long may she go about among his kine; she may not abide in his house after he has heard.

यो अस्या ऋच उपश्रुत्याथ गोष्वचीचरत् ।
आयुश्च तस्य भूतिं च देवा वृश्चन्ति हीडिताः ॥२८॥
वशा चरन्ती बहुधा देवानां निहितो निधिः ।
आविष्कृणुष्व रूपाणि यदा स्थाम जिघांसति ॥२९॥
आविरात्मानं कृणुते यदा स्थाम जिघांसति ।
अथो ह ब्रह्मभ्यो वशा याच्ञ्याय कृणुते मनः ॥३०॥
मनसा सं कल्पयति तद्देवाँ अपि गच्छति ।
ततो ह ब्रह्माणो वशामुपप्रयन्ति याचितुम् ॥३१॥
स्वधाकारेण पितृभ्यो यज्ञेन देवताभ्यः ।
दानेन राजन्यो३ वशाया मातुर्हेडं न गच्छति ॥३२॥
वशा माता राजन्य३स्य तथा संभूतमग्रशः ।
तस्या आहुरनर्पणं यद्ब्रह्मभ्यः प्रदीयते ॥३३॥

यः । अस्याः । ऋचः । उपऽश्रुत्य । अथ । गोषु । अचीचरत् ।
आयुः । च । तस्य । भूतिम् । च । देवाः । वृश्चन्ति । हीडिताः ॥ २८ ॥
वशा । चरन्ती । बहुऽधा । देवानाम् । निऽहितः । निऽधिः ।
आविः । कृणुष्व । रूपाणि । यदा । स्थाम । जिघांसति ॥ २९ ॥
आविः । आत्मानम् । कृणुते । यदा । स्थाम । जिघांसति ।
अथो इति । ह । ब्रह्मऽभ्यः । वशा । याच्ञ्याय । कृणुते । मनः ॥ ३० ॥
मनसा । सम् । कल्पयति । तत् । देवान् । अपि । गच्छति ।
ततः । ह । ब्रह्माणः । वशाम् । उपऽप्रयन्ति । याचितुम् ॥ ३१ ॥
स्वधाऽकारेण । पितृऽभ्यः । यज्ञेन । देवताभ्यः ।
दानेन । राजन्यः । वशायाः । मातुः । हेडम् । न । गच्छति ॥ ३२ ॥
वशा । माता । राजन्यस्य । तथा । सम्ऽभूतम् । अग्रऽशः ।
तस्याः । आहुः । अनर्पणम् । यत् । ब्रह्मऽभ्यः । प्रऽदीयते ॥ ३३ ॥

XII.4.28 If any one, having overheard the verses of her, has then made her go about among his kine, both the life-time and the growth of him do the gods made wrathful, cut off.

XII.4.29 The cow, going about variously, the deposited deposit of the gods, manifests her forms, when she desires to go to her station.

XII.4.30 She manifests herself when she desires to go to her station; then the cow makes up her mind for the asking of the priests.

XII.4.31 She plans (it) with her mind; then she goes unto the gods; thence the priests go on to ask for the cow.

XII.4.32 By offering of svadhā to the Fathers, by sacrifice to the deities, by giving of the cow, the noble does not incur the mother's wrath.

XII.4.33 The cow is mother of the noble; so came it into being in the beginning; they call it a non-abandonment of her that she is presented to the priests.

यथाज्यं प्रगृहीतमालुम्पेत्स्रुचो अग्नये ।
एवा ह ब्रह्मभ्यो वशामग्नय आ वृश्चतेऽददत् ॥३४॥
पुरोडाशवत्सा सुदुघा लोकेऽस्मा उप तिष्ठति ।
सास्मै सर्वान्कामान्वशा प्रददुषे दुहे ॥३५॥
सर्वान्कामान्यमराज्ये वशा प्रददुषे दुहे ।
अथाहुर्नारकं लोकं निरुन्धानस्य याचिताम् ॥३६॥
प्रवीयमाना चरति क्रुद्धा गोपतये वशा ।
वेहतं मा मन्यमानो मृत्योः पाशेषु बध्यताम् ॥३७॥
यो वेहतं मन्यमानोमा च पचते वशाम् ।
अप्यस्य पुत्रान्पौत्रांश्च याचयते बृहस्पतिः ॥३८॥
महदेषाव तपति चरन्ती गोषु गौरपि ।
अथो ह गोपतये वशाददुषे विषं दुहे ॥३९॥

यथा । आज्यम् । प्रऽगृहीतम् । आऽलुम्पेत् । स्रुचः । अग्नये ।
एव । ह । ब्रह्मऽभ्यः । वशाम् । अग्नये । आ । वृश्चते । अददत् ॥ ३४ ॥
पुरोडाशऽवत्सा । सुऽदुघा । लोके । अस्मै । उप । तिष्ठति ।
सा । अस्मै । सर्वान् । कामान् । वशा । प्रऽददुषे । दुहे ॥ ३५ ॥
सर्वान् । कामान् । यमऽराज्ये । वशा । प्रऽददुषे । दुहे ।
अथ । आहुः । नरकम् । लोकम् । निऽरुन्धानस्य । याचिताम् ॥ ३६ ॥
प्रऽवीयमाना । चरति । क्रुद्धा । गोऽपतये । वशा ।
वेहतम् । मा । मन्यमानः । मृत्योः । पाशेषु । बध्यताम् ॥ ३७ ॥
यः । वेहतम् । मन्यमानः । अमा । च । पचते । वशाम् ।
अपि । अस्य । पुत्रान् । पौत्रान् । च । याचयते । बृहस्पतिः ॥ ३८ ॥
महत् । एषा । अव । तपति । चरन्ती । गोषु । गौः । अपि ।
अथो इति । ह । गोऽपतये । वशा । अददुषे । विषम् । दुहे ॥ ३९ ॥

XII.4.34 As one might snatch from the spoon sacrificial butter held forth for the fire, so he who gives not the cow (vaśā) (to the priests) falls under the wrath of Agni.

XII.4.35 With the sacrificial cake as calf, milking well, she draws near to him in the world; she yeilds to him all his desires -- (namely), the cow to him who has presented her.

XII.4.36 All his desires, in Yama's realm, does the cow yield to him who has presented her; likewise they call hell the world of him who keeps her back when asked for.

XII.4.37 Being impregnated, the cow goes about angry at her master: thinking me barren, let him be bound in the fetters of death.

XII.4.38 And he who, thinking her barren, cooks the cow at home -- his sons and sons'sons also does Bṛhaspati cause to be asked for.

XII.4.39 She sends down great heat, going about a cow among kine; further, to the master, who has not given her the cow milks poison.

प्रि॒यं प॑शू॒नां भ॑वति॒ यद्ब्र॒ह्मभ्यः॑ प्रदी॒यते॑ ।
अथो॑ व॒शाया॒स्तत्प्रि॒यं यद्दे॑व॒त्रा ह॒विः स्यात् ॥४०॥
या व॒शा उ॒दक॑ल्पयन्दे॒वा य॒ज्ञादु॒देत्य॑ ।
तासां॑ विलि॒प्त्यं भी॒मामु॒दाकु॑रुत नार॒दः ॥४१॥
तां दे॒वा अ॑मीमांसन्त व॒शेया३मव॒शेति॑ ।
ताम॑ब्रवीन्नार॒द ए॒षा व॒शानां॑ व॒शत॒मेति॑ ॥४२॥
कति॒ नु व॒शा ना॑रद॒ यास्त्वं वे॑त्थ मनु॒ष्य॒जाः ।
तास्त्वा॑ पृच्छामि वि॒द्वांसं॒ कस्या॒ नाश्नी॑या॒दब्रा॑ह्मणः ॥४३॥
वि॒लि॒प्त्या बृ॑हस्पते॒ या च॑ सू॒तव॑शा व॒शा ।
तस्या॒ नाश्नी॑या॒दब्रा॑ह्मणो॒ य आ॒शंसे॑त॒ भूत्या॑म् ॥४४॥
नम॑स्ते अस्तु नारदानु॒ष्ठु वि॒दुषे॑ व॒शा ।
क॒त॒मासां॑ भी॒मत॑मा॒ यामद॑त्त्वा परा॒भवे॑त् ॥४५॥

प्रि॒यम् । प॒शू॒नाम् । भ॒व॒ति॒ । यत् । ब्र॒ह्मऽभ्यः॑ । प्र॒ऽदी॒यते॑ ।
अथो॒ इति॑ । व॒शायाः॑ । तत् । प्रि॒यम् । यत् । दे॒व॒ऽत्रा । ह॒विः । स्यात् ॥ ४० ॥
याः । व॒शाः । उ॒त्ऽअक॑ल्पयन् । दे॒वाः । य॒ज्ञात् । उ॒त्ऽएत्य॑ ।
तासा॑म् । वि॒ऽलि॒प्त्यम् । भी॒माम् । उ॒त्ऽआकु॑रुत । ना॒र॒दः ॥ ४१ ॥
ताम् । दे॒वाः । अ॒मी॒मां॒स॒न्त॒ । व॒शा । इ॒या३म् । अव॑शा३ । इति॑ ।
ताम् । अ॒ब्र॒वी॒त् । ना॒र॒दः । ए॒षा । व॒शाना॑म् । व॒शऽत॑मा । इति॑ ॥ ४२ ॥
कति॑ । नु । व॒शाः । ना॒र॒द॒ । याः । त्वम् । वेत्थ॑ । म॒नु॒ष्य॒ऽजाः ।
ताः । त्वा॒ । पृ॒च्छा॒मि॒ । वि॒द्वांस॑म् । कस्याः॑ । न । अ॒श्नी॒या॒त् । अब्रा॑ह्मणः ॥ ४३ ॥
वि॒ऽलि॒प्त्याः । बृ॒ह॒स्प॒ते॒ । या । च॒ । सू॒तऽव॑शा । व॒शा ।
तस्याः॑ । न । अ॒श्नी॒या॒त् । अब्रा॑ह्मणः । यः । आ॒ऽशंसे॑त । भूत्या॑म् ॥ ४४ ॥
नम॑ः । ते॒ । अ॒स्तु॒ । ना॒र॒द॒ । अ॒नु॒ष्ठु । वि॒दुषे॑ । व॒शा ।
क॒त॒मा । आ॒सा॒म् । भी॒मऽत॑मा । याम् । अद॑त्त्वा । प॒रा॒ऽभवे॑त् ॥ ४५ ॥

XII.4.40 It is a thing dear to the cattle that she is presented to the priests; further, that is a thing dear to the cow, that she be an oblation to the gods.

XII.4.41 What cows the gods shaped out, rising up from the sacrifice, of them Nārada selected for himself the fearful viliptī.

XII.4.42 The gods questioned about her: is this a cow or not a cow ? Of her Nārada said: she is of cows the most truly cow.

XII.4.43 How many, pray, Nārada, are the cows which thou knowest, born among men ? Those I ask of thee who knowest; of which may a non-Brāhman not partake.

XII.4.44 The viliptī, O Bṛhaspati, and the cow that has given birth to (such) a cow -- of that one a non-Brāhman who should hope for prosperity (bhūti), may not partake.

XII.4.45 Homage to be thee, O Nārada; (be) the cow to him who at once knows it. Which one of them is the most fearful, not having given which, one would perish?

विलिप्ती या बृहस्पतेथो सूतवशा वशा ।
तस्या नाश्नीयादब्राह्मणो य आशंसेत भूत्याम् ॥४६॥
त्रीणि वै वशाजातानि विलिप्ती सूतवशा वशा ।
ताः प्र यच्छेद्ब्रह्मभ्यः सोऽनाव्रस्कः प्रजापतौ ॥४७॥
एतद्वो ब्राह्मणा हविरिति मन्वीत याचितः ।
वशां चेदेनं याचेयुर्या भीमाददुषो गृहे ॥४८॥
देवा वशां पर्यवदन्न नोऽदादिति हीडिताः ।
एताभिर्ऋग्भिर्भेदं तस्माद्वै स पराभवत् ॥४९॥
उतैनां भेदो नाददाद्वशामिन्द्रेण याचितः ।
तस्मात्तं देवा आगसोऽवृश्चन्नहमुत्तरे ॥५०॥
ये वशाया अदानाय वदन्ति परिरापिणः ।
इन्द्रस्य मन्यवे जाल्मा आ वृश्चन्ते अचित्त्या ॥५१॥

विऽलिप्ती । या । बृहस्पते । अथो इति । सूतऽवशा । वशा ।
तस्याः । न । अश्नीयात् । अब्राह्मणः । यः । आऽशंसेत । भूत्याम् ॥ ४६ ॥
त्रीणि । वै । वशाऽजातानि । विऽलिप्ती । सूतऽवशा । वशा ।
ताः । प्र । यच्छेत् । ब्रह्मऽभ्यः । सः । अनाव्रस्कः । प्रजाऽपतौ ॥ ४७ ॥
एतत् । वः । ब्राह्मणाः । हविः । इति । मन्वीत । याचितः ।
वशाम् । च । इत् । एनम् । याचेयुः । या । भीमा । अददुषः । गृहे ॥ ४८ ॥
देवाः । वशाम् । परि । अवदन् । न । नः । अदात् । इति । हीडिताः ।
एताभिः । ऋक्ऽभिः । भेदम् । तस्मात् । वै । सः । परा । अभवत् ॥ ४९ ॥
उत । एनाम् । भेदः । न । अददात् । वशाम् । इन्द्रेण । याचितः ।
तस्मात् । तम् । देवाः । आगसः । अवृश्चन् । अहम्ऽउत्तरे ॥ ५० ॥
ये । वशायाः । अदानाय । वदन्ति । परिऽरापिणः ।
इन्द्रस्य । मन्यवे । जाल्माः । आ । वृश्चन्ते । अचित्त्या ॥ ५१ ॥

XII.4.46 She that is viliptī, O Bṛhaspati, further the cow that has given birth to (such) a cow -- of that one a non-Brahman who should hope for prosperity may not partake.

XII.4.47 Three verily are the kinds of cow; the viliptī, she that has given birth to (such) a cow, the (simple) cow; these one should present to the priests (then) he falls not under the wrath of Prajāpati.

XII.4.48 This, O Brahmans, is your oblation – so, when asked (therefor), whould he think, if they should ask of him the cow, which in the house of him who has not given her is fearful.

XII.4.49 The gods talked about the cow in wrath, saying: he hath not given it to us; with these verses (they talked about) Bheda; therefore indeed he perished.

XII.4.50 And Bheda gave her not, when asked by Indra for the cow; for that offense the gods cut him off in the contest for superiority.

XII.4.51 They who, wheedling, advise to the non-giving of the cow, the villains fall under the fury of Indra through ingorance.

ये गोपतिं पराणीयाथाहुर्मा ददा इति ।
रुद्रस्यास्तां ते हेतिं परि यन्त्यचित्त्या ॥५२॥
यदि हुतां यद्यहुताममा च पचते वशाम् ।
देवान्त्सब्राह्मणानृत्वा जिह्मो लोकान्निर्ऋच्छति ॥५३॥

ये । गोऽपतिम् । पराऽनीय । अथ । आहुः । मा । ददाः । इति ।
रुद्रस्य । अस्ताम् । ते । हेतिम् । परि । यन्ति । अचित्त्या ॥ ५२ ॥
यदि । हुताम् । यदि । अहुताम् । अमा । च । पचते । वशाम् ।
देवान् । सऽब्राह्मणान् । ऋत्वा । जिह्मः । लोकात् । निः । ऋच्छति ॥ ५३ ॥

(५) पञ्चमं सूक्तम्

'श्रमेण तपसा' इत्यारभ्य 'सूर्य एनम्' इत्यन्तानां सप्तपर्यायाणामथर्वाचार्य ऋषिः । ब्रह्मगवी देवता ॥

[१] प्रथमः पर्यायः

(१–६) षडृचस्यास्य पर्यायस्य (१) प्रथमर्चः प्राजापत्यानुष्टुप् , (२) द्वितीयाया भुरिक्साम्न्यनुष्टुप् , (३) तृतीयायाश्चतुष्पदा स्वराडुष्णिक् , (४) चतुर्थ्या आसुर्यनुष्टुप् , (५) पञ्चम्याः साम्नी पङ्क्तिः, (६) षष्ठयाश्च साम्न्युष्णिक् छन्दांसि ॥

श्रमेण तपसा सृष्टा ब्रह्मणा वित्तर्ते श्रिता ॥१॥
सत्येनावृता श्रिया प्रावृता यशसा परीवृता ॥२॥
स्वधया परिहिता श्रद्धया पर्यूढा दीक्षया गुप्ता यज्ञे प्रतिष्ठिता लोको निधनम् ॥३॥
ब्रह्म पदवायं ब्राह्मणोधिपतिः ॥४॥
तामाददानस्य ब्रह्मगवीं जिनतो ब्राह्मणं क्षत्रियस्य ॥५॥
अप क्रामति सूनृता वीर्यं पुण्या लक्ष्मीः ॥६॥

श्रमेण । तपसा । सृष्टा । ब्रह्मणा । वित्ता । ऋते । श्रिता ॥ १ ॥
सत्येन । आऽवृता । श्रिया । प्रावृता । यशसा । परिऽवृता ॥ २ ॥
स्वधया । परिऽहिता । श्रद्धया । परिऽऊढा । दीक्षया । गुप्ता । यज्ञे । प्रतिऽस्थिता ।
लोकः । निऽधनम् ॥ ३ ॥
ब्रह्म । पदऽवायम् । ब्राह्मणः । अधिऽपतिः ॥ ४ ॥
ताम् । आऽददानस्य । ब्रह्मऽगवीम् । जिनतः । ब्राह्मणम् । क्षत्रियस्य ॥ ५ ॥
अप । क्रामति । सूनृता । वीर्यम् । पुण्या । लक्ष्मीः ॥ ६ ॥

XII.4.52 They who, leading away her master, then say: do not give -- they, through ingorance, go to meet the hurled missile of Rudra.

XII.4.53 If as offered and if as unoffered one cooks the cow in private, coming into collision with the gods accompanied by the Brahmans, he goes supine out of the world.

The Brahman's cow

PARYĀYA I

XII.5.1 By toil, by penance (is she) created, acquired by brahman, supported on righteousness.

XII.5.2 Covered with truth, enclosed with fortune, enveloped with glory.

XII.5.3 Set about with svadhā, surrounded with faith, guarded by consecration, standing firm in the offering, the world her post.

XII.5.4 Brahman her guide, the Brahman her over-lord.

XII.5.5 Of the Kṣatriya who takes to himself that Brahman cow, who scathes the Brahman -

XII.5.6 There departs the happiness, the heroism, the good luck.

[२] द्वितीयः पर्यायः

(१-५) पञ्चर्चस्यास्य पर्यायस्य (१) प्रथमर्चः साम्नी त्रिष्टुप्, (२) द्वितीयाया भुरिगार्च्यनुष्टुप्, (३) तृतीयाया आर्च्यनुष्टुप्, (४) चतुर्थ्या उष्णिक् (एताश्चतस्र एकपदाः), (५) पञ्चम्याश्चार्ची निचृत्पङ्क्तिश्छन्दांसि ॥

ओज॑श्च॒ तेज॑श्च॒ सह॑श्च॒ बलं॑ च॒ वाक्चे॑न्द्रि॒यं च॒ श्रीश्च॒ धर्म॑श्च ॥१॥ -[७]

ब्रह्म॑ च क्ष॒त्रं च॑ रा॒ष्ट्रं च॒ विश॑श्च॒ त्विषि॑श्च॒ यश॑श्च॒ वर्च॑श्च॒ द्रवि॑णं च ॥२॥ -[८]

आयु॑श्च रू॒पं च॒ नाम॑ च की॒र्तिश्च॑ प्रा॒णश्चा॑पा॒नश्च॒ चक्षु॑श्च॒ श्रोत्रं॑ च ॥३॥ -[९]

पय॑श्च॒ रस॒श्चान्नं॑ चा॒न्नाद्यं॑ च॒र्तं च॑ स॒त्यं चे॒ष्टं च॑ पू॒र्तं च॑ प्र॒जा च॑ प॒शव॑श्च ॥४॥-[१०]

तानि॒ सर्वा॒ण्यप॑ क्रामन्ति ब्रह्मग॒वीमा॒ददा॑नस्य जिन॒तो ब्रा॑ह्म॒णं क्ष॒त्रिय॑स्य ॥५॥ -[११]

ओजः॑ । च॒ । तेजः॑ । च॒ । सहः॑ । च॒ । बल॑म् । च॒ । वाक् । च॒ । इ॒न्द्रि॒यम् । च॒ । श्रीः । च॒ । धर्मः॑ । च॒ ॥ १ ॥

ब्रह्म॑ । च॒ । क्ष॒त्रम् । च॒ । रा॒ष्ट्रम् । च॒ । विशः॑ । च॒ । त्विषिः॑ । च॒ । यशः॑ । च॒ । वर्चः॑ । च॒ । द्रवि॑णम् । च॒ ॥ २ ॥

आयुः॑ । च॒ । रू॒पम् । च॒ । नाम॑ । च॒ । की॒र्तिः । च॒ । प्रा॒णः । च॒ । अ॒पा॒नः । च॒ । चक्षुः॑ । च॒ । श्रोत्र॑म् । च॒ ॥ ३ ॥

पयः॑ । च॒ । रसः॑ । च॒ । अन्न॑म् । च॒ । अ॒न्न॒ऽअद्य॑म् । च॒ । ऋ॒तम् । च॒ । स॒त्यम् । च॒ । इ॒ष्टम् । च॒ । पू॒र्तम् । च॒ । प्र॒ऽजा । च॒ । प॒शवः॑ । च॒ ॥ ४ ॥ [१०]

तानि॑ । सर्वा॑णि । अप॑ । क्रा॒म॒न्ति॒ । ब्र॒ह्म॒ऽग॒वीम् । आ॒ऽददा॑नस्य । जि॒न॒तः । ब्रा॒ह्म॒णम् । क्ष॒त्रिय॑स्य ॥

[३] तृतीयः पर्यायः

(१-१६) षोडशर्चस्यास्य पर्यायस्य (१) प्रथमर्चो विराड्विषमा गायत्री, (२) द्वितीयाया आसुर्यनुष्टुप्, (३, १५) तृतीयापञ्चदश्योः साम्न्युष्णिक्, (४) चतुर्थ्या गायत्री, (५-६, ८-९) पञ्चमीषष्ठयष्टमीनवमीनां प्राजापत्यानुष्टुप्, (७) सप्तम्या याजुषी जगती, (१०, १४) दशमीचतुर्दश्योः साम्न्यनुष्टुप्, (११) एकादश्याः साम्नी बृहती, (१२) द्वादश्या याजुषी त्रिष्टुप्, (१३) त्रयोदश्या आसुरी गायत्री, (१६) षोडश्याश्चार्च्युष्णिक् छन्दांसि ॥

सैषा भी॒मा ब्र॑ह्मग॒व्य१॒॑घवि॑षा सा॒क्षात्कृ॒त्या कूल्ब॑ज॒मावृ॑ता ॥१॥ -[१२]

सर्वा॑ण्यस्यां घो॒राणि॒ सर्वे॑ च मृ॒त्यवः॑ ॥२॥ -[१३]

सा । ए॒षा । भी॒मा । ब्र॒ह्म॒ऽग॒वी । अ॒घऽवि॑षा । स॒ऽअ॒क्षात् । कृ॒त्या । कूल्ब॑जम् । आऽवृ॑ता ॥

सर्वा॑णि । अ॒स्या॒म् । घो॒राणि॑ । सर्वे॑ । च॒ । मृ॒त्यवः॑ ॥ २ ॥

PARYĀYA - II

XII.5.7 Both force, and brilliancy, and power, and strength, and speech, and sense, and fortune, and virtue, -

XII.5.8 And holiness, and dominion, and kingdom, and subjects, and brightness, and glory, and honor, and property, -

XII.5.9 And life-time, and form, and name, and fame, and breath, and expiration, and sight, and hearing, -

XII.5.10 And milk, and sap, and food, and food-eating, and righteousness, and truth, and sacrifice, and bestowal, and progeny and cattle, -

XII.5.11 All these depart from the Kṣatriya who takes to himself the Brahman-cow, who scathes the Brahman.

PARYĀYA - III

XII.5.12 This same brahman-cow (is) fearful, having deadly poison, witchcraft incarnate, kūlbaja when covered.

XII.5.13 In her are all terrible things and all deaths.

सर्वाण्यस्यां क्रूराणि सर्वे पुरुषवधाः ॥३॥-[१४]
सा ब्रह्मज्यं देवपीयुं ब्रह्मगव्यादीयमाना मृत्योः पड्वीश आ द्यति ॥४॥-[१५]
मेनिः शतवधा हि सा ब्रह्मज्यस्य क्षितिर्हि सा ॥५॥-[१६]
तस्माद्वै ब्राह्मणानां गौर्दुराधर्षा विजानता ॥६॥-[१७]
वज्रो धावन्ती वैश्वानर उद्वीता ॥७॥ -[१८]
हेतिः शफानुत्खिदन्ती महादेवो३पेक्षमाणा ॥८॥ -[१९]
क्षुरपविरीक्षमाणा वाश्यमानाभि स्फूर्जति ॥९॥ -[२०]
मृत्युर्हिङ्कृण्वत्युग्रो देवः पुच्छं पर्यस्यन्ती ॥१०॥ -[२१]

सर्वाणि । अस्याम् । क्रूराणि । सर्वे । पुरुषऽवधाः ॥ ३ ॥

सा । ब्रह्मऽज्यम् । देवऽपीयुम् । ब्रह्मऽगवी । आऽदीयमाना । मृत्योः । पड्वीशे । आ । द्यति ॥

मेनिः । शतऽवधा । हि । सा । ब्रह्मऽज्यस्य । क्षितिः । हि । सा ॥ ५ ॥

तस्मात् । वै । ब्राह्मणानाम् । गौः । दुःऽआधर्षा । विऽजानता ॥ ६ ॥

वज्रः । धावन्ती । वैश्वानरः । उत्ऽवीता ॥ ७ ॥

हेतिः । शफान् । उत्ऽखिदन्ती । महाऽदेवः । अपऽईक्षमाणा ॥ ८ ॥

क्षुरऽपविः । ईक्षमाणा । वाश्यमाना । अभि । स्फूर्जति ॥ ९ ॥

मृत्युः । हिङ्ऽकृण्वती । उग्रः । देवः । पुच्छम् । परिऽअस्यन्ती ॥ १० ॥

XII.5.14 In her are all cruel things, all men-killers.

XII.5.15 This Brahman-cow, when taken to oneself, binds the Brahman-scather, the god-reviler, in the shackle of death.

XII.5.16 Verily a hundred-killing weapon is she; verily the destruction of the Brahman-scather is she.

XII.5.17 Therefore indeed is the cow of the Brahmans hard to be dared against by one who understands.

XII.5.18 (She is) a thunderbolt when running, Vaiśvānara when driven up.

XII.5.19 A missile when extracting her hoofs, the great god when looking away.

XII.5.20 Keen-edged when looking; when bellowing, she thunders at one.

XII.5.21 Death when uttering hing; the formidable god when slinging about her tail.

सर्वज्यानिः कर्णौ वरीवर्जयन्ती राजयक्ष्मो मेहन्ती ॥११॥ -[२२]
मेनिर्दुह्यमाना शीर्षक्तिर्दुग्धा ॥१२॥ -[२३]
सेदिरुपतिष्ठन्ती मिथोयोधः परामृष्टा ॥१३॥ -[२४]
शरव्या३ मुखेपिनह्यमान ऋतिर्हन्यमाना ॥१४॥ -[२५]
अघविषा निपतन्ती तमो निपतिता ॥१५॥ -[२६]
अनुगच्छन्ती प्राणानुप दासयति ब्रह्मगवी ब्रह्मज्यस्य ॥१६॥ -[२७]

सर्वऽज्यानिः । कर्णौ । वरीवर्जयन्ती । राजऽयक्ष्मः । मेहन्ती ॥ ११ ॥
मेनिः । दुह्यमाना । शीर्षक्तिः । दुग्धा ॥ १२ ॥
सेदिः । उपऽतिष्ठन्ती । मिथःऽयोधः । पराऽमृष्टा ॥ १३ ॥
शरव्या३ । मुखे । अपिऽनह्यमाने । ऋतिः । हन्यमाना ॥ १४ ॥
अघऽविषा । निऽपतन्ती । तमः । निऽपतिता ॥ १५ ॥
अनुऽगच्छन्ती । प्राणान् । उप । दासयति । ब्रह्मऽगवी । ब्रह्मऽज्यस्य ॥ १६ ॥

[४] चतुर्थः पर्यायः

(१-११) एकादशर्चस्यास्य पर्यायस्य (१) प्रथमर्च आसुरी गायत्री, (२, १०) द्वितीयादशम्योरासुर्यनुष्टुप्, (३) तृतीयायाः साम्न्यनुष्टुप्, (४) चतुर्थ्या याजुषी त्रिष्टुप्, (५) पञ्चम्याः साम्नी गायत्री, (६-७) षष्ठीसप्तम्योः साम्नी बृहती, (८) अष्टम्या भुरिक्साम्न्यनुष्टुप्, (९) नवम्याः साम्न्युष्णिक्, (११) एकादश्याश्च प्रतिष्ठा गायत्री छन्दांसि ॥

वैरं विकृत्यमाना पौत्राद्यं विभाज्यमाना ॥१॥ -[२८]
देवहेतिर्ह्रियमाणा व्यृद्धिर्हृता ॥२॥ -[२९]

वैरम् । विऽकृत्यमाना । पौत्रऽआद्यम् । विऽभाज्यमाना ॥ १ ॥
देवऽहेतिः । ह्रियमाणा । विऽऋद्धिः । हृता ॥ २ ॥

XII.5.22 Total scathing when twisting about her ears; king Yakṣma when urinating.

XII.5.23 A weapon when being milked; headache when milked.

XII.5.24 Debility when approaching; mutual strife when felt of.

XII.5.25 A shaft when her mouth is being fastened up, mishap when being slain.

XII.5.26 Deadly poisonous when falling down; darkness when fallen down.

XII.5.27 Going after him, the Brahman-cow exhausts the breaths of the Brahman-scather.

PARYĀYA - IV

XII.5.28 (She is) hostility when being cutup, the eating of one's children when being shared out.

XII.5.29 A god's missile when being taken, failure when taken.

पाप्माधिधीयमाना पारुष्यमवधीयमाना ॥३॥ -[३०]
विषं प्रयस्यन्ती तक्मा प्रयस्ता ॥४॥ -[३१]
अघं पच्यमाना दुष्वप्न्यं पक्का ॥५॥ -[३२]
मूलबर्हणी पर्याक्रियमाणा क्षितिः पर्याकृता ॥६॥ -[३३]
असंज्ञा गन्धेन शुगुद्ध्रियमाणाशीविष उद्धृता ॥७॥ -[३४]
अभूतिरुपह्रियमाणा पराभूतिरुपहृता ॥८॥ -[३५]
शर्वः क्रुद्धः पिश्यमाना शिमिदा पिशिता ॥९॥ -[३६]
अवर्तिरश्यमाना निर्ऋतिरशिता ॥१०॥ -[३७]
अशिता लोकाच्छिनत्ति ब्रह्मगवी ब्रह्मज्यमस्माच्चामुष्माच्च ॥११॥ -[३८]

पाप्मा । अधिऽधीयमाना । पारुष्यम् । अवऽधीयमाना ॥ ३ ॥

विषम् । प्रऽयस्यन्ती । तक्मा । प्रऽयस्ता ॥ ४ ॥

अघम् । पच्यमाना । दुःऽस्वप्न्यम् । पक्का ॥ ५ ॥

मूलऽबर्हणी । परिऽआक्रियमाणा । क्षितिः । परिऽआकृता ॥ ६ ॥

असम्ऽज्ञा । गन्धेन । शुक् । उद्ध्रियमाणा । आशीविषः । उद्धृता ॥ ७ ॥

अभूतिः । उपऽह्रियमाणा । पराऽभूतिः । उपऽहृता ॥ ८ ॥

शर्वः । क्रुद्धः । पिश्यमाना । शिमिदा । पिशिता ॥ ९ ॥

अवर्तिः । अश्यमाना । निःऽऋतिः । अशिता ॥ १० ॥

अशिता । लोकात् । छिनत्ति । ब्रह्मऽगवी । ब्रह्मऽज्यम् । अस्मात् । च । अमुष्मात् । च ॥ ११ ॥

XII.5.30 Evil when being set on, harshness when being set down.

XII.5.31 Poison when heating, takmān when heated.

XII.5.32 Evil when being cooked, bad dreaming when cooked.

XII.5.33 Uprooting when being turned about, destruction when turned about.

XII.5.34 Discovered by smell; pain when being taken up, a poison-snake when taken up.

XII.5.35 Non-prosperity when being served up, disaster when served up.

XII.5.36 Śarva angered when being dressed, Śimidā when dressed.

XII.5.37 Ruin when being partaken of, perdition when partaken of.

XII.5.38 When partaken of, the Brahman-cow cuts off the Brahman-scather from the world, from both this one and the one yonder.

[५] पञ्चमः पर्यायः

(१-८) अष्टर्चस्यास्य पर्यायस्य (१) प्रथमर्चः साम्नी पङ्क्तिः, (२) द्वितीयाया याजुष्यनुष्टुप्, (३, ८) तृतीयाष्टम्यो- र्भुरिक्साम्न्यनुष्टुप्, (४) चतुर्थ्या आसुरी बृहती, (५) पञ्चम्याः साम्नी बृहती, (६) षष्ठ्याः पिपीलिकमध्यानुष्टुप्, (७) सप्तम्याश्चार्ची बृहती छन्दांसि ॥

तस्या आहननं कृत्या मेनिराशसनं वलग ऊबध्यम् ॥१॥ -[३९]

अस्वगता परिह्रुता ॥२॥ -[४०]

अग्निः क्रव्याद्भूत्वा ब्रह्मगवी ब्रह्मज्यं प्रविश्यात्ति ॥३॥-[४१]

सर्वास्याङ्गा पर्वा मूलानि वृश्चति ॥४॥ -[४२]

छिनत्त्यस्य पितृबन्धु परा भावयति मातृबन्धु ॥५॥ -[४३]

विवाहां ज्ञातीन्त्सर्वानपि क्षापयति ब्रह्मगवी ब्रह्मज्यस्य क्षत्रियेणापुनर्दीयमाना ॥६॥-[४४]

अवास्तुमेनमस्वगमप्रजसं करोत्यपरापरणो भवति क्षीयते ॥७॥ -[४५]

य एवं विदुषो ब्राह्मणस्य क्षत्रियो गामादत्ते ॥८॥ -[४६]

तस्याः । आऽहननम् । कृत्या । मेनिः । आऽशसनम् । वलगः । ऊबध्यम् ॥ १ ॥

अस्वगता । परिऽह्रुता ॥ २ ॥

अग्निः । क्रव्यऽअत् । भूत्वा । ब्रह्मऽगवी । ब्रह्मऽज्यम् । प्रऽविश्य । अत्ति ॥ ३ ॥

सर्वा । अस्य । अङ्गा । पर्वा । मूलानि । वृश्चति ॥ ४ ॥

छिनत्ति । अस्य । पितृऽबन्धु । परा । भावयति । मातृऽबन्धु ॥ ५ ॥

विऽवाहान् । ज्ञातीन् । सर्वान् । अपि । क्षापयति । ब्रह्मऽगवी । ब्रह्मऽज्यस्य । क्षत्रियेण । अपुनःऽदीयमाना ॥ ६ ॥ [४४]

अवास्तुम् । एनम् । अस्वगम् । अप्रजसम् । करोति । अपराऽपरणः । भवति । क्षीयते ॥

यः । एवम् । विदुषः । ब्राह्मणस्य । क्षत्रियः । गाम् । आऽदत्ते ॥ ८ ॥

PARYĀYA - V

XII.5.39 The slaying of her is witchcraft, her cutting up is a weapon, the contents of her bowels a secret charm.

XII.5.40 (She is) homelessness when hidden.

XII.5.41 The Brahman-cow, having become the flesh-eating Agni, entering into the Brahman-scather, eats him.

XII.5.42 All his limbs, joints, roots, she cuts off.

XII.5.43 She severs his paternal connection, makes perish his maternal connection.

XII.5.44 All the marriages, acquaintances of the Brahman-scather does, the Brahman-cow scorch, when not given back by a Kṣhatriya.

XII.5.45 Without abode, without home, without progeny, she makes him; he becomes without succession; he is destroyed.

XII.5.46 Whatever Kṣhatriya takes to himself the cow of a Brahman who knoweth thus.

[६] षष्ठः पर्यायः

(१–१५) पञ्चदशर्चस्यास्य पर्यायस्य (१, ३, ५–७, ११–१३, १५) प्रथमातृतीययोर्ऋचोः पञ्चम्यादितृचस्यैकादश्यादितृचस्य पञ्चदश्याश्च प्राजापत्यानुष्टुप्, (२) द्वितीयाया आर्ष्यनुष्टुप्, (४) चतुर्थ्याः साम्नी बृहती, (८–९) अष्टमीनवम्योः प्राजापत्योष्णिक्, (१०) दशम्या आसुरी गायत्री, (१४) चतुर्दश्याश्च गायत्री छन्दांसि ॥

क्षिप्रं वै तस्याहनने गृध्राः कुर्वत ऐलबम् ॥१॥ -[४७]

क्षिप्रं वै तस्यादहनं परि नृत्यन्ति केशिनीराघ्नानाः पाणिनोरसि कुर्वाणाः पापमैलबम् ॥२॥ -[४८]

क्षिप्रं वै तस्य वास्तुषु वृकाः कुर्वत ऐलबम् ॥३॥ -[४९]

क्षिप्रं वै तस्य पृच्छन्ति यत्तदासी३दिदं नु ता३दिति ॥४॥ -[५०]

छिन्ध्या च्छिन्धि प्र च्छिन्ध्यपि क्षापय क्षापय ॥५॥ -[५१]

आददानमाङ्गिरसि ब्रह्मज्यमुप दासय ॥६॥ -[५२]

वैश्वदेवी ह्यु१च्यसे कृत्या कूल्बजमावृता ॥७॥ -[५३]

ओषन्ती समोषन्ती ब्रह्मणो वज्रः ॥८॥ -[५४]

क्षिप्रम् । वै । तस्य । आऽहनने । गृध्राः । कुर्वते । ऐलबम् ॥ १ ॥

क्षिप्रम् । वै । तस्य । आऽदहनम् । परि । नृत्यन्ति । केशिनीः ।
आऽघ्नानाः । पाणिना । उरसि । कुर्वाणाः । पापम् । ऐलबम् ॥ २ ॥

क्षिप्रम् । वै । तस्य । वास्तुषु । वृकाः । कुर्वते । ऐलबम् ॥ ३ ॥

क्षिप्रम् । वै । तस्य । पृच्छन्ति । यत् । तत् । आसी३त् । इदम् । नु । ता३त् । इति ॥४॥

छिन्धि । आ । छिन्धि । प्र । छिन्धि । अपि । क्षापय । क्षापय ॥ ५ ॥

आऽददानम् । आङ्गिरसि । ब्रह्मऽज्यम् । उप । दासय ॥ ६ ॥

वैश्वऽदेवी । हि । उच्यसे । कृत्या । कूल्बजम् । आऽवृता ॥ ७ ॥

ओषन्ती । सम्ऽओषन्ती । ब्रह्मणः । वज्रः ॥ ८ ॥

PARYĀYA - VI

XII.5.47 Quickly, indeed at his killing the vultures make a din.

XII.5.48 Quickly, indeed, about his place of burning dance the long-haired women, beating on the breast with the hand, making an evil din.

XII.5.49 Quickly, indeed, in his abodes do the wolves make a din.

XII.5.50 Quickly, indeed, they ask about him: what that was, is this now that?

XII.5.51 Cut thou, cut on, cut forth, scorch, burn.

XII.5.52 O daughter of Añgiras, exhaust thou the Brahman-scather, that takes to himself.

XII.5.53 For thou art called belonging to all the gods, witchcraft, kūlbaja when covered.

XII.5.54 Burning, consuming, thunderbolt of the brahman.

क्षुरपविर्मृत्युर्भूत्वा वि धाव त्वम् ॥९॥ -[५५]

आ दत्से जिनतां वर्च इष्टं पूर्तं चाशिषः ॥१०॥ -[५६]

आदाय जीतं जीताय लोके३ऽमुष्मिन्प्र यच्छसि ॥११॥ -[५७]

अघ्न्ये पदवीर्भव ब्राह्मणस्याभिशस्त्या ॥१२॥ -[५८]

मेनिः शरव्या३ भवाघादघविषा भव ॥१३॥ -[५९]

अघ्न्ये प्र शिरो जहि ब्रह्मज्यस्य कृतागसो देवपीयोरराधसः ॥१४॥ -[६०]

त्वया प्रमूर्णं मृदितमग्निर्दहतु दुश्चितम् ॥१५॥ -[६१]

क्षुरऽपविः । मृत्युः । भूत्वा । वि । धाव । त्वम् ॥ ९ ॥

आ । दत्से । जिनताम् । वर्चः । इष्टम् । पूर्तम् । च । आऽशिषः ॥ १० ॥

आऽदाय । जीतम् । जीताय । लोके । अमुष्मिन् । प्र । यच्छसि ॥ ११ ॥

अघ्न्ये । पदऽवीः । भव । ब्राह्मणस्य । अभिऽशस्त्या ॥ १२ ॥

मेनिः । शरव्या३ । भव । अघात् । अघऽविषा । भव ॥ १३ ॥

अघ्न्ये । प्र । शिरः । जहि । ब्रह्मऽज्यस्य । कृतऽआगसः । देवऽपीयोः । अराधसः ॥१४॥

त्वया । प्रऽमूर्णम् । मृदितम् । अग्निः । दहतु । दुःऽचितम् ॥ १५ ॥

XII.5.55 Having become a keen-edged death, run thou out.

XII.5.56 Thou takest to thyself the honor of the scathers, their sacrifice and bestowal, their expectations.

XII.5.57 Taking to thyself what is scathed for him who is scathed, thou presentest in yonder world.

XII.5.58 O inviolable one, become thou the guide of the Brāhman out of imprecation.

XII.5.59 Become thou a weapon, a shaft; become thou deadly poisonous from evil.

XII.5.60 O inviolable one, smite forth the head of the Brahman-scather that has committed offence, of the god-reviler, the ungenerous.

XII.5.61 Let Agni burn the malevolent one, slaughtered, crushed by thee.

[७] सप्तमः पर्यायः

(१-१२) द्वादशर्चस्यास्य पर्यायस्य (१-३, ५, ७-९) प्रथमादितृचस्य पञ्चम्या ऋचः सप्तम्यादितृचस्य च प्राजापत्यानुष्टुप्, (४) चतुर्थ्या गायत्री, (६) षष्ठ्याः प्राजापत्या गायत्री, (१०) दशम्या आसुरी पङ्क्तिः, (११) एकादश्याः प्राजापत्या त्रिष्टुप्, (१२) द्वादश्याश्चासुर्युष्णिक् छन्दांसि ॥

वृश्च प्र वृश्च सं वृश्च दह प्र दह सं दह ॥१॥ -[६२]

ब्रह्मज्यं देव्यघ्न्य आ मूलादनुसंदह ॥२॥ -[६३]

यथायाद्यमसादनात्पापलोकान्परावतः ॥३॥ -[६४]

एवा त्वं देव्यघ्न्ये ब्रह्मज्यस्य कृतागसो देवपीयोरराधसः ॥४॥ -[६५]

वज्रेण शतपर्वणा तीक्ष्णेन क्षुरभृष्टिना ॥५॥ -[६६]

प्र स्कन्धान्प्र शिरो जहि ॥६॥ -[६७]

लोमान्यस्य सं छिन्धि त्वचमस्य वि वेष्टय ॥७॥ -[६८]

वृश्च । प्र । वृश्च । सम् । वृश्च । दह । प्र । दह । सम् । दह ॥ १ ॥

ब्रह्मऽज्यम् । देवि । अघ्न्ये । आ । मूलात् । अनुऽसंदह ॥ २ ॥

यथा । अयात् । यमऽसदनात् । पापऽलोकान् । पराऽवतः ॥ ३ ॥

एव । त्वम् । देवि । अघ्न्ये । ब्रह्मऽज्यस्य । कृतऽआगसः । देवऽपीयोः । अराधसः ॥४॥

वज्रेण । शतऽपर्वणा । तीक्ष्णेन । क्षुरऽभृष्टिना ॥ ५ ॥

प्र । स्कन्धान् । प्र । शिरः । जहि ॥ ६ ॥

लोमानि । अस्य । सम् । छिन्धि । त्वचम् । अस्य । वि । वेष्टय ॥ ७ ॥

PARYĀYA - VII

XII.5.62 Cut thou, cut off, cut up; burn off, burn up.

XII.5.63 The Brahman-scather, O divine inviolable one, do thou burn up all the way from the root.

XII.5.64 That he may go from Yama's seat to evil worlds, to the distances.

XII.5.65 So do thou, O divine inviolable one, of the Brahman-scather that has committed offense, of the god-reviler, the ungenerous.

XII.5.66 What a thundrbolt hundred-jointed, sharp, razor-pronged, -

XII.5.67 Smite forth the shoulder-bones forth the head.

XII.5.68 His hairs do thou cut up; his skin strip off;

मांसान्यस्य शातयस्नावान्यस्य सं वृह ॥८॥ -[६९]
अस्थीन्यस्य पीडय मज्जानमस्य निर्जहि ॥९॥ -[७०]
सर्वास्याङ्गा पर्वाणि वि श्रथय ॥१०॥ -[७१]
अग्निरेनं क्रव्यात्पृथिव्या नुदतामुदोषतु
वायुरन्तरिक्षान्महतो वरिम्णः ॥११॥ -[७२]
सूर्य एनं दिवः प्र णुदतां न्योषितु ॥१२॥ -[७३]

मांसानि । अस्य । शातय । स्नावानि । अस्य । सम् । वृह ॥ ८ ॥

अस्थीनि । अस्य । पीडय । मज्जानम् । अस्य । निः । जहि ॥ ९ ॥

सर्वा । अस्य । अङ्गा । पर्वाणि । वि । श्रथय ॥ १० ॥

अग्निः । एनम् । क्रव्यऽअत् । पृथिव्याः । नुदताम् । उत् । ओषतु । वायुः । अन्तरिक्षात् । महतः । वरिम्णः ॥ ११ ॥

सूर्यः । एनम् । दिवः । प्र । नुदताम् । नि । ओषतु ॥ १२ ॥

॥ इति द्वादशं काण्डम् ॥

[द्वादशकाण्डे सूक्तानि ५, मन्त्राः ३०४]

XII.5.69 His flesh cut in piece; his sinews wrench off;

XII.5.70 His bones distress; his marrow smite out;

XII.5.71 All his limbs, joints unloosen.

XII.5.72 Let the flesh-eating Agni thrust him from the earth, burn up; let Vāyu from the atmosphere, the great expanse, -

XII.5.73 Let the sun thrust him forth from the sky, burn him down.

Here ends Kaṇḍa XII
Hymns 5, Verses 304

Kāṇḍa - XIII

त्रयोदशं काण्डम्

अथ त्रयोदशं काण्डम् ॥

(१) प्रथमं सूक्तम्

(१-६०) षष्ट्यृचस्यास्य सूक्तस्य ब्रह्मा ऋषिः । (१-२, ४-२७, ३२-६०) प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्यादिचतुर्विंशते-
र्द्वात्रिंश्याद्येकोनत्रिंशतश्चाध्यात्मरोहिदादित्याः, (३) तृतीयाया मरुतः, (२८-३०) अष्टाविंश्यादितृचस्याग्निः, (३१) एक-
त्रिंश्याश्चाग्निर्मन्त्रोक्ताश्च देवताः । (१-२, ६-७, १०-११, २०, २२-२५, २७, ३३-३४, ३८, ४१, ५६, ५८)
प्रथमाद्वितीयाषष्ठीसप्तमीदशम्येकादशीविंशीनां द्वाविंश्यादिचतसृणां सप्तविंशीत्रयस्त्रिंशीचतुस्त्रिंश्यष्टात्रिंश्येकचत्वारिंशी-
षट्पञ्चाशयष्टपञ्चाशीनाञ्च त्रिष्टुप्, (३-५, ९, १२) तृतीयादितृचस्य नवमीद्वादश्योश्च जगती, (८) अष्टम्या
भुरिक्त्रिष्टुप्, (१३) त्रयोदश्या अतिशाक्करगर्भातिजगती, (१४) चतुर्दश्यास्त्रिपदा पुरःपरशाक्करा विपरीत-
पादलक्ष्मा पङ्क्तिः, (१५) पञ्चदश्या अतिजागतगर्भा जगती, (१६, २९-३०, ३२, ३९-४०, ४५-५१,
५३-५४) षोडश्येकोनत्रिंशीत्रिंशीद्वात्रिंश्येकोनचत्वारिंशीचत्वारिंशीनां पञ्चचत्वारिंश्यादिसप्तानां त्रिपञ्चा-
शीचतुष्पञ्चाश्योश्चानुष्टुप्, (१७) सप्तदश्याः पञ्चपदा ककुम्मती जगती, (१८) अष्टादश्याः पञ्चपदा
परशाक्करा भुरिक्ककुम्मत्यतिजगती, (१९) एकोनविंश्याः पञ्चपदातिजागता ककुम्मत्यतिजगती, (२१)
एकविंश्या आर्षी निचृद्गायत्री, (२६) षड्विंश्या विराट्परोष्णिक्, (२८) अष्टाविंश्या भुरिगनुष्टुप्,
(३१) एकत्रिंश्याः पञ्चपदा ककुम्मती शाक्करगर्भा जगती, (३५) पञ्चत्रिंश्या उपरिष्टाद्बृहती,
(३६) षट्त्रिंश्या निचृन्महाबृहती, (३७) सप्तत्रिंश्याः परशाक्करा विराडतिजगती, (४२)
द्विचत्वारिंश्या विराड्जगती, (४३) त्रिचत्वारिंश्या विराण्महाबृहती, (४४) चतुश्चत्वा-
रिंश्याः परोष्णिक्, (५२) द्विपञ्चाश्याः पथ्यापङ्क्तिः, (५५) पञ्चपञ्चाश्याः ककुम्मती
बृहतीगर्भा पथ्यापङ्क्तिः, (५७) सप्तपञ्चाश्याः ककुम्मत्यनुष्टुप्, (५९-६०)
एकोनषष्टीषष्ट्योश्च गायत्री छन्दांसि ॥

उदेहि वाजिन्यो अप्स्व१न्तरिदं राष्ट्रं प्र विश सूनृतावत् ।
यो रोहितो विश्वमिदं जजान स त्वा राष्ट्राय सुभृतं बिभर्तु ॥१॥
उद्वाज आ गन्यो अप्स्व१न्तर्विश आ रोह त्वद्योनयो याः ।
सोमं दधानोप ओषधीर्गाश्चतुष्पदो द्विपद आ वेशयेह ॥२॥
यूयमुग्रा मरुतः पृश्निमातर इन्द्रेण युजा प्र मृणीत शत्रून् ।
आ वो रोहितः शृणवत्सुदानवस्त्रिषप्तासो मरुतः स्वादुसंमुदः ॥३॥

उत्ऽएहि । वाजिन् । यः । अप्ऽसु । अन्तः । इदम् । राष्ट्रम् । प्र । विश । सूनृताऽवत् ।
यः । रोहितः । विश्वम् । इदम् । जजान । सः । त्वा । राष्ट्राय । सुऽभृतम् । बिभर्तु ॥ १ ॥
उत् । वाजः । आ । गन् । यः । अप्ऽसु । अन्तः । विशः । आ । रोह । त्वत्ऽयोनयः । याः ।
सोमम् । दधानः । अपः । ओषधीः । गाः । चतुःऽपदः । द्विऽपदः । आ । वेशय । इह ॥ २ ॥
यूयम् । उग्राः । मरुतः । पृश्निऽमातरः । इन्द्रेण । युजा । प्र । मृणीत । शत्रून् ।
आ । वः । रोहितः । शृणवत् । सुऽदानवः । त्रिऽसप्तासः । मरुतः । स्वादुऽसंमुदः ॥ ३ ॥

To Rohita : the Sun as ruddy one

XIII.1.1 O vigorous one, who are within the waters, rise up. Enter into this nation of kind and truthful speech. May the ascendant Lord, who has created this all, maintain you well-kept for the dominion.

XIII.1.2 The vigorous one, who was within the waters, has risen up. Ascend among the tribes, which are your creation. Bestowing bliss, waters, herbs and kine, may you settle the quadrupeds and the bipeds here.

XIII.1.3 O fierce brave soldiers, who consider the earth as your mother, with the help of the resplendent army chief, crush the enemies thoroughly. O thrice seven, brave soldiers,liberal donors, enjoyers of delicies, may the ascendant Lord listen to you.

रुहो रुरोह रोहित आ रुरोह गर्भो जनीनां जनुषामुपस्थम् ।
ताभिः संरब्धमन्वविन्दन्षडुर्वीर्गातुं प्रपश्यन्निह राष्ट्रमाहाः ॥४॥
आ ते राष्ट्रमिह रोहितोहार्षीद्व्यास्थन्मृधो अभयं ते अभूत् ।
तस्मै ते द्यावापृथिवी रेवतीभिः कामं दुहाथामिह शक्वरीभिः ॥५॥
रोहितो द्यावापृथिवी जजान तत्र तन्तुं परमेष्ठी ततान ।
तत्र शिश्रियेज एकपादोदृंहद्द्यावापृथिवी बलेन ॥६॥
रोहितो द्यावापृथिवी अदृंहत्तेन स्वः स्तभितं तेन नाकः ।
तेनान्तरिक्षं विमिता रजांसि तेन देवा अमृतमन्वविन्दन् ॥७॥
वि रोहितो अमृशद्विश्वरूपं समाकुर्वाणः प्ररुहो रुहश्च ।
दिवं रूढ्वा महता महिम्ना सं ते राष्ट्रमनक्तु पयसा घृतेन ॥८॥
यास्ते रुहः प्ररुहो यास्त आरुहो याभिरापृणासि दिवमन्तरिक्षम् ।
तासां ब्रह्मणा पयसा वावृधानो विशि राष्ट्रे जागृहि रोहितस्य ॥९॥

रुहः । रुरोह । रोहितः । आ । रुरोह । गर्भः । जनीनाम् । जनुषाम् । उपऽस्थम् । ताभिः ।
समऽरब्धम् । अनु । अविन्दन् । षट् । उर्वीः । गातुम् । प्रऽपश्यन् । इह । राष्ट्रम् । आ । अहाः ॥

आ । ते । राष्ट्रम् । इह । रोहितः । अहार्षीत् । वि । आस्थत् । मृधः । अभयम् । ते ।
अभूत् । तस्मै । ते । द्यावापृथिवी इति । रेवतीभिः । कामम् । दुहाताम् । इह । शक्वरीभिः ॥

रोहितः । द्यावापृथिवी इति । जजान । तत्र । तन्तुम् । परमेऽस्थी । ततान ।
तत्र । शिश्रिये । अजः । एकऽपादः । अदृंहत् । द्यावापृथिवी इति । बलेन ॥ ६ ॥

रोहितः । द्यावापृथिवी इति । अदृंहत् । तेन । स्वः । स्तभितम् । तेन । नाकः ।
तेन । अन्तरिक्षम् । विऽमिता । रजांसि । तेन । देवाः । अमृतम् । अनु । अविन्दन् ॥७॥

वि । रोहितः । अमृशत् । विश्वऽरूपम् । समऽआकुर्वाणः । प्रऽरुहः । रुहः । च ।
दिवम् । रूढ्वा । महता । महिम्ना । सम् । ते । राष्ट्रम् । अनक्तु । पयसा । घृतेन ॥ ८ ॥

याः । ते । रुहः । प्रऽरुहः । याः । ते । आऽरुहः । याभिः । आऽपृणासि । दिवम् । अन्तरिक्षम् ।
तासाम् । ब्रह्मणा । पयसा । ववृधानः । विशि । राष्ट्रे । जागृहि । रोहितस्य ॥ ९ ॥

XIII.1.4 The ascendant Lord has ascended the ascents. The embryo has ascended to the lap of the wives willing to procreate. Him, grown by them, the six wide realms obtained. Seeing the way clearly, he has acquired the kingdom.

XIII.1.5 The ascendant Lord has brought your kingdom here and has driven the enemies away. There is freedom from fear for you now. For you, as such, may the heaven and earth fulfil your desires with wealths and powers.

XIII.1.6 The ascendant Lord has created the heaven and earth; there the Lord of the supreme abode has stretched out the line; there the one-footed unborn has taken shelter; He has made firm the heaven and earth with His might.

XIII.1.7 The ascendant Lord has made the heaven and earth steady; the world of light and the sorrowless world has been held firm by Him. The midspace and the regions have been measured out by Him; through Him the enlightened ones have gained immortality.

XIII.1.8 The ascendant Lord, while making fast-growing ones and the growing ones, thought out all the forms carefully, climbing up the sky with His mighty grandeur, may he enrich your kingdom with milk and butter.

XIII.1.9 Whatever are your ascents and quick ascents and what your forward ascents, with which you fulfil the sky and the midspace, prospering with their milk of knowledge among the people, may you awaken in the kingdom of the ascendant Lord.

यास्ते विशस्तपसः संबभूवुर्वत्सं गायत्रीमनु ता इहागुः ।
तास्त्वा विशन्तु मनसा शिवेन संमाता वत्सो अभ्येतु रोहितः ॥१०॥
ऊर्ध्वो रोहितो अधि नाके अस्थाद्विश्वा रूपाणि जनयन्युवा कविः ।
तिग्मेनाग्निर्ज्योतिषा वि भाति तृतीये चक्रे रजसि प्रियाणि ॥११॥
सहस्रशृङ्गो वृषभो जातवेदा घृताहुतः सोमपृष्ठः सुवीरः ।
मा मा हासीन्नाथितो नेत्त्वा जहानि गोपोषं च मे वीरपोषं च धेहि ॥१२॥
रोहितो यज्ञस्य जनिता मुखं च रोहिताय वाचा श्रोत्रेण मनसा जुहोमि ।
रोहितं देवा यन्ति सुमनस्यमानाः स मा रोहैः सामित्यै रोहयतु ॥१३॥
रोहितो यज्ञं व्यदधाद्विश्वकर्मणे तस्मात्तेजांस्युप मेमान्यागुः ।
वोचेयं ते नाभिं भुवनस्याधि मज्मनि ॥१४॥
आ त्वा रुरोह बृहत्यु३त पङ्क्तिरा ककुब्वर्चसा जातवेदः ।
आ त्वा रुरोहोष्णिहाक्षरो वषट्कार आ त्वा रुरोह रोहितो रेतसा सह ॥१५॥

याः । ते । विशः । तपसः । सम्ऽबभूवुः । वत्सम् । गायत्रीम् । अनु । ताः । इह । आ । अगुः ।
ताः । त्वा । आ विशन्तु । मनसा । शिवेन । सम्ऽमाता । वत्सः । अभि । एतु । रोहितः ॥१०॥
ऊर्ध्वः । रोहितः । अधि । नाके । अस्थात् । विश्वा । रूपाणि । जनयन् । युवा । कविः ।
तिग्मेन । अग्निः । ज्योतिषा । वि । भाति । तृतीये । चक्रे । रजसि । प्रियाणि ॥ ११ ॥
सहस्रऽशृङ्गः । वृषभः । जातऽवेदाः । घृतऽआहुतः । सोमऽपृष्ठः । सुऽवीरः । मा । मा ।
हासीत् । नाथितः । न । इत् । त्वा । जहानि । गोऽपोषम् । च । मे । वीरऽपोषम् । च । धेहि ॥
रोहितः । यज्ञस्य । जनिता । मुखम् । च । रोहिताय । वाचा । श्रोत्रेण । मनसा । जुहोमि ।
रोहितम् । देवाः । यन्ति । सुऽमनस्यमानाः । सः । मा । रोहैः । साम्ऽइत्यै । रोहयतु ॥१३॥
रोहितः । यज्ञम् । वि । अदधात् । विश्वऽकर्मणे । तस्मात् । तेजांसि । उप । मा । इमानि । आ ।
अगुः । वोचेयम् । ते । नाभिम् । भुवनस्य । अधि । मज्मनि ॥ १४ ॥
आ । त्वा । रुरोह । बृहती । उत । पङ्क्तिः । आ । ककुप् । वर्चसा । जातऽवेदः । आ । त्वा ।
रुरोह । उष्णिहाऽअक्षरः । वषट्ऽकारः । आ । त्वा । रुरोह । रोहितः । रेतसा । सह ॥ १५ ॥

XIII.1.10 What the people have come into being with your austere work, they have come here following the young calf, the gāyatrī; may they come unto you with good heart; may the ascendant calf come forward with the mother.

XIII.1.11 The ascendant Lord, young and wise, stays high up in the sorrowless world, generating all the firms. The adorable Lord shines out with intense glow. In the third midspace, He creates desirable things (for us).

XIII.1.12 May the thousand-horned showerer, cognizant of all the creatures, worshipped with oblations of purified butter, balmed with medicinal cure-juice, the great hero, not abandon me when prayed to; may I not forsake you; may you grant me plenty of cows and plenty of brave sons.

XIII.1.13 The ascendant Lord is the generator and mouth of the sacrifice; I offer oblations to the ascendant Lord with speech, audition and mind. The enlightened ones go to the ascendant Lord with a friendly mind. May He make me ascend by ascents to the chiefship of the council.

XIII.1.14 The ascendant Lord has performed sacrifice for the one, engaged in all sorts of actions. From that, these lustres have come unto me. May I declare my kinship with you in the vastness of this universe.

XIII.1.15 The Bṛhatī ascends to you with all its force, also the Pañkti, also the Kakup, O cognizant of all creatures. The uṣṇik ascends to you, also the syllable and the sacred utterance of vaṣaṭ. The ascendant Lord has risen to you with virility.

अयं वस्ते गर्भं पृथिव्या दिवं वस्तेयमन्तरिक्षम् ।
अयं ब्रध्नस्य विष्टपि स्वर्लोकान्व्यानशे ॥१६॥
वाचस्पते पृथिवी नः स्योना स्योना योनिस्तल्पा नः सुशेवा ।
इहैव प्राणः सख्ये नो अस्तु तं त्वा परमेष्ठिन्पर्यग्निरायुषा वर्चसा दधातु ॥१७॥
वाचस्पत ऋतवः पञ्च ये नौ वैश्वकर्मणाः परि ये संबभूवुः ।
इहैव प्राणः सख्ये नो अस्तु तं त्वा परमेष्ठिन्परि रोहित आयुषा वर्चसा दधातु ॥१८॥
वाचस्पते सौमनसं मनश्च गोष्ठे नो गा जनय योनिषु प्रजाः ।
इहैव प्राणः सख्ये नो अस्तु तं त्वा परमेष्ठिन्पर्यहमायुषा वर्चसा दधामि ॥१९॥
परि त्वा धात्सविता देवो अग्निर्वर्चसा मित्रावरुणावभि त्वा ।
सर्वा अरातीरवक्रामन्नेहीदं राष्ट्रमकरः सूनृतावत् ॥२०॥
यं त्वा पृषती रथे प्रष्टिर्वहति रोहित । शुभा यासि रिणन्नपः ॥२१॥

अयम् । वस्ते । गर्भम् । पृथिव्याः । दिवम् । वस्ते । अयम् । अन्तरिक्षम् ।
अयम् । ब्रध्नस्य । विष्टपि । स्वः । लोकान् । वि । आनशे ॥ १६ ॥

वाचः । पते । पृथिवी । नः । स्योना । स्योना । योनिः । तल्पा । नः । सुऽशेवा ।
इह । एव । प्राणः । सख्ये । नः । अस्तु । तम् । त्वा । परमेऽस्थिन् । परि । अग्निः ।
आयुषा । वर्चसा । दधातु ॥ १७ ॥

वाचः । पते । ऋतवः । पञ्च । ये । नौ । वैश्वऽकर्मणाः । परि । ये । सम्ऽबभूवुः ।
० । परि । रोहितः । आयुषा । वर्चसा । दधातु ॥ १८ ॥

वाचः । पते । सौमनसम् । मनः । च । गोऽस्थे । नः । गाः । जनय । योनिषु । प्रऽजाः ।
० । परि । अहम् । आयुषा । वर्चसा । दधामि ॥ १९ ॥

परि । त्वा । धात् । सविता । देवः । अग्निः । वर्चसा । मित्रावरुणौ । अभि । त्वा ।
सर्वाः । अरातीः । अवऽक्रामन् । आ । इहि । इदम् । राष्ट्रम् । अकरः । सूनृताऽवत् ॥ २० ॥

यम् । त्वा । पृषती । रथे । प्रष्टिः । वहति । रोहित । शुभा । यासि । रिणन् । अपः ॥

XIII.1.16 This Lord resides in the womb of the earth; this one resides in the sky, and in the midspace too. This one pervades the worlds of bliss at the top of heaven.

XIII.1.17 O Lord of divine speech, may the earth be delightful for us, may the dwelling be delightful, and may our bed be very comfortable. May the vital breath be friendly to us just here. O observer of highest vows, may the adorable Lord clad you, as such, with long life and lustre.

XIII.1.18 O Lord of divine speech, the five seasons that have sprung up helpful in all works of both of us; may the vital breath be friendly to us just here. O observer of highest vows, may the ascendant Lord clad you, as such, with long life and lustre.

XIII.1.19 O Lord of divine speech, make our mind full of friendliness; generate cows in our stall and children in our wives. May the vital breath be friendly to us just here. O observer of highest vows, you as such, I clad with long life and lustre.

XIII.1.20 May the divine impeller Lord, the Lord adorable, friendly and venerable, clad you with lustre all around. Overcoming all your enemies, come here and make this kingdom delightful.

XIII.1.21 Thou whom the spotted one(f.), the side-horse, draws (vah) in the chariot, O ruddy one, thou goest with brightness (śubh), making flow the waters.

अनुव्रता रोहिणी रोहितस्य सूरिः सुवर्णा बृहती सुवर्चाः ।
तया वाजान्विश्वरूपां जयेम तया विश्वाः पृतना अभि ष्याम ॥२२॥
इदं सदो रोहिणी रोहितस्यासौ पन्थाः पृषती येन याति ।
तां गन्धर्वाः कश्यपा उन्नयन्ति तां रक्षन्ति कवयोप्रमादम् ॥२३॥
सूर्यस्याश्वा हरयः केतुमन्तः सदा वहन्त्यमृताः सुखं रथम् ।
घृतपावा रोहितो भ्राजमानो दिवं देवः पृषतीमा विवेश ॥२४॥
यो रोहितो वृषभस्तिग्मशृङ्गः पर्यग्निं परि सूर्यं बभूव ।
यो विष्टभ्नाति पृथिवीं दिवं च तस्माद्देवा अधि सृष्टीः सृजन्ते ॥२५॥
रोहितो दिवमारुहन्महतः पर्यर्णवात् । सर्वा रुरोह रोहितो रुहः ॥२६॥
वि मिमीष्व पयस्वतीं घृताचीं देवानां धेनुरनपस्पृगेषा ।
इन्द्रः सोमं पिबतु क्षेमो अस्त्वग्निः प्र स्तौतु वि मृधो नुदस्व ॥२७॥

अनुऽव्रता । रोहिणी । रोहितस्य । सूरिः । सुऽवर्णा । बृहती । सुऽवर्चाः ।
तया । वाजान् । विश्वऽरूपान् । जयेम । तया । विश्वाः । पृतनाः । अभि । स्याम ॥२२॥
इदम् । सदः । रोहिणी । रोहितस्य । असौ । पन्थाः । पृषती । येन । याति ।
ताम् । गन्धर्वाः । कश्यपाः । उत् । नयन्ति । ताम् । रक्षन्ति । कवयः । अप्रऽमादम् ॥२३॥
सूर्यस्य । अश्वाः । हरयः । केतुऽमन्तः । सदा । वहन्ति । अमृताः । सुऽखम् । रथम् ।
घृतऽपावा । रोहितः । भ्राजमानः । दिवम् । देवः । पृषतीम् । आ । विवेश ॥ २४ ॥
यः । रोहितः । वृषभः । तिग्मऽशृङ्गः । परि । अग्निम् । परि । सूर्यम् । बभूव ।
यः । विऽस्तभ्नाति । पृथिवीम् । दिवम् । च । तस्मात् । देवाः । अधि । सृष्टीः । सृजन्ते ॥२५॥
रोहितः । दिवम् । आ । अरुहत् । महतः । परि । अर्णवात् ।
सर्वाः । रुरोह । रोहितः । रुहः ॥ २६ ॥
वि । मिमीष्व । पयस्वतीम् । घृताचीम् । देवानाम् । धेनुः । अनपऽस्पृक् । एषा ।
इन्द्रः । सोमम् । पिबतु । क्षेमः । अस्तु । अग्निः । प्र । स्तौतु । वि । मृधः । नुदस्व ॥२७॥

XIII.1.22 The ruddy dawn (Rohiṇi), liberal, beautiful of colour, grand and lustrous, is the faithful follower of the ascendant sun. Through her may we win all sorts of battles; through her may we overcome all invaders.

XIII.1.23 This ascending dawn is the abode of the ascending sun. This is the way along which the speckled earth moves. The sustainers of earth, the keen observers, lead her upwards; the far-sighted sages guard her with ceaseless care.

XIII.1.24 Immortal coursers of the sun, golden and bright, draw the chariot always with ease. The divine ascendant sun, enjoyer of butter, enters the speckled sky blazing radiant.

XIII.1.25 The bounties of Nature create the universe out of the ascendant Lord; who is the sharp-rayed showerer, and who is superior to fire and superior to the sun, and who keeps the earth and the sky firm in their proper places.

XIII.1.26 From the vast billowy ocean, the ascendant Lord mounts up the sky. The ascendant Lord has ascended all the ascents.

XIII.1.27 Prepare delightfully the milk-yielding, butter-giving (cow); she is a never-refusing milch-cow of the enlightened ones. May the resplendent aspirant drink the gladdening juice. May peace and well-being be here. Let the adorable leader start praises; may you thrust the enemies away.

समिद्धो अग्निः समिधानो घृतवृद्धो घृताहुतः ।
अभीषाड्विश्वाषाडग्निः सपत्नान्हन्तु ये मम ॥२८॥
हन्त्वेनान्प्र दहत्वरिर्यो नः पृतन्यति ।
क्रव्यादाग्निना वयं सपत्नान्प्र दहामसि ॥२९॥
अवाचीनानव जहीन्द्र वज्रेण बाहुमान् ।
अधा सपत्नान्मामकानग्नेस्तेजोभिरादिषि ॥३०॥
अग्ने सपत्नानधरान्पादयास्मद्व्यथया सजातमुत्पिपानं बृहस्पते ।
इन्द्राग्नी मित्रावरुणावधरे पद्यन्तामप्रतिमन्यूयमानाः ॥३१॥
उद्यंस्त्वं देव सूर्य सपत्नानव मे जहि ।
अवैनानश्मना जहि ते यन्त्वधमं तमः ॥३२॥
वत्सो विराजो वृषभो मतीनामा रुरोह शुक्रपृष्ठोन्तरिक्षम् ।
घृतेनार्कमभ्यर्चन्ति वत्सं ब्रह्म सन्तं ब्रह्मणा वर्धयन्ति ॥३३॥

सम्ऽइद्धः । अग्निः । सम्ऽइधानः । घृतऽवृद्धः । घृतऽआहुतः ।
अभीषाट् । विश्वाषाट् । अग्निः । सऽपत्नान् । हन्तु । ये । मम ॥ २८ ॥
हन्तु । एनान् । प्र । दहतु । अरिः । यः । नः । पृतन्यति ।
क्रव्यऽअदा । अग्निना । वयम् । सऽपत्नान् । प्र । दहामसि ॥ २९ ॥
अवाचीनान् । अव । जहि । इन्द्र । वज्रेण । बाहुऽमान् ।
अध । सऽपत्नान् । मामकान् । अग्नेः । तेजःऽभिः । आ । अदिषि ॥ ३० ॥
अग्ने । सऽपत्नान् । अधरान् । पादय । अस्मत् । व्यथया । सऽजातम् । उत्ऽपिपानम् ।
बृहस्पते । इन्द्राग्नी इति । मित्रावरुणौ । अधरे । पद्यन्ताम् । अप्रतिऽमन्यूयमानाः ॥३१॥
उत्ऽयन् । त्वम् । देव । सूर्य । सपत्नान् । अव । मे । जहि ।
अव । एनान् । अश्मना । जहि । ते । यन्तु । अधमम् । तमः ॥ ३२ ॥
वत्सः । विऽराजः । वृषभः । मतीनाम् । आ । रुरोह । शुक्रऽपृष्ठः । अन्तरिक्षम् ।
घृतेन । अर्कम् । अभि । अर्चन्ति । वत्सम् । ब्रह्म । सन्तम् । ब्रह्मणा । वर्धयन्ति ॥३३॥

Agniḥ

XIII.1.28 The well-kindled fire divine has been augmented with fuel and increased with pouring of purified butter. May the conquering adorable Lord, the conqueror of all, destroy those, who are my rivals.

XIII.1.29 May (He) destroy them, burn completely the enemy, that invades us with his hordes. With the flesh-consuming fire, we burn our rivals completely.

To multi - gods

XIII.1.30 O resplendent Lord, strong of arms, may you strike down the down-going ones with your adamantine weapon. Thereafter, I shall subdue my rivals with the powers of the adorable Lord.

To the Sun

XIII.1.31 O adorable Lord, make our rivals fall down before us. O Lord supreme, torment out kinsmen rebelling against us. O Lord resplendent and adorable, O Lord friendly and venerable, may they fall down incapable of even expressing their anger.

XIII.1.32 O divine sun, rising up, may you strike down my rivals. May you strike them down with stone. May they go to the vilest darkness.

XIII.1.33 The calf of Virāj, the bull of intellects, with his back shining, has ascended to the midspace. With purified butter they adore the young sun. Him, who is knowledge Himself though, they augment with knowledge.

दिवं च रोह पृथिवीं च रोह राष्ट्रं च रोह द्रविणं च रोह ।
प्रजां च रोहामृतं च रोह रोहितेन तन्वं संस्पृशस्व ॥३४॥

ये देवा राष्ट्रभृतोभितो यन्ति सूर्यम् ।
तैष्टे रोहितः संविदानो राष्ट्रं दधातु सुमनस्यमानः ॥३५॥

उत्त्वा यज्ञा ब्रह्मपूता वहन्त्यध्वगतो हरयस्त्वा वहन्ति ।
तिरः समुद्रमति रोचसेर्णवम् ॥३६॥

रोहिते द्यावापृथिवी अधि श्रिते वसुजिति गोजिति संधनाजिति ।
सहस्रं यस्य जनिमानि सप्त च वोचेयं ते नाभिं भुवनस्याधि मज्मनि ॥३७॥

यशा यासि प्रदिशो दिशश्च यशाः पशूनामुत चर्षणीनाम् ।
यशाः पृथिव्या अदित्या उपस्थेहं भूयासं सवितेव चारुः ॥३८॥

अमुत्र सन्निह वेत्थेतः संस्तानि पश्यसि ।
इतः पश्यन्ति रोचनं दिवि सूर्यं विपश्चितम् ॥३९॥

दिवम् । च । रोह । पृथिवीम् । च । रोह । राष्ट्रम् । च । रोह । द्रविणम् । च । रोह ।
प्रऽजाम् । च । रोह । अमृतम् । च । रोह । रोहितेन । तन्वम् । सम् । स्पृशस्व ॥३४॥

ये । देवाः । राष्ट्रऽभृतः । अभितः । यन्ति । सूर्यम् ।
तैः । ते । रोहितः । समऽविदानः । राष्ट्रम् । दधातु । सुऽमनस्यमानः ॥ ३५ ॥

उत् । त्वा । यज्ञाः । ब्रह्मऽपूताः । वहन्ति । अध्वऽगतः । हरयः । त्वा । वहन्ति । तिरः ।
समुद्रम् । अति । रोचसे । अर्णवम् ॥ ३६ ॥

रोहिते । द्यावापृथिवी इति । अधि । श्रिते इति । वसुऽजिति । गोऽजिति । संधनऽजिति ।
सहस्रम् । यस्य । जनिमानि । सप्त । च । वोचेयम् । ते । नाभिम् । भुवनस्य । अधि । मज्मनि ॥

यशाः । यासि । प्रऽदिशः । दिशः । च । यशाः । पशूनाम् । उत । चर्षणीनाम् ।
यशाः । पृथिव्याः । अदित्याः । उपऽस्थे । अहम् । भूयासम् । सविताऽइव । चारुः ॥३८॥

अमुत्र । सन् । इह । वेत्थ । इतः । सन् । तानि । पश्यसि ।
इतः । पश्यन्ति । रोचनम् । दिवि । सूर्यम् । विपःऽचितम् ॥ ३९ ॥

XIII.1.34 May you ascend to heaven; and may you ascend on the earth, and may you ascend to the kingship; and may you ascend to wealth; and may you ascend to the posterity; and may you ascend to the immortality; may you touch the body with the ascendance.

XIII.1.35 In accord with the enlightened ones, sustainers of the kingdom, who go around the sun, may the ascendant Lord, sustain your kingship with friendly favour.

XIII.1.36 The sacrifices, purified with knowledge, carry you upwards; the coursers, always travelling on the paths, carry you upwards. You shine gracefully across the restless sea.

XIII.1.37 The heaven and earth are upheld in the ascendant Lord, the winner of wealth, the conqueror of cows, and the winner of accumulated riches. May I speak all over the universe my kinship with you, who have a thousand and seven births.

XIII.1.38 Full of glory, you go to the mid-quarters; full of glory you are to animals and men. Full of glory, may I be in the lap of the indivisible earth, graceful like the impeller of life (the sun).

XIII.1.39 Staying yonder, you know what is here, staying here, you see the yonder ones. From here people see the brilliant sun, full of wisdom, in the sky.

देवो देवान्मर्चयस्यन्तश्चरस्यर्णवे ।
समानमग्निमिन्धते तं विदुः कवयः परे ॥४०॥
अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात् ।
सा कद्रीची कं स्विदर्धं परागात्क्व स्वित्सूते नहि यूथे अस्मिन् ॥४१॥
एकपदी द्विपदी सा चतुष्पद्यष्टापदी नवपदी बभूवुषी ।
सहस्राक्षरा भुवनस्य पङ्क्तिस्तस्याः समुद्रा अधि वि क्षरन्ति ॥४२॥
आरोहन्द्यामममृतः प्राव मे वचः ।
उत्त्वा यज्ञा ब्रह्मपूता वहन्त्यध्वगतो हरयस्त्वा वहन्ति ॥४३॥
वेद तत्ते अमर्त्य यत्त आक्रमणं दिवि । यत्ते सधस्थं परमे व्योमिन् ॥४४॥
सूर्यो द्यां सूर्यः पृथिवीं सूर्य आपोति पश्यति ।
सूर्यो भूतस्यैकं चक्षुरा रुरोह दिवं महीम् ॥४५॥

देवः । देवान् । मर्चयसि । अन्तः । चरसि । अर्णवे ।
समानम् । अग्निम् । इन्धते । तम् । विदुः । कवयः । परे ॥ ४० ॥
अवः । परेण । परः । एना । अवरेण । पदा । वत्सम् । बिभ्रती । गौः । उत् । अस्थात् ।
सा । कद्रीची । कम् । स्वित् । अर्धम् । परा । अगात् । क्व । स्वित् । सूते । नहि । यूथे । अस्मिन् ॥
एकऽपदी । द्विऽपदी । सा । चतुःऽपदी । अष्टाऽपदी । नवऽपदी । बभूवुषी ।
सहस्रऽअक्षरा । भुवनस्य । पङ्क्तिः । तस्याः । समुद्राः । अधि । वि । क्षरन्ति ॥ ४२ ॥
आऽरोहन् । द्याम् । अमृतः । प्र । अव । मे । वचः ।
उत् । त्वा । यज्ञाः । ब्रह्मऽपूताः । वहन्ति । अध्वऽगतः । हरयः । त्वा । वहन्ति ॥ ४३ ॥
वेद । तत् । ते । अमर्त्य । यत् । ते । आऽक्रमणम् । दिवि ।
यत् । ते । सधऽस्थम् । परमे । विऽओमन् ॥ ४४ ॥
सूर्यः । द्याम् । सूर्यः । पृथिवीम् । सूर्यः । आपः । अति । पश्यति ।
सूर्यः । भूतस्य । एकम् । चक्षुः । आ । रुरोह । दिवम् । महीम् ॥ ४५ ॥

XIII.1.40 Being an enlightened one, you purify (annoy) the enlightened ones. You move within the ocean. You kindle the common fire. Him the highest poets realize.

XIII.1.41 Below the distant (para), thus beyond the lower, bearing her calf with her foot, the cow hath stood up; witherwards, to what quarter (ardha) hath she forsooth gone away ? Where giveth she birth ? For (it is) not in this herd. (Also Av. IX.9.17)

XIII.1.42 One-footed, two-footed (is) she, four-footed; having become eight-footed, nine-footed, thousand-syllabled, a series of existence; out from her flow apart the ocean. (Also Av. IX. 10.21, Ṛg. I.164.41).

XIII.1.43 Ascending to heaven, may you, the immortal one, listen favourable to my prayer. The sacrifices, purified with knowledge, carry you upwards; the coursers, always on the road carry you.

XIII.1.44 O immortal one, I know that of yours, that is your progression in the firmament, and that your abode in the highest heaven.

XIII.1.45 The sun looks beyond the sky, the sun beyond the earth, the sun beyond the waters. The sun, the sole eye or the beings, has ascended the high heaven.

उर्वीरासन्परिधयो वेदिर्भूमिरकल्पत ।
तत्रैतावग्नी आधत्त हिमं घ्रंसं च रोहितः ॥४६॥
हिमं घ्रंसं चाधाय यूपान्कृत्वा पर्वतान् ।
वर्षाज्यावग्नी ईजाते रोहितस्य स्वर्विदः ॥४७॥
स्वर्विदो रोहितस्य ब्रह्मणाग्निः समिध्यते ।
तस्माद्घ्रंसस्तस्माद्धिमस्तस्माद्यज्ञोऽजायत ॥४८॥
ब्रह्मणाग्नी वावृधानौ ब्रह्मवृद्धौ ब्रह्माहुतौ ।
ब्रह्मेद्धावग्नी ईजाते रोहितस्य स्वर्विदः ॥४९॥
सत्ये अन्यः समाहितोऽप्स्वन्यः समिध्यते ।
ब्रह्मेद्धावग्नी ईजाते रोहितस्य स्वर्विदः ॥५०॥
यं वातः परिशुम्भति यं वेन्द्रो ब्रह्मणस्पतिः ।
ब्रह्मेद्धावग्नी ईजाते रोहितस्य स्वर्विदः ॥५१॥

उर्वीः । आसन् । परिऽधयः । वेदिः । भूमिः । अकल्पत ।
तत्र । एतौ । अग्नी इति । आ । अधत्त । हिमम् । घ्रंसम् । च । रोहितः ॥ ४६ ॥
हिमम् । घ्रंसम् । च । आऽधाय । यूपान् । कृत्वा । पर्वतान् ।
वर्षऽआज्यौ । अग्नी इति । ईजाते इति । रोहितस्य । स्वःऽविदः ॥ ४७ ॥
स्वःऽविदः । रोहितस्य । ब्रह्मणा । अग्निः । सम् । इध्यते ।
तस्मात् । घ्रंसः । तस्मात् । हिमः । तस्मात् । यज्ञः । अजायत ॥ ४८ ॥
ब्रह्मणा । अग्नी इति । वव‍ृधानौ । ब्रह्मऽवृद्धौ । ब्रह्मऽआहुतौ ।
ब्रह्मऽइद्धौ । अग्नी इति । ईजाते इति । रोहितस्य । स्वःऽविदः ॥ ४९ ॥
सत्ये । अन्यः । सम्ऽआहितः । अप्ऽसु । अन्यः । सम् । इध्यते ।
ब्रह्मऽइद्धौ । अग्नी इति । ईजाते इति । रोहितस्य । स्वःऽविदः ॥ ५० ॥
यम् । वातः । परिऽशुम्भति । यम् । वा । इन्द्रः । ब्रह्मणः । पतिः ।
ब्रह्मऽइद्धौ । अग्नी इति । ईजाते इति । रोहितस्य । स्वःऽविदः ॥ ५१ ॥

XIII.1.46 The spaces (urvīh) were the fences, the earth formed the altar. There the ascendant Lord set these two fires, the cold and the heat.

XIII.1.47 Establishing the cold and heat, making the mountains as sacrificial posts, the two fires, for whom the rain is sacrificial butter, worship the ascendant Lord, the bestower of light (bliss).

XIII.1.48 With the knowledge of the ascendant Lord, the bestower of light, the fire divine is enkindled. From that the heat, from that the cold, and from that the sacrifice is born.

XIII.1.49 The two fires increasing with knowledge, augmented with knowledge, offered oblations of knowledge, and enkindled with knowledge, worship the ascendant Lord, the bestower of light (bliss).

XIII.1.50 One is well-established in truth; the other is kindled in the actions (waters). Enkindled with knowledge, the two fires worship the ascendant Lord, the bestower of light (bliss).

XIII.1.51 Whom the wind purifies all around, whom the resplendent Lord and the Lord of knowledge (purify), two fires, enkindled with knowledge, worship that ascendant Lord, the bestower of light.

वेदिं भूमिं कल्पयित्वा दिवं कृत्वा दक्षिणाम् ।
घ्रंसं तदग्निं कृत्वा चकार विश्वमात्मन्वद्वर्षेणाज्येन रोहितः ॥५२॥
वर्षमाज्यं घ्रंसो अग्निर्वेदिर्भूमिरकल्पत ।
तत्रैतान्पर्वतानग्निर्गीर्भिरूर्ध्वाँ अकल्पयत् ॥५३॥
गीर्भिरूर्ध्वान्कल्पयित्वा रोहितो भूमिमब्रवीत् ।
त्वयीदं सर्वं जायतां यद्भूतं यच्च भाव्यम् ॥५४॥
स यज्ञः प्रथमो भूतो भव्यो अजायत ।
तस्माद्ध जज्ञ इदं सर्वं यत्किं चेदं विरोचते रोहितेन ऋषिणाभृतम् ॥५५॥
यश्च गां पदा स्फुरति प्रत्यङ् सूर्यं च मेहति ।
तस्य वृश्चामि ते मूलं न च्छायां करवोपरम् ॥५६॥
यो माभिच्छायमत्येषि मां चाग्निं चान्तरा ।
तस्य वृश्चामि ते मूलं न च्छायां करवोपरम् ॥५७॥

वेदिम् । भूमिम् । कल्पयित्वा । दिवम् । कृत्वा । दक्षिणाम् ।
घ्रंसम् । तत् । अग्निम् । कृत्वा । चकार । विश्वम् । आत्मन्ऽवत् । वर्षेण । आज्येन । रोहितः ॥
वर्षम् । आज्यम् । घ्रंसः । अग्निः । वेदिः । भूमिः । अकल्पत ।
तत्र । एतान् । पर्वतान् । अग्निः । गीःऽभिः । ऊर्ध्वान् । अकल्पयत् ॥ ५३ ॥
गीःऽभिः । ऊर्ध्वान् । कल्पयित्वा । रोहितः । भूमिम् । अब्रवीत् ।
त्वयि । इदम् । सर्वम् । जायताम् । यत् । भूतम् । यत् । च । भाव्यम् ॥ ५४ ॥
सः । यज्ञः । प्रथमः । भूतः । भव्यः । अजायत । तस्मात् । ह । जज्ञे । इदम् । सर्वम् ।
यत् । किम् । च । इदम् । विऽरोचते । रोहितेन । ऋषिणा । आऽभृतम् ॥ ५५ ॥
यः । च । गाम् । पदा । स्फुरति । प्रत्यङ् । सूर्यम् । च । मेहति ।
तस्य । वृश्चामि । ते । मूलम् । न । छायाम् । करवः । अपरम् ॥ ५६ ॥
यः । मा । अभिऽछायम् । अतिऽएषि । माम् । च । अग्निम् । च । अन्तरा ।
तस्य । वृश्चामि । ते । मूलम् । न । छायाम् । करवः । अपरम् ॥ ५७ ॥

XIII.1.52 Forming the earth as the sacrificial altar, making the heaven as the sacrificial fee, using that heat as sacrificial fire, the ascendant Lord created all the beings that have soul, making the rain as the sacrificial butter.

XIII.1.53 Rain was made the sacrificial butter, the heat the sacrificial fire, the earth the sacrificial altar. There the adorable Lord made these high mountains rise up with words.

XIII.1.54 Making high mountains with the words, the ascendant Lord said to the earth : "let all this, whatsoever there is and whatsoever is yet to be, be born on you."

XIII.1.55 He has been born as the first sacrifice, that had been, and that was to be, as well. From Him is born all this whatever shines pleasantly. All this has been provided by the ascendant Lord, the seer.

XIII.1.56 Whoso kicks a cow with the foot, and urinates facing the sun, as such of yours, I hack off the root, so that you may not cast shadow any more.

XIII.1.57 You who overshadow me and who come between me and the fire divine, I hack off your root, so that you may not cast shadow any more.

योऽद्य देव सूर्य त्वां च मां चान्तरायति ।
दुष्वप्न्यं तस्मिञ्छमलं दुरितानि च मृज्महे ॥५८॥
मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः ।
मान्त स्थुर्नो अरातयः ॥५९॥
यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः ।
तमाहुतमशीमहि ॥६०॥

यः । अद्य । देव । सूर्य । त्वाम् । च । माम् । च । अन्तरा । अयति ।
दुःऽस्वप्न्यम् । तस्मिन् । शमलम् । दुःऽइतानि । च । मृज्महे ॥ ५८ ॥
मा । प्र । गाम । पथः । वयम् । मा । यज्ञात् । इन्द्र । सोमिनः ।
मा । अन्तः । स्थुः । नः । अरातयः ॥ ५९ ॥
यः । यज्ञस्य । प्रऽसाधनः । तन्तुः । देवेषु । आऽततः । तम् । आऽहुतम् । अशीमहि ॥

(२) द्वितीयं सूक्तम्

(१-४६) षट्चत्वारिंशदृचस्यास्य सूक्तस्य ब्रह्मा ऋषिः । अध्यात्मरोहितादित्या देवताः । (१, १२-१५, ३९-४१) प्रथमर्चो द्वादश्यादिचतसृणामेकोनचत्वारिंश्यादितृचस्य चानुष्टुप्, (२-३, ८, ४३) द्वितीयातृतीयाष्टमीत्रिचत्वारिंशीनां जगती, (४-७, ९, २८, ३१-३३, ३५-३६, ३८, ४२, ४६) चतुर्थ्यादिचतसृणां नवम्यष्टाविंश्योरेकत्रिंश्यादितृचस्य पञ्चत्रिंशीषड्विंश्यष्टात्रिंशीद्विचत्वारिंशीषट्चत्वारिंशीनाञ्च त्रिष्टुप्, (१०) दशम्या आस्तारपङ्क्तिः, (११) एकादश्या बृहतीगर्भा त्रिष्टुप्, (१६-२४) षोडश्यादिनवानामार्षी गायत्री, (२५) पञ्चविंश्याः ककुम्मत्यास्तारपङ्क्तिः, (२६) षड्विंश्याः पुरोद्व्यतिजागता भुरिग्जगती, (२७) सप्तविंश्या विराड्जगती, (२९) एकोनत्रिंश्या बार्हतगर्भानुष्टुप्, (३०) त्रिंश्याः पञ्चपदोष्णिग्बृहतीगर्भातिजगती, (३४) चतुस्त्रिंश्या आर्षी पङ्क्तिः, (३७) सप्तत्रिंश्याः पञ्चपदा विराड्गर्भा जगती, (४४) चतुश्चत्वारिंश्याश्चतुष्पदा पुरःशाक्करा भुरिग्जगती, (४५) पञ्चचत्वारिंश्याश्चातिजागतगर्भा जगती छन्दांसि ॥

उदस्य केतवो दिवि शुक्रा भ्राजन्त ईरते । आदित्यस्य नृचक्षसो महिव्रतस्य मीढुषः ॥१॥
दिशां प्रज्ञानां स्वरयन्तमर्चिषा सुपक्षमाशुं पतयन्तमर्णवे ।
स्तवाम सूर्यं भुवनस्य गोपां यो रश्मिभिर्दिश आभाति सर्वाः ॥२॥

उत् । अस्य । केतवः । दिवि । शुक्राः । भ्राजन्तः । ईरते ।
आदित्यस्य । नृऽचक्षसः । महिऽव्रतस्य । मीढुषः ॥ १ ॥
दिशाम् । प्रऽज्ञानाम् । स्वरयन्तम् । अर्चिषा । सुऽपक्षम् । आशुम् । पतयन्तम् । अर्णवे ।
स्तवाम । सूर्यम् । भुवनस्य । गोपाम् । यः । रश्मिऽभिः । दिशः । आऽभाति । सर्वाः ॥ २ ॥

XIII.1.58 O divine sun, whosoever stands today between you and me, to him we transfer evil dream, fault and troubles.

XIII.1.59 O resplendent Lord, let us not depart from the righteous path, nor from the path of noble actions; let not malignity or miserliness dwell within us. (See also Ṛg. X.57.1)

XIII.1.60 May we obtain the blessings of that eternal law-maker of this world to whom the offerings are made. He is the thread spun out by the priests and extended to the divine powers. He is thus the perfecter of the cosmic sacrifice. (See also Ṛg. X.57.2)

To the Sun

XIII.2.1 Bright and blazing rays of this sun, the overseer of men, observer of great vows, and the liberal showerer, go upwards in the sky.

XIII.2.2 We laud the sun, illuminator of the marks of the quarters with flow, strong-winged, swift, protector of the world, falling in the restless ocean; he, who brightens all the regions with his rays.

यत्प्राङ् प्रत्यङ् स्वधया यासि शीभं नानारूपे अहनी कर्षि मायया ।
तदादित्य महि तत्ते महि श्रवो यदेको विश्वं परि भूम जायसे ॥३॥
विपश्चितं तरणिं भ्राजमानं वहन्ति यं हरितः सप्त बह्वीः ।
स्रुताद्यमत्रिर्दिवमुन्निनाय तं त्वा पश्यन्ति परियान्तमाजिम् ॥४॥
मा त्वा दभन्परियान्तमाजिं स्वस्ति दुर्गाँ अति याहि शीभम् ।
दिवं च सूर्य पृथिवीं च देवीमहोरात्रे विमिमानो यदेषि ॥५॥
स्वस्ति ते सूर्य चरसे रथाय येनोभावन्तौ परियासि सद्यः ।
यं ते वहन्ति हरितो वहिष्ठाः शतमश्वा यदि वा सप्त बह्वीः ॥६॥
सुखं सूर्य रथमंशुमन्तं स्योनं सुवह्निमधि तिष्ठ वाजिनम् ।
यं ते वहन्ति हरितो वहिष्ठाः शतमश्वा यदि वा सप्त बह्वीः ॥७॥
सप्त सूर्यो हरितो यातवे रथे हिरण्यत्वचसो बृहतीरयुक्त ।
अमोचि शुक्रो रजसः परस्ताद्विधूय देवस्तमो दिवमारुहत् ॥८॥

यत् । प्राङ् । प्रत्यङ् । स्वधया । यासि । शीभम् । नानारूपे इति नानाऽरूपे । अहनी इति ।
कर्षि । मायया । तत् । आदित्य । महि । तत् । ते । महि । श्रवः । यत् । एकः । विश्वम् ।
परि । भूम । जायसे ॥ ३ ॥

विपःऽचितम् । तरणिम् । भ्राजमानम् । वहन्ति । यम् । हरितः । सप्त । बह्वीः ।
स्रुतात् । यम् । अत्रिः । दिवम् । उत्ऽनिनाय । तम् । त्वा । पश्यन्ति । परिऽयान्तम् । आजिम् ॥

मा । त्वा । दभन् । परिऽयान्तम् । आजिम् । स्वस्ति । दुःऽगान् । अति । याहि । शीभम् ।
दिवम् । च । सूर्य । पृथिवीम् । च । देवीम् । अहोरात्रे इति । विऽमिमानः । यत् । एषि ॥ ५॥

स्वस्ति । ते । सूर्य । चरसे । रथाय । येन । उभौ । अन्तौ । परिऽयासि । सद्यः ।
यम् । ते । वहन्ति । हरितः । वहिष्ठाः । शतम् । अश्वाः । यदि । वा । सप्त । बह्वीः ॥६॥

सुऽखम् । सूर्य । रथम् । अंशुऽमन्तम् । स्योनम् । सुऽवह्निम् । अधि । तिष्ठ । वाजिनम् ।
यम् । ते । वहन्ति । हरितः । वहिष्ठाः । शतम् । अश्वाः । यदि । वा । सप्त । बह्वीः ॥ ७ ॥

सप्त । सूर्यः । हरितः । यातवे । रथे । हिरण्यऽत्वचसः । बृहतीः । अयुक्त ।
अमोचि । शुक्रः । रजसः । परस्तात् । विऽधूय । देवः । तमः । दिवम् । आ । अरुहत् ॥८॥

XIII.2.3 That you go eastward and westward quickly with your sustaining power; and that you make two days of different forms with your wonderous force; this, O sun, is your great, very great glory, that you alone are born over all this world.

XIII.2.4 They behold you racing along your course – you, who are wise, victorious, and blazing; whom seven excellent golden coursers carry; whom the enjoyer (Atri) has conducted up from the flood to the sky.

XIII.2.5 May they not obstruct you racing along your course; may you go across difficulties quickly and safely, as you, O sun, go to the sky and the earth, making day and night.

XIII.2.6 O sun, may it be well with your ever-moving chariot, by which you go instantly to both the ends (of the world), and which your hundred or seven golden horses, good at drawing and fine ones, carry.

XIII.2.7 O sun, may you mount your pleasing chariot, rich in rays, comfortable, well-horsed and swift, which your hundred or seven golden horses, good at drawing and fine ones carry.

XIII.2.8 The sun has yoked in his chariot seven golden-coloured large bay steeds for his journey. The bright one has been released from dimness. Dispelling the darkness away, the divine one has ascended the sky.

उत्केतुना बृहता देव आगन्नपावृक्तमोभि ज्योतिरश्रैत् ।
दिव्यः सुपर्णः स वीरो व्यख्यददितेः पुत्रो भुवनानि विश्वा ॥९॥
उद्यन्रश्मीना तनुषे विश्वा रूपाणि पुष्यसि ।
उभा समुद्रौ क्रतुना वि भासि सर्वांल्लोकान्परिभूर्भ्राजमानः ॥१०॥
पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातोर्णवम् ।
विश्वान्यो भुवना विचष्टे हैरण्यैरन्यं हरितो वहन्ति ॥११॥
दिवि त्वात्रिरधारयत्सूर्या मासाय कर्तवे ।
स एषि सुधृतस्तपन्विश्वा भूतावचाकशत् ॥१२॥
उभावन्तौ समर्षसि वत्सः संमातराविव ।
नन्वे३तदितः पुरा ब्रह्म देवा अमी विदुः ॥१३॥
यत्समुद्रमनु श्रितं तत्सिषासति सूर्यः ।
अध्वास्य विततो महान्पूर्वश्चापरश्च यः ॥१४॥

उत् । क्रेतुना । बृहता । देवः ।आ । अगन् । अप । अवृक् । तमः । अभि । ज्योतिः । अश्रैत् ।
दिव्यः । सुऽपर्णः । सः । वीरः । वि । अख्यत् । अदितेः । पुत्रः । भुवनानि । विश्वा ॥ ९ ॥
उत्ऽयन् । रश्मीन् । आ । तनुषे । विश्वा । रूपाणि । पुष्यसि ।
उभा । समुद्रौ । क्रतुना । वि । भासि । सर्वान् । लोकान् । परिऽभूः । भ्राजमानः ॥१०॥
पूर्वऽअपरम् । चरतः । मायया । एतौ । शिशू इति । क्रीडन्तौ । परि । यातः । अर्णवम् ।
विश्वा । अन्यः । भुवना । विऽचष्टे । हैरण्यैः । अन्यम् । हरितः । वहन्ति ॥ ११ ॥
दिवि । त्वा । अत्रिः । अधारयत् । सूर्या । मासाय । कर्तवे ।
सः । एषि । सुऽधृतः । तपन् । विश्वा । भूता । अवऽचाकशत् ॥ १२ ॥
उभौ । अन्तौ । सम् । अर्षसि । वत्सः । संमातरौऽइव ।
ननु । एतत् । इतः । पुरा । ब्रह्म । देवाः । अमी इति । विदुः ॥ १३ ॥
यत् । समुद्रम् । अनु । श्रितम् । तत् । सिसासति । सूर्यः ।
अध्वा । अस्य । विऽततः । महान् । पूर्वः । च । अपरः । च । यः ॥ १४ ॥

XIII.2.9 The divine (sun) has come with his great banner flying high. The darkness has been dispelled; the light is shed all around. That divine bird of goodly wings, the heroic son of the eternity (Aditi), has illumined all the worlds.

XIII.2.10 While rising, you spread out your rays; you develop all the forms; blazing and overpowering, you illumine both the oceans and all the worlds with your might.

XIII.2.11 They two move on one after the other by intellect; two playing young ones go about the ocean; the one looks abroad upon all beings; yellow steeds draw the other with golden (trappings ?). (See also Av. VII.81.1)

XIII.2.12 The enjoyer Lord has established you in the sky for making the mouth. As such, you go well-maintained, giving out heat and illuminating all the beings.

XIII.2.13 You ġo to both the ends, just as a calf goes to two joint mothers. Indeed previously the enlightened ones have known it to be the supreme god.

XIII.2.14 What is contained in the ocean, the sun wants to obtain. Its great path is stretched out far, that is eastward as well as westward.

तं समाप्नोति जूतिभिस्ततो नाप चिकित्सति ।
तेनामृतस्य भक्षं देवानां नाव रुन्धते ॥१५॥
उदु त्यं जातवेदसं देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥१६॥
अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः । सूराय विश्वचक्षसे ॥१७॥
अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु । भ्राजन्तो अग्नयो यथा ॥१८॥
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमा भासि रोचन ॥१९॥
प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषीः । प्रत्यङ्विश्वं स्वर्दृशे ॥२०॥
येना पावक चक्षसा भुरण्यन्तं जनाँ अनु । त्वं वरुण पश्यसि ॥२१॥

तम् । सम् । आप्नोति । जूतिऽभिः । ततः । न । अप । चिकित्सति ।
तेन । अमृतस्य । भक्षम् । देवानाम् । न । अव । रुन्धते ॥ १५ ॥
उत् । ऊं इति । त्यम् । जातऽवेदसम् । देवम् । वहन्ति । केतवः । दृशे । विश्वाय । सूर्यम् ॥
अप । त्ये । तायवः । यथा । नक्षत्रा । यन्ति । अक्तुऽभिः । सूराय । विश्वऽचक्षसे ॥१७॥
अदृश्रन् । अस्य । केतवः । वि । रश्मयः । जनान् । अनु । भ्राजन्तः । अग्नयः । यथा ॥
तरणिः । विश्वऽदर्शतः । ज्योतिःऽकृत् । असि । सूर्य । विश्वम् । आ । भासि । रोचन ॥
प्रत्यङ् । देवानाम् । विशः । प्रत्यङ् । उत् । एषि । मानुषीः । प्रत्यङ् । विश्वम् । स्वः । दृशे ॥
येन । पावक । चक्षसा । भुरण्यन्तम् । जनान् । अनु । त्वम् । वरुण । पश्यसि ॥ २१ ॥

XIII.2.15 That path he covers with fast speeds; he does not want to move away from that path. Thereby he does not obstruct the food of elixir of the enlightened ones.

XIII.2.16 The banners of glory speak high of God, who knows all that lives, that all may look on Him. (See also Ṛg. I.50.1)

XIII.2.17 In His supreme transcendental glow, all other transient lights fade away, like thieves. (See also Ṛg. I.50.2)

XIII.2.18 His illuminating rays, shining like blazing fires, are seen afar, refulgent over the world of men. (See also Ṛg. I.50.3)

XIII.2.19 O self-radiant God, you are the supreme light that outstrips all in speed, and it is your spiritual radiance that awakens each one of us, and shines through the entire firmament. (See also Ṛg. I.50.4)

XIII.2.20 O God, you rise above to vitalize the physical forces, and you go deep into the inner realm to shine through the hearts of mankind. You command all the regions of the celestial and spiritual world. (See also Ṛg. I.50.5)

XIII.2.21 It is your divine light that purifies our soul, and keeps us away from evil thoughts and actions. (See also Ṛg. I.50.6)

वि द्यामेषि रजस्पृथ्वहर्मिमानो अक्तुभिः । पश्यञ्जन्मानि सूर्य ॥२२॥
सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षणम् ॥२३॥
अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः । ताभिर्याति स्वयुक्तिभिः ॥२४॥
रोहितो दिवमारुहत्तपसा तपस्वी ।
स योनिमैति स उ जायते पुनः स देवानामधिपतिर्बभूव ॥२५॥
यो विश्वचर्षणिरुत विश्वतोमुखो यो विश्वतस्पाणिरुत विश्वतस्पृथः ।
सं बाहुभ्यां भरति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः ॥२६॥
एकपाद्द्विपदो भूयो वि चक्रमे द्विपात्त्रिपादमभ्येति पश्चात् ।
द्विपाद्ध षट्पदो भूयो वि चक्रमे त एकपदस्तन्वं समासते ॥२७॥
अतन्द्रो यास्यन्हरितो यदास्थाद्द्वे रूपे कृणुते रोचमानः ।
केतुमानुद्यन्त्सहमानो रजांसि विश्वा आदित्य प्रवतो वि भासि ॥२८॥

वि । द्याम् । एषि । रजः । पृथु । अहः । मिमानः । अक्तुऽभिः । पश्यन् । जन्मानि । सूर्य ॥
सप्त । त्वा । हरितः । रथे । वहन्ति । देव । सूर्य । शोचिःऽकेशम् । विऽचक्षणम् ॥२३॥
अयुक्त । सप्त । शुन्ध्युवः । सूरः । रथस्य । नप्त्यः । ताभिः । याति । स्वयुक्तिऽभिः ॥२४
रोहितः । दिवम् । आ । अरुहत् । तपसा । तपस्वी ।
सः । योनिम् । आ । एति । सः । ऊं इति । जायते । पुनः । सः । देवानाम् । अधिऽपतिः । बभूव ॥
यः । विश्वऽचर्षणिः । उत । विश्वतःऽमुखः । यः । विश्वतःऽपाणिः । उत । विश्वतःऽपृथः ।
सम् । बाहुऽभ्याम् । भरति । सम् । पतत्रैः । द्यावापृथिवी इति । जनयन् । देवः । एकः ॥२६ ॥
एकऽपात् । द्विऽपदः । भूयः । वि । चक्रमे । द्विऽपात् । त्रिऽपादम् । अभि । एति । पश्चात् ।
द्विऽपात् । ह । षट्ऽपदः । भूयः । वि । चक्रमे । ते । एकऽपदः । तन्वम् । सम् । आसते ॥ २७ ॥
अतन्द्रः । यास्यन् । हरितः । यत् । आऽअस्थात् । द्वे इति । रूपे इति । कृणुते । रोचमानः ।
केतुऽमान् । उत्ऽयन् । सहमानः । रजांसि । विश्वाः । आदित्य । प्रऽवतः । वि । भासि ॥२८॥

XIII.2.22 It is your divine light that discriminates between light and darkness for the benefit of all creatures that have birth. (See also Ṛg. I.50.7)

XIII.2.23 O self-radiant, through your divine spectrum of seven harnessed to your chariot, you guide all men. (See Also Ṛg. I.50.8)

XIII.2.24 The self-radiant one operates through these harnessed sevens (five organs of senses and mind and intellect on the spiritual plane), - never failing and ever purifying, and thus safely draws the chariot of inner cosmos. (See also Ṛg. I.50.9)

XIII.2.25 The austere ascending one ascends to heaven by his austerity. He comes to the womb therefrom. Ofcourse, he is born again. He becomes the overlord of the bounties of Nature.

XIII.2.26 He who belongs to all men (carṣaṇi) and has faces on all sides, who has hands on all sides and palms on all sides -- he brings together with his (two) arms, together with his wings (pl.), generating heaven and earth, sole Lord. (See Also Ṛg. X.81.3, Yv. XII.19)

XIII.2.27 The one-footed strode out more that the two-footed; the two-footed falls upon (abhi-i) the three-footed from behind; the two-footed strode out more than the six-footed; they sit together (about) the body of the one-footed. (See also Ṛg. X.117.8)

XIII.2.28 Free from lassitude, desirous of travelling, when he mounts his golden horses, he, the glowing, takes two forms. O sun, rich in rays, when rising, you overcome all the worlds, and shine out in tempests.

बण्महाँ असि सूर्य बडादित्य महाँ असि ।
महांस्ते महतो महिमा त्वमादित्य महाँ असि ॥२९॥
रोचसे दिवि रोचसे अन्तरिक्षे पतङ्ग पृथिव्यां रोचसे रोचसे अप्स्व१न्तः ।
उभा समुद्रौ रुच्या व्यापिथ देवो देवासि महिषः स्वर्जित् ॥३०॥
अर्वाङ् परस्तात्प्रयतो व्यध्व आशुर्विपश्चित्पतयन्पतङ्गः ।
विष्णुर्विचित्तः शवसाधितिष्ठन्प्र केतुना सहते विश्वमेजत् ॥३१॥
चित्रश्चिकित्वान्महिषः सुपर्ण आरोचयन्रोदसी अन्तरिक्षम् ।
अहोरात्रे परि सूर्यं वसाने प्रास्य विश्वा तिरतो वीर्याणि ॥३२॥
तिग्मो विभ्राजन्तन्वं१ शिशानोरंगमासः प्रवतो रराणः ।
ज्योतिष्मान्पक्षी महिषो वयोधा विश्वा आस्थात्प्रदिशः कल्पमानः ॥३३॥
चित्रं देवानां केतुरनीकं ज्योतिष्मान्प्रदिशः सूर्य उद्यन् ।
दिवाकरोति द्युम्नैस्तमांसि विश्वातारीदुरितानि शुक्रः ॥३४॥

बट् । महान् । असि । सूर्य । बट् । आदित्य । महान् । असि ।
महान् । ते । महतः । महिमा । त्वम् । आदित्य । महान् । असि ॥ २९ ॥
रोचसे । दिवि । रोचसे । अन्तरिक्षे । पतङ्ग । पृथिव्याम् । रोचसे । रोचसे । अप्ऽसु । अन्तः ।
उभा । समुद्रौ । रुच्या । वि । आपिथ । देवः । देव । असि । महिषः । स्वःऽजित् ॥ ३० ॥
अर्वाङ् । परस्तात् । प्रऽयतः । विऽअध्वे । आशुः । विपःऽचित् । पतयन् । पतङ्गः ।
विष्णुः । विऽचित्तः । शवसा । अधिऽतिष्ठन् । प्र । केतुना । सहते । विश्वम् । एजत् ॥ ३१ ॥
चित्रः । चिकित्वान् । महिषः । सुऽपर्णः । आऽरोचयन् । रोदसी इति । अन्तरिक्षम् ।
अहोरात्रे इति । परि । सूर्यम् । वसाने इति । प्र । अस्य । विश्वा । तिरतः । वीर्याणि ॥ ३२ ॥
तिग्मः । विऽभ्राजन् । तन्वम् । शिशानः । अरम्ऽगमासः । प्रऽवतः । रराणः ।
ज्योतिष्मान् । पक्षी । महिषः । वयःऽधाः । विश्वाः । आ । अस्थात् । प्रऽदिशः । कल्पमानः ॥
चित्रम् । देवानाम् । केतुः । अनीकम् । ज्योतिष्मान् । प्रऽदिशः । सूर्यः । उत्ऽयन् ।
दिवाऽकरः । अति । द्युम्नैः । तमांसि । विश्वा । अतारीत् । दुःऽइतानि । शुक्रः ॥ ३४ ॥

XIII.2.29 Verily , great art thou, O sun; verily, O Āditya, great art thou; great is the greatness of thee the great one; thou, O son of Infinity, art great. (See Yv. XXXIII.39. Ṛg. VIII.101.11)

XIII.2.30 You shine in the sky; you shine in the midspace; O flayer, you shine on the earth; you shine within the waters. You pervade both the oceans with light. O enlightened one, you are a mighty bounty of Nature and winner of light (bliss).

XIII.2.31 Swift, excellent observer, the flying one, flying hitherward from afar, soaring in the mid-course, pervading, extra-ordinarily thoughtful, subduing others with might, he, with his appearance, overbears all that moves.

XIII.2.32 Wonderfully wise, mighty, strong-winged (sun) illuminates the heaven and earth, as well as, the midspace. Day and night, dwelling about the sun, spread far and wide all his energies.

XIII.2.33 Scorching, blazing intensely, strengthening the body, moving at tremendous speed, abiding in heavenly heights, emitting light, winged one, the mighty, bestower of vigour, (the sun) has pervaded all the mid-regions giving them their form.

XIII.2.34 Wonderous bright appearance of the bounties of Nature, emitting light, the sun has risen up the mid-regions. The radiant maker of day with this intense brilliance has overcome all the darknesses difficult to traverse.

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्राद्द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥३५॥
उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम् ।
पश्याम त्वा सवितारं यमाहुरजस्रं ज्योतिर्यदविन्ददत्रिः ॥३६॥
दिवस्पृष्ठे धावमानं सुपर्णमदित्याः पुत्रं नाथकाम उप यामि भीतः ।
स नः सूर्य प्र तिर दीर्घमायुर्मा रिषाम सुमतौ ते स्याम ॥३७॥
सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन्याति भुवनानि विश्वा ॥३८॥
रोहितः कालो अभवद्रोहितोऽग्रे प्रजापतिः ।
रोहितो यज्ञानां मुखं रोहितः स्वराभरत् ॥३९॥
रोहितो लोको अभवद्रोहितोऽत्यतपद्दिवम् ।
रोहितो रश्मिभिर्भूमिं समुद्रमनु सं चरत् ॥४०॥

चित्रम् । देवानाम् । उत् । अगात् । अनीकम् । चक्षुः । मित्रस्य । वरुणस्य । अग्नेः ।
आ । अप्रात् । द्यावापृथिवी इति । अन्तरिक्षम् । सूर्यः । आत्मा । जगतः । तस्थुषः । च ॥
उच्चा । पतन्तम् । अरुणम् । सुऽपर्णम् । मध्ये । दिवः । तरणिम् । भ्राजमानम् ।
पश्याम । त्वा । सवितारम् । यम् । आहुः । अजस्रम् । ज्योतिः । यत् । अविन्दत् । अत्रिः ॥
दिवः । पृष्ठे । धावमानम् । सुऽपर्णम् । अदित्याः । पुत्रम् । नाथऽकामः । उप । यामि । भीतः ।
सः । नः । सूर्य । प्र । तिर । दीर्घम् । आयुः । मा । रिषाम । सुऽमतौ । ते । स्याम ॥३७॥
सहस्रऽअह्न्यम् । विऽयतौ । अस्य । पक्षौ । हरेः । हंसस्य । पततः । स्वःऽगम् ।
सः । देवान् । सर्वान् । उरसि । उपऽदद्य । समऽपश्यन् । याति । भुवनानि । विश्वा ॥
रोहितः । कालः । अभवत् । रोहितः । अग्रे । प्रजाऽपतिः ।
रोहितः । यज्ञानाम् । मुखम् । रोहितः । स्वः । आ । अभरत् ॥ ३९ ॥
रोहितः । लोकः । अभवत् । रोहितः । अति । अतपत् । दिवम् ।
रोहितः । रश्मिऽभिः । भूमिम् । समुद्रम् । अनु । सम् । चरत् ॥ ४० ॥

XIII.2.35 Yonder has arisen with wonderful divine effulgence the eye of our light, life and energy. He has filled the celestial regions, the earth and the inter-space with his glory. This sun is the soul of all that moves or is immovable. (See also Ṛg. I.115.1,;Yv. VII.42)

XIII.2.36 May we behold you, the impeller, flying high, strong-winged, swimming in the midst of heaven, blazing bright, whom they call the light eternal, which an enjoyer realizes.

XIII.2.37 Frightened and desirous of refuge, I approach the strong-winged sun, the son of eternity, racing on the top of the sky. As such, O son, may you bestow a long span of life. May we not come to harm. May we be in your friendly favour.

XIII.2.38 A thousand days journey are expanded the wings of him, of the yellow swan flying to heaven; he, putting all the gods in his breast, goes viewing together all existences. (See also Av. X.8.18)

XIII.2.39 The ascendant Lord has become the time. The ascendant Lord has been the Lord of creatures in the beginning. The ascendant Lord is the mouth of sacrifices. The ascendant Lord has brought the light.

XIII.2.40 The ascendant Lord has become the world. The ascendant Lord has heated the sky. The ascendant Lord with His rays moves along the earth and the ocean.

सर्वा दिशः समचरद्रोहितोधिपतिर्दिवः ।
दिवं समुद्रमाद्भूमिं सर्वं भूतं वि रक्षति ॥४१॥

आरोहञ्छुक्रो बृहतीरतन्द्रो द्वे रूपे कृणुते रोचमानः ।
चित्रश्चिकित्वान्महिषो वातमाया यावतो लोकानभि यद्विभाति ॥४२॥

अभ्य१न्यदेति पर्यन्यदस्यतेहोरात्राभ्यां महिषः कल्पमानः ।
सूर्यं वयं रजसि क्षियन्तं गातुविदं हवामहे नाधमानाः ॥४३॥

पृथिवीप्रो महिषो नाधमानस्य गातुरदब्धचक्षुः परि विश्वं बभूव ।
विश्वं संपश्यन्त्सुविदत्रो यजत्र इदं शृणोतु यदहं ब्रवीमि ॥४४॥

पर्यस्य महिमा पृथिवीं समुद्रं ज्योतिषा विभ्राजन्परि द्यामन्तरिक्षम् ।
सर्वं संपश्यन्त्सुविदत्रो यजत्र इदं शृणोतु यदहं ब्रवीमि ॥४५॥

अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥४६॥

सर्वाः । दिशः । सम । अचरत् । रोहितः । अधिऽपतिः । दिवः ।
दिवम् । समुद्रम् । आत् । भूमिम् । सर्वम् । भूतम् । वि । रक्षति ॥ ४१ ॥

आऽरोहन् । शुक्रः । बृहतीः । अतन्द्रः । द्वे इति । रूपे इति । कृणुते । रोचमानः । चित्रः ।
चिकित्वान् । महिषः । वातम्ऽआयाः । यावतः । लोकान् । अभि । यत् । विऽभाति ॥

अभि । अन्यत् । एति । परि । अन्यत् । अस्यते । अहोरात्राभ्याम् । महिषः । कल्पमानः ।
सूर्यम् । वयम् । रजसि । क्षियन्तम् । गातुऽविदम् । हवामहे । नाधमानाः ॥ ४३ ॥

पृथिवीऽप्रः । महिषः । नाधमानस्य । गातुः । अदब्धऽचक्षुः । परि । विश्वम् । बभूव ।
विश्वम् । सम्ऽपश्यन् । सुऽविदत्रः । यजत्रः । इदम् । शृणोतु । यत् । अहम् । ब्रवीमि ॥

परि । अस्य । महिमा । पृथिवीम् । समुद्रम् । ज्योतिषा । विऽभ्राजन् । परि । द्याम् ।
अन्तरिक्षम् । सर्वम् । सम्ऽपश्यन् । सुऽविदत्रः । यजत्रः । इदम् । शृणोतु । यत् । अहम् । ब्रवीमि ॥

अबोधि । अग्निः । सम्ऽइधा । जनानाम् । प्रति । धेनुम्ऽइव । आऽयतीम् । उषसम् ।
यह्वाःऽइव । प्र । वयाम् । उत्ऽजिहानाः । प्र । भानवः । सिस्रते । नाकम् । अच्छ ॥ ४६ ॥

XIII.2.41 The ascendant Lord, the sovereign of the heaven, moves about in all the quarters; He guards the sky, the ocean, the earth and also all the beings.

XIII.2.42 Free from lassitude, the bright one (the sun), while ascending the great (spaces), develops two forms shining beautifully. Wonderful, observant, mighty, and creator of wind phenomena, he illumines all the worlds, whatsoever, there exist.

XIII.2.43 Being shaped by day and night, the mighty (sun), goes towards one (form) and the other (form) is thrust away. Imploring, we invoke the sun, who knows the path and dwells in the midspace.

XIII.2.44 The mighty (sun), fulfiller of the earth, the guide of the implorer, one of unsuppressed vision, has encompassed the world. May he, the benevolent, worshipful, beholding all, listen to what I say.

XIII.2.45 The grandeur of Him goes beyond the earth, beyond the ocean, and blazing brilliant with light it goes beyond the midspace and the sky. May he, the benevolent, worshipful, beholding all, listen to what I say.

XIII.2.46 With the fire-wood of people, the fire divine has awakened, just as a milch-cow awakens at the coming of the dawn. Like young plants throwing their branches upwards, the beams of rays go forth towards the heaven.

(३) तृतीयं सूक्तम्

(१-२६) षड्विंशत्यृचस्यास्य सूक्तस्य ब्रह्मा ऋषिः । अध्यात्मरोहितादित्या देवताः । (१, १६, १८, २१) प्रथमाषोडश्यष्टादश्येकविंशीनामृचां चतुरवसानाष्टपदाकृतिः, (२) द्वितीयायास्त्र्यवसाना षट्पदा भुरिगष्टिः, (३) तृतीयायास्त्र्यवसाना षट्पदाष्टिः, (४) चतुर्थ्यास्त्र्यवसाना षट्पदातिशाक्वरगर्भा धृतिः, (५-६) पञ्चमीषष्ठ्योश्चतुरवसाना सप्तपदा शाक्वरातिशाक्वरगर्भा प्रकृतिः, (७) सप्तम्याश्चतुरवसाना सप्तपदानुष्टुब्गर्भातिधृतिः, (८, २०, २२) अष्टमीविंशीद्वाविंशीनां त्र्यवसाना षट्पदात्यष्टिः, (९-१२) नवम्यादिचतसृणां चतुरवसाना सप्तपदा भुरिगतिधृतिः, (१३-१४) त्रयोदशीचतुर्दश्योश्चतुरवसानाष्टपदा कृतिः, (१५) पञ्चदश्याश्चतुरवसाना सप्तपदा निचृदतिधृतिः, (१७, २४) सप्तदशीचतुर्विंश्योश्चतुरवसाना सप्तपदा कृतिः, (१९) एकोनविंश्याश्चतुरवसानाष्टपदा भुरिगाकृतिः, (२३, २५) त्रयोविंशीपञ्चविंश्योश्चतुरवसानाष्टपदा विकृतिः, [(२६) षड्विंश्याश्चानुष्टुप्] छन्दांसि ॥

य इमे द्यावापृथिवी जजान यो द्रापिं कृत्वा भुवनानि वस्ते ।
यस्मिन्क्षियन्ति प्रदिशः षडुर्वीर्याः पतङ्गो अनु विचाकशीति तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥१॥
यस्माद्वाता ऋतुथा पवन्ते यस्मात्समुद्रा अधि विक्षरन्ति तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥२॥
यो मारयति प्राणयति यस्मात्प्राणन्ति भुवनानि विश्वा तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥३॥
यः प्राणेन द्यावापृथिवी तर्पयत्यपानेन समुद्रस्य जठरं यः पिपर्ति तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥४॥

यः । इमे इति । द्यावापृथिवी इति । जजान । यः । द्रापिम् । कृत्वा । भुवनानि । वस्ते ।
यस्मिन् । क्षियन्ति । प्रऽदिशः । षट् । उर्वीः । याः । पतङ्गः । अनु । विऽचाकशीति । तस्य ।
देवस्य । क्रुद्धस्य । एतत् । आगः । यः । एवम् । विद्वांसम् । ब्राह्मणम् । जिनाति ।
उत् । वेपय । रोहित । प्र । क्षिणीहि । ब्रह्मऽज्यस्य । प्रति । मुञ्च । पाशान् ॥ १ ॥
यस्मात् । वाताः । ऋतुऽथा । पवन्ते । यस्मात् । समुद्राः । अधि । विऽक्षरन्ति । तस्य ।० ॥ २ ॥
यः । मारयति । प्राणयति । यस्मात् । प्राणन्ति । भुवनानि । विश्वा । तस्य ।० ॥ ३ ॥
यः । प्राणेन । द्यावापृथिवी इति । तर्पयति । अपानेन । समुद्रस्य । जठरम् । यः । पिपर्ति । तस्य ।०॥

To the Sun (with imprecation on the evil-doer)

XIII.3.1 He, who has brought into existence these two – the heaven and earth; who dwells within the beings making them a mantle (for himself); in whom find shelter the six vast mid-quarters, which the flying one (sun) illuminates – to that wrathful (enraged) Lord it is offending, some one scathes such a learned intellectual person. O ascending one (Rohita), make him tremble, destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.2 Out of whom the winds blow in due seasons, out of whom the oceans flow out all around – to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one (Rohita), make him tremble; destroy him put your snares upon the harasser of intellectual persons.

XIII.3.3 He, who causes to die (and) who brings to life, (and) from whom all the beings receive life – to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one (Rohita), make him tremble; destroy him; put your snares upon the harasser of intellectual person.

XIII.3.4 He, who refreshes the heaven and earth with (his) in-breath, (and) who fills the belly of the ocean with (his) out-breath – to that wrathful (enraged) Lord it is offending that some scathes such a learned intellectual person. O ascending one (Rohita), make him tremble; destroy him; put your snares upon the harasser intellectual persons.

यस्मिन्विराट्परमेष्ठी प्रजापतिरग्निर्वैश्वानरः सह पङ्क्त्या श्रितः ।
यः परस्य प्राणं परमस्य तेज आददे तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥५॥
यस्मिन्षडुर्वीः पञ्च दिशो अधि श्रिताश्चतस्र आपो यज्ञस्य त्रयोक्षराः ।
यो अन्तरा रोदसी क्रुद्धश्चक्षुषैक्षत तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥६॥
यो अन्नादो अन्नपतिर्बभूव ब्रह्मणस्पतिरुत यः ।
भूतो भविष्यद्भुवनस्य यस्पतिस्तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥७॥
अहोरात्रैर्विमितं त्रिंशदङ्गं त्रयोदशं मासं यो निर्मिमीते तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥८॥

यस्मिन् । विऽराट् । परमेऽस्थी । प्रजाऽपतिः । अग्निः । वैश्वानरः । सह । पङ्क्त्या । श्रितः ।
यः । परस्य । प्राणम् । परमस्य । तेजः । आऽददे । तस्य ।० ॥ ५ ॥
यस्मिन् । षट् । उर्वीः । पञ्च । दिशः । अधि । श्रिताः । चतस्रः । आपः । यज्ञस्य । त्रयः ।
अक्षराः । यः । अन्तरा । रोदसी इति । क्रुद्धः । चक्षुषा । ऐक्षत । तस्य ।० ॥ ६ ॥
यः । अन्नऽअदः । अन्नऽपतिः । बभूव । ब्रह्मणः । पतिः । उत । यः ।
भूतः । भविष्यत् । भुवनस्य । यः । पतिः । तस्य । ० ॥ ७ ॥
अहोरात्रैः । विऽमितम् । त्रिंशत्ऽअङ्गम् । त्रयःऽदशम् । मासम् । यः । निःऽमिमीते । तस्य ।०॥

XIII.3.5 He, within whom Virāj (the lumiscent), the Lord dwelling in the highest abode, the Lord of creatures, and the adorable Lord, benefactor of all men, has found shelter with the pañkti metre; He, who takes to Himself the vital breath of the highest and the radiance of the supreme -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.6 He, in whom the six vast (mid-quarters), the five quarters, the four waters and the three syllables of yajna (the sacrifice) have found shelter; who, being, enraged, looks through heaven and earth with his vision -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.7 He, who being the Lord of food, has become the consumer of food, and who is also the Lord of knowledge; who is the Lord of the existence past, present and future -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble, destroy him, put your snares upon the harasser of intellectual persons.

XIII.3.8 He, who forms the thirteenth month, measured well with days and nights and containing thirty members -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन्त्सदनादृतस्य तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥९॥
यत्ते चन्द्रं कश्यप रोचनावद्यत्संहितं पुष्कलं चित्रभानु ।
यस्मिन्त्सूर्या आर्पिताः सप्त साकं तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥१०॥
बृहदेनमनु वस्ते पुरस्ताद्रथंतरं प्रति गृह्णाति पश्चात् ।
ज्योतिर्वसाने सदमप्रमादं तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥११॥
बृहदन्यतः पक्ष आसीद्रथंतरमन्यतः सबले सध्रीची ।
यद्रोहितमजनयन्त देवास्तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥१२॥

कृष्णम् । निऽयानम् । हरयः । सुऽपर्णाः । अपः । वसानाः । दिवम् । उत् । पतन्ति ।
ते । आ । अववृत्रन् । सदनात् । ऋतस्य । तस्य । ० ॥ ९ ॥

यत् । ते । चन्द्रम् । कश्यप । रोचनऽवत् । यत् । सम्ऽहितम् । पुष्कलम् । चित्रऽभानु ।
यस्मिन् । सूर्याः । आर्पिताः । सप्त । साकम् । तस्य । ० ॥ १० ॥
बृहत् । एनम् । अनु । वस्ते । पुरस्तात् । रथम्ऽतरम् । प्रति । गृह्णाति । पश्चात् ।
ज्योतिः । वसाने इति । सदम् । अप्रऽमादम् । तस्य ।०॥ ११ ॥
बृहत् । अन्यतः । पक्षः । आसीत् । रथम्ऽतरम् । अन्यतः । सबले इति सऽबले ।
सध्रीची इति । यत् । रोहितम् । अजनयन्त । देवाः । तस्य ।० ॥ १२ ॥

XIII.3.9 Dark the descent; the strong-winged birds are golden; they fly aloft to heaven, enrobed in waters. They have come higher from the seat of order, against to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.10 O discerner (Kaśyapa) Lord, what is shiningly pleasing of yours, (and) what is the concentrated, abundant wonderful light, and wherein the seven suns are set together -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.11 The bṛhat Sāman clads Him in front and the rathamtara Sāman takes hold of Him from behind, always carefully clothed in light -- to that enraged Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.12 When the bounties of Nature brought into being the ascending one (sun), the bṛhat was his one wing and the rathamtara the other, both were equally strong and directed to one and the same goal -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

स वरुणः सायमग्निर्भवति स मित्रो भवति प्रातरुद्यन् ।
स संविता भूत्वान्तरिक्षेण याति स इन्द्रो भूत्वा तपति मध्यतो दिवं तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥१३॥
सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन्याति भुवनानि विश्वा तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥१४॥
अयं स देवो अप्स्व१न्तः सहस्रमूलः पुरुशाको अत्त्रिः ।
य इदं विश्वं भुवनं जजान तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥१५॥
शुक्रं वहन्ति हरयो रघुष्यदो देवं दिवि वर्चसा भ्राजमानम् ।
यस्योर्ध्वा दिवं तन्व१स्तपन्त्यर्वाङ् सुवर्णैः पटरैर्वि भाति तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥१६॥

सः । वरुणः । सायम् । अग्निः । भवति । सः । मित्रः । भवति । प्रातः । उत्ऽयन् । सः । संविता । भूत्वा । अन्तरिक्षेण । याति । सः । इन्द्रः । भूत्वा । तपति । मध्यतः । दिवम् । तस्य ।० ॥ १३ ॥

सहस्रऽअह्न्यम् । विऽयतौ । अस्य । पक्षौ । हरेः । हंसस्य । पततः । स्वःऽगम् । सः । देवान् । सर्वान् । उरसि । उपऽदद्य । सम्ऽपश्यन् । याति । भुवनानि । विश्वा । तस्य ।०॥

अयम् । सः । देवः । अप्ऽसु । अन्तः । सहस्रऽमूलः । पुरुऽशाकः । अत्त्रिः ।
यः । इदम् । विश्वम् । भुवनम् । जजान । तस्य ।०॥ १५ ॥

शुक्रम् । वहन्ति । हरयः । रघुऽस्यदः । देवम् । दिवि । वर्चसा । भ्राजमानम् ।
यस्य । ऊर्ध्वाः । दिवम् । तन्वः । तपन्ति । अर्वाङ् । सुऽवर्णैः । पटरैः । वि । भाति । तस्य ।० ॥१६॥

XIII.3.13 He, the venerable Lord, is adorable (Agni) in the evening; He is friendly (Mitra) in the morning, while rising up; becoming the impeller (Savitṛ), He goes through the midspace; becoming resplendent (Indra), He blazes up in the midst of the sky -- to that enraged Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of the intellectual persons.

XIII.3.14 A thousand day's journey are expanded the wings of him, of the yellow swan flying to heaven; he, putting all the gods in his breast, goes viewing together all existences -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble, destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.15 This is the very same Lord dwelling within the waters, having thousand roots and helping in many ways, the consumer (of all), who has created all this existence -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares on the harnesser of intellectual persons.

XIII.3.16 Swift-moving coursers bear along the bright Lord blazing with lustre in the heaven; him, whose upper parts heat up the sky, and downward part shines with colourful rays (rays of beautiful colours) -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

येनादित्यान्हरितः संवहन्ति येन यज्ञेन बहवो यन्ति प्रजानन्तः ।
यदेकं ज्योतिर्बहुधा विभाति तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥१७॥
सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुस्तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥१८॥
अष्टधा युक्तो वहति वह्निरुग्रः पिता देवानां जनिता मतीनाम् ।
ऋतस्य तन्तुं मनसा मिमानः सर्वा दिशः पवते मातरिश्वा तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥१९॥
सम्यञ्चं तन्तुं प्रदिशोनु सर्वा अन्तर्गायत्र्याममृतस्य गर्भे तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥२०॥

येन । आदित्यान् । हरितः । सम्ऽवहन्ति । येन । यज्ञेन । बहवः । यन्ति । प्रऽजानन्तः ।
यत् । एकम् । ज्योतिः । बहुऽधा । विऽभाति । तस्य ।० ॥ १७ ॥

सप्त । युञ्जन्ति । रथम् । एकऽचक्रम् । एकः । अश्वः । वहति । सप्तऽनामा ।
त्रिऽनाभि । चक्रम् । अजरम् । अनर्वम् । यत्र । इमा । विश्वा । भुवना । अधि । तस्थुः । तस्य ।० ॥

अष्टऽधा । युक्तः । वहति । वह्निः । उग्रः । पिता । देवानाम् । जनिता । मतीनाम् ।
ऋतस्य । तन्तुम् । मनसा । मिमानः । सर्वाः । दिशः । पवते । मातरिश्वा । तस्य ।० ॥ १९ ॥

सम्यञ्चम् । तन्तुम् । प्रऽदिशः । अनु । सर्वाः । अन्तः । गायत्र्याम् । अमृतस्य । गर्भे । तस्य ।० ॥

XIII.3.17 By whom the golden coursers (the rays) bear along the Ādityas (the suns of twelve months); by which worship many a realized ones go; who, being the sole light, shines out in various forms -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.18 Seven harness a one-wheeled chariot; one horse, having seven names, draws (it); or three naves (is) the wheel, unwasting, unassailed, whereon stand all these existences -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.19 The fierce chariot-horse, the father of the enlightened ones and the begetter of wisdoms, bears along, harnessed eight-fold. Arranging the thread of the eternal law by the mind, the dweller of the midspace goes about purifying all the quarters -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.20 (Arranging) the entire thread in all the vast quarters, inside the Gāyatrī, within the womb of the immortality – to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

निम्रुचस्तिस्रो व्युषो ह तिस्रस्त्रीणि रजांसि दिवो अङ्ग तिस्रः ।
विद्मा ते अग्ने त्रेधा जनित्रं त्रेधा देवानां जनिमानि विद्म तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥२१॥
वि य और्णोत्पृथिवीं जायमान आ समुद्रमदधादन्तरिक्षे तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥२२॥
त्वमग्ने क्रतुभिः केतुभिर्हितो३ऽर्कः समिद्ध उदरोचथा दिवि ।
किमभ्या३र्चन्मरुतः पृश्निमातरो यद्रोहितमजनयन्त देवास्तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥२३॥
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यो३ऽस्येशे द्विपदो यश्चतुष्पदस्तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥२४॥

निऽम्रुचः । तिस्रः । विऽउषः । ह । तिस्रः । त्रीणि । रजांसि । दिवः । अङ्ग । तिस्रः । विद्म । ते । अग्ने । त्रेधा । जनित्रम् । त्रेधा । देवानाम् । जनिमानि । विद्म । तस्य ।० ॥२१॥

वि । यः । और्णोत् । पृथिवीम् । जायमानः । आ । समुद्रम् । अदधात् । अन्तरिक्षे । तस्य ।० ॥

त्वम् । अग्ने । क्रतुऽभिः । केतुऽभिः । हितः । अर्कः । सम्ऽइद्धः । उत् । अरोचथाः । दिवि । किम् । अभि । आर्चन् । मरुतः । पृश्निऽमातरः । यत् । रोहितम् । अजनयन्त । देवाः । तस्य ।० ॥ २३ ॥

यः । आत्मऽदाः । बलऽदाः । यस्य । विश्वे । उपऽआसते । प्रऽशिषम् । यस्य । देवाः । यः । अस्य । ईशे । द्विऽपदः । यः । चतुःऽपदः । तस्य ।० ॥ २४ ॥

XIII.3.21 There are three evening; verily, are three; three are the midspaces; O dear one, the heaven also are three. O adorable fire divine, we know your three-fold birth-place; we know threefold births of the enlightened ones -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.22 He, who, while coming into existence, covered the earth and set the ocean (vapour) all over the midspace -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.23 O adorable fire divine, set in motion by the sacrifices and by the rays, enkindled well, you shine up as the sun in the sky. What was that, which the cloud-bearing winds, sons of the earth, worshipped, when the bounties of Nature brought the ascending sun into being -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

XIII.3.24 He who is self-giving, strength-giving, of whom all, of whom (even) the gods wait upon the direction, who is master of these bipeds, who of quadrupeds -- to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons.

एकपाद्विपदो भूयो वि चक्रमे द्विपात्त्रिपादमभ्येति पश्चात् ।
चतुष्पाच्चक्रे द्विपदामभिस्वरे संपश्यन्पङ्क्तिमुपतिष्ठमानस्तस्य देवस्य ।
क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥२५॥
कृष्णायाः पुत्रो अर्जुनो रात्र्या वत्सोऽजायत ।
स ह द्यामधि रोहति रुहो रुरोह रोहितः ॥२६॥

एकऽपात् । द्विऽपदः । भूयः । वि । चक्रमे । द्विऽपात् । त्रिऽपादम् । अभि । एति । पश्चात् । चतुःऽपात् । चक्रे । द्विऽपदाम् । अभिऽस्वरे । सम्ऽपश्यन् । पङ्क्तिम् । उपऽतिष्ठमानः । तस्य । देवस्य । क्रुद्धस्य । एतत् । आगः । यः । एवम् । विद्वांसम् । ब्राह्मणम् । जिनाति । उत् । वेपय । रोहित । प्र । क्षिणीहि । ब्रह्मऽज्यस्य । प्रति । मुञ्च । पाशान् ॥ २५ ॥
कृष्णायाः । पुत्रः । अर्जुनः । रात्र्याः । वत्सः । अजायत ।
सः । ह । द्याम् । अधि । रोहति । रुहः । रुरोह । रोहितः ॥ २६ ॥

(४) चतुर्थं सूक्तम्

'स एति सविता' इत्यारभ्य 'अन्नाद्येन' इत्यन्तानां षट्पर्यायाणां ब्रह्मा ऋषिः । मन्त्रोक्ता देवताः ॥

[१] प्रथमः पर्यायः

(१-१३) त्रयोदशर्चस्यास्य पर्यायस्य (१-११) प्रथमाद्येकादशर्चां प्राजापत्यानुष्टुप्, (१२) द्वादश्या विराड्गायत्री, (१३) त्रयोदश्याश्चासुर्युष्णिक् छन्दांसि ॥

स एति सविता स्वर्दिवस्पृष्ठेऽवचाकशत् ॥१॥
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥२॥
स धाता स विधर्ता स वायुर्नभ उच्छ्रितम् ।
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥३॥

सः । एति । सविता । स्वः । दिवः । पृष्ठे । अवऽचाकशत् ॥ १ ॥
रश्मिऽभिः । नभः । आऽभृतम् । महाऽइन्द्रः । एति । आऽवृतः ॥ २ ॥
सः । धाता । सः । विऽधर्ता । सः । वायुः । नभः । उत्ऽश्रितम् । रश्मिऽभिः ।० ॥३॥

XIII.3.25 The one-footed strode out more than the two-footed; the two-footed falls upon the three-footed from behind; the four-footed acted within the call of the two-footed ones, beholding the series (pañti), drawing near (up-asthā) – to that wrathful (enraged) Lord it is offending that some one scathes such a learned intellectual person. O ascending one, make him tremble; destroy him; put your snares upon the harasser of intellectual persons. (See also Ṛg. X.117.8)

XIII.3.26 The white son of the black (mother), the young of night, was born, he ascends upon the sky; the ruddy one ascended the ascents. (See also Ṛg. X.117.8)

Extolling the Sun

PARYĀYA - I

XIII.4.1 That impeller Lord comes to the world of light shining upon the top of the sky.

XIII.4.2 The great resplendent Lord comes to the dimmed sky surrounded with rays.

XIII.4.3 He is the creator, He the ordainer, He the elemental wind, He the mighty rain-cloud (nabhas). The great resplendent Lord comes to the dimmed sky surrounded with rays.

सोऽर्यमा स वरुणः स रुद्रः स महादेवः ।
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥४॥
सो अग्निः स उ सूर्यः स उ एव महायमः ।
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥५॥
तं वत्सा उप तिष्ठन्त्येकशीर्षाणो युता दश ।
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥६॥
पश्चात्प्राञ्च आ तन्वन्ति यदुदेति वि भासति ।
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥७॥
तस्यैष मारुतो गणः स एति शिक्याकृतः ॥८॥
रश्मिभिर्नभ आभृतं महेन्द्र एत्यावृतः ॥९॥
तस्येमे नव कोशा विष्टम्भा नवधा हिताः ॥१०॥

सः । अर्यमा । सः । वरुणः । सः । रुद्रः । सः । महाऽदेवः । रश्मिऽभिः ।० ॥४॥

सः । अग्निः । सः । ऊं इति । सूर्यः । सः । ऊं इति । एव । महाऽयमः । रश्मिऽभिः ।० ॥५॥

तम् । वत्साः । उप । तिष्ठन्ति । एकऽशीर्षाणः । युताः । दश । रश्मिऽभिः ।०॥६॥

पश्चात् । प्राञ्चः । आ । तन्वन्ति । यत् । उत्ऽएति । वि । भासति । रश्मिऽभिः ।० ॥७॥

तस्य । एषः । मारुतः । गणः । सः । एति । शिक्याऽकृतः ॥ ८ ॥

रश्मिऽभिः । नभः । आऽभृतम् । महाऽइन्द्रः । एति । आऽवृतः ॥ ९ ॥

तस्य । इमे । नव । कोशाः । विऽस्तम्भाः । नवऽधा । हिताः ॥ १० ॥

XIII.4.4 He is the ordainer, He the venerable, He (is) terrible punisher, He (is) the great Lord. The great resplendent Lord comes to the dimmed sky surrounded with rays.

XIII.4.5 He is the fire divine; He is also the sun; and verily He is the supreme controller. The great resplendent Lord comes to the dimmed sky surrounded with rays.

XIII.4.6 The ten-thousand calves, having one common head, wait upon Him. The great resplendent Lord comes to the dimmed sky surrounded with rays.

XIII.4.7 They spread forward, and also backwards, when He rises up and shines forth. The great resplendent Lord comes to the dimmed sky surrounded with rays.

XIII.4.8 This is his troop of cloud-bearing winds. He comes as if placed on a swing.

XIII.4.9 The great resplendent Lord comes to the dimmed sky surrounded with rays. (Av. XIII.4.2)

XIII.4.10 These are his nine sheaths, (nine) supports set in nine places (or in nine ways).

स प्रजाभ्यो वि पश्यति यच्च प्राणति यच्च न ॥११॥
तमिदं निगतं सहः स एष एक एकवृदेक एव ॥१२॥
एते अस्मिन्देवा एकवृतो भवन्ति ॥१३॥

सः । प्रऽजाभ्यः । वि । पश्यति । यत् । च । प्राणति । यत् । च । न ॥ ११ ॥

तम् । इदम् । निऽगतम् । सहः । सः । एषः । एकः । एकऽवृत् । एकः । एव ॥ १२ ॥

एते । अस्मिन् । देवाः । एकऽवृतः । भवन्ति ॥ १३ ॥

[२] द्वितीयः पर्यायः

(१–८) अष्टर्चस्यास्य पर्यायस्य (१) प्रथमर्चो भुरिक्साम्नी त्रिष्टुप्, (२) द्वितीयाया आसुरी पङ्क्तिः, (३, ६) तृतीयाषष्ठयोः प्राजापत्यानुष्टुप्, (४–५) चतुर्थीपञ्चम्योरासुरी गायत्री, [(७) सप्तम्या द्विपदा विराड्गायत्री, (८) अष्टम्याश्चासुर्यनुष्टुप्] छन्दांसि ॥

कीर्तिश्च यशश्चाम्भश्च नभश्च ब्राह्मणवर्चसं चान्नं चान्नाद्यं च ॥१॥ -[१४]
य एतं देवमेकवृतं वेद ॥२॥ -[१५]
न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते । य एतं देवमेकवृतं वेद ॥३॥ -[१६]
न पञ्चमो न षष्ठः सप्तमो नाप्युच्यते । य एतं देवमेकवृतं वेद ॥४॥ -[१७]

कीर्तिः । च । यशः । च । अम्भः । च । नभः । च । ब्राह्मणऽवर्चसम् । च । अन्नम् । च । अन्नऽअद्यम् । च ॥ १ ॥

यः । एतम् । देवम् । एकऽवृतम् । वेद ॥ २ ॥

न । द्वितीयः । न । तृतीयः । चतुर्थः । न । अपि । उच्यते । यः । एतम् ।० ॥३॥

न । पञ्चमः । न । षष्ठः । सप्तमः । न । यः । एतम् ।० ॥ ४ ॥

XIII.4.11 He oversees the creatures, that who breaths as well as that who breathes not.

XIII.4.12 This over-powering might goes into him. He, this one, is one; the only one acceptable; the one alone.

XIII.4.13 Into him these enlightened ones become acceptors of one alone.

PARYĀYA - II

XIII.4.14 Glory and fame, and water and rain, and intellectual brilliance, and food and the edibles (he gets).

XIII.4.15 Who realizes this Lord as the only acceptable one.

XIII.4.16 Not second, nor third, also not fourth is he said to be, who realizes this Lord as the only acceptable one.

XIII.4.17 Not fifth, nor sixth, also not seventh is he said to be, who realizes this Lord as the only acceptable one.

नाष्टमो न नवमो दशमो नाप्युच्यते । य एतं देवमेकवृतं वेद ॥५॥ -[१८]
स सर्वस्मै वि पश्यति यच्च प्राणति यच्च न । य एतं देवमेकवृतं वेद ॥६॥ - [१९]
तमिदं निर्गतं सहः स एष एक एकवृदेक एव । य एतं देवमेकवृतं वेद ॥७॥ -[२०]
सर्वे अस्मिन्देवा एकवृतो भवन्ति । य एतं देवमेकवृतं वेद ॥८॥ - [२१]

न । अष्टमः । न । नवमः । दशमः । न । अपि । उच्यते । यः । एतम् ।० ॥७॥

सः । सर्वस्मै । वि । पश्यति । यत् । च । प्राणति । यत् । च । न ।यः । एतम् ।० ॥६॥

तम् ।इदम् ।निःऽगतम् । सहः ।सः ।एषः ।एकः ।एकऽवृत् ।एकः । एव ।यः। एतम् ।० ॥

सर्वे । अस्मिन् । देवाः । एकऽवृतः । भवन्ति । यः । एतम् ।० ॥८॥

[३] तृतीयः पर्यायः

(१-७) सप्तर्चस्यास्य पर्यायस्य (१) प्रथमर्चो भुरिक्प्राजापत्या त्रिष्टुप्, (२) द्वितीयाया आर्ची गायत्री,
(३) तृतीयायास्त्रिष्टुप्, (४) चतुर्थ्या एकपदासुरी गायत्री, (५) पञ्चम्या आर्च्यनुष्टुप्,
(६-७) षष्ठीसप्तम्योश्च प्राजापत्यानुष्टुप् छन्दांसि ॥

ब्रह्म च तपश्च कीर्तिश्च यशश्चाम्भश्च नभश्च ब्राह्मणवर्चसं चान्नं चान्नाद्यं च ।
य एतं देवमेकवृतं वेद ॥१॥ -[२२]
भूतं च भव्यं च श्रद्धा च रुचिश्च स्वर्गश्च स्वधा च ॥२॥ - [२३]
य एतं देवमेकवृतं वेद ॥३॥ -[२४]
स एव मृत्युः सोऽमृतं सोऽभ्वं स रक्षः ॥४॥ -[२५]

ब्रह्म । च । तपः । च । कीर्तिः । च । यशः । च । अम्भः । च । नभः । च । ब्राह्मण-
ऽवर्चसम् । च । अन्नम् । च । अन्नऽअद्यम् । च । यः । एतम् ।० ॥१॥ [२२]

भूतम् । च । भव्यम् । च । श्रद्धा । च । रुचिः । च । स्वःऽगः । च । स्वधा । च ॥२॥

यः । एतम् । देवम् । एकऽवृतम् । वेद ॥ ३ ॥

सः । एव । मृत्युः । सः । अमृतम् । सः । अभ्वम् । सः । रक्षः ॥ ४ ॥

XIII.4.18 Not eighth, nor ninth, also not tenth is said to be, who realizes this Lord as the only acceptable one.

XIII.4.19 He oversees all, that who breathes as well as that who breathes not. (Av. XIII.4.11. vari.)

XIII.4.20 This overpowering might goes into him. He, this one; the only one acceptable; the one alone. (Av. XIII.4.12)

XIII.4.21 Into him, all the enlightened ones become acceptors of one alone, whoever realizes this Lord as the only acceptable one. (See also Av. XIII.4.13. vari.)

PARYĀYA - III

XIII.4.22 Sacred knowledge and fervour, and glory and fame, and water and rain, and intellectual brilliance, and food and the edibles (he gets). (See also Av. XIII.4.14)

XIII.4.23 Past and present and future, and faith, and beauty and heaven and sustainance (he gets).

XIII.4.24 Who realizes this Lord as the only acceptable one. (See also Av. XIII.4.15)

XIII.4.25 He himself is death. He (is) the immortality; He (is) the horror; He (is) the saviour.

स रुद्रो वसुवनिर्वसुदेये नमोवाके वषट्कारोनु संहितः ॥५॥ -[२६]
तस्येमे सर्वे यातव उप प्रशिषमासते ॥६॥ -[२७]
तस्यामू सर्वा नक्षत्रा वशे चन्द्रमसा सह ॥७॥ -[२८]

सः । रुद्रः । वसुऽवनिः[१] । वसुऽदेये । नमःऽवाके । वषट्ऽकारः । अनु । समऽहितः ॥५॥

तस्य । इमे । सर्वे । यातवः । उप । प्रऽशिषम्[२] । आसते ॥ ६ ॥

तस्य । अमू । सर्वा । नक्षत्रा । वशे । चन्द्रमसा । सह ॥ ७ ॥

[४] चतुर्थः पर्यायः

(१-१७) सप्तदशर्चस्यास्य पर्यायस्य (१, ५, ११-१२, १७) प्रथमापञ्चम्येकादशीद्वादशीसप्तदशीनामृचामासुरी गायत्री, (२, ४, ७-८, १४) द्वितीयाचतुर्थीसप्तम्यष्टमीचतुर्दशीनां प्राजापत्यानुष्टुप्, (३) तृतीयाया विराड्गायत्री, (६, ९-१०) षष्ठीनवमीदशमीनां साम्न्युष्णिक्, (१३) त्रयोदश्याः साम्नी बृहती, (१५) पञ्चदश्या आर्षी गायत्री, (१६) षोडश्याश्च साम्न्यनुष्टुप् छन्दांसि ॥

स वा अह्नोजायत तस्मादहरजायत ॥१॥ -[२९]
स वै रात्र्या अजायत तस्माद्रात्रिरजायत ॥२॥ -[३०]
स वा अन्तरिक्षादजायत तस्मादन्तरिक्षमजायत ॥३॥ -[३१]
स वै वायोरजायत तस्माद्वायुरजायत ॥४॥ -[३२]
स वै दिवोऽजायत तस्माद्द्यौरध्यजायत ॥५॥ -[३३]
स वै दिग्भ्योऽजायत तस्माद्दिशोऽजायन्त ॥६॥ -[३४]

सः । वै । अह्नः । अजायत । तस्मात् । अहः । अजायत ॥ १ ॥

सः । वै । रात्र्याः । अजायत । तस्मात् । रात्रिः । अजायत ॥ २ ॥

सः । वै । अन्तरिक्षात् । अजायत । तस्मात् । अन्तरिक्षम् । अजायत ॥ ३ ॥

सः । वै । वायोः । अजायत । तस्मात् । वायुः । अजायत ॥ ४ ॥

सः । वै । दिवः । अजायत । तस्मात् । द्यौः । अधि । अजायत ॥ ५ ॥

सः । वै । दिक्ऽभ्यः । अजायत । तस्मात् । दिशः । अजायन्त ॥ ६ ॥

XIII.4.26 He (is) the vital breath, bestower of wealth at the bestowal of wealth; at the expression of homage. He is the utterance of vaṣaṭ dully pronounced.

XIII.4.27 All these causes of pains and tortures strictly obey His command.

XIII.4.28 All these stars, along with the moon, are under His control.

PARYĀYA - IV

XIII.4.29 He, indeed, is born of the day; the day is born of him.

XIII.4.30 He, indeed, is born of the night; the night is born of him.

XIII.4.31 He, indeed, is born of the midspace; the midspace is born of him.

XIII.4.32 He, indeed, is born of the elemental wind; the elemental wind is born of him.

XIII.4.33 He, indeed, is born of the heaven; the heaven is born of him.

XIII.4.34 He, indeed, is born of the quarters; the quarters are born of him.

स वै भूमेरजायत तस्माद्भूमिरजायत ॥७॥ -[३५]
स वा अग्नेरजायत तस्मादग्निरजायत ॥८॥ -[३६]
स वा अद्भ्योऽजायत तस्मादापोऽजायन्त ॥९॥ -[३७]
स वा ऋग्भ्योऽजायत तस्मादृचोऽजायन्त ॥१०॥ -[३८]
स वै यज्ञादजायत तस्माद्यज्ञोऽजायत ॥११॥ -[३९]
स यज्ञस्तस्य यज्ञः स यज्ञस्य शिरस्कृतम् ॥१२॥ -[४०]
स स्तनयति स वि द्योतते स उ अश्मानमस्यति ॥१३॥ -[४१]
पापाय वा भद्राय वा पुरुषायासुराय वा ॥१४॥ -[४२]
यद्वा कृणोष्योषधीर्यद्वा वर्षसि भद्रया यद्वा जन्यमवीवृधः ॥१५॥ -[४३]

सः । वै । भूमेः । अजायत । तस्मात् । भूमिः । अजायत ॥ ७ ॥

सः । वै । अग्नेः । अजायत । तस्मात् । अग्निः । अजायत ॥ ८ ॥

सः । वै । अत्ऽभ्यः । अजायत । तस्मात् । आपः । अजायन्त ॥ ९ ॥

सः । वै । ऋक्ऽभ्यः । अजायत । तस्मात् । ऋचः । अजायन्त ॥ १० ॥

सः । वै । यज्ञात् । अजायत । तस्मात् । यज्ञः । अजायत ॥ ११ ॥

सः । यज्ञः । तस्य । यज्ञः । सः । यज्ञस्य । शिरः । कृतम् ॥ १२ ॥

सः । स्तनयति । सः । वि । द्योतते । सः । ऊं इति । अश्मानम् । अस्यति ॥ १३ ॥

पापाय । वा । भद्राय । वा । पुरुषाय । असुराय । वा ॥ १४ ॥

यत् । वा । कृणोषि । ओषधीः । यत् । वा । वर्षसि । भद्रया । यत् । वा । जन्यम् । अवीवृधः ॥

XIII.4.35 He, indeed, is born of the earth; the earth is born of him.

XIII.4.36 He, indeed, is born of the elemental fire; the elemental fire is born of him.

XIII.4.37 He, indeed, is born of the elemental waters; the elemental waters are born of him.

XIII.4.38 He, indeed, is born of Ṛk. verses; Ṛk verses are born of him.

XIII.4.39 He, indeed, is born of the sacrifice; the sacrifice is born of him.

XIII.4.40 He is the sacrifice; the sacrifice is his; he has been made the head of the sacrifice (as if).

XIII.4.41 He thunders (as cloud); he shines bright (as lightning); also, he hurls the hail stone.

XIII.4.42 For the evil or for the good, for man or for the spoder of life.

XIII.4.43 When you form the herbs, or when you send a beneficial rain, or when you make the people, grow.

तावाँस्ते मघवन्महिमोपो ते तन्वः शतम् ॥१६॥ -[४४]
उपो ते बध्वे बद्धानि यदि वासि न्यर्बुदम् ॥१७॥ -[४५]

तावान् । ते । मघऽवन् । महिमा । उपो इति । ते । तन्वः । शतम् ॥ १६ ॥
उपो इति । ते । 'बद्धे । बद्धानि' । यदि । वा । आसि । निऽअर्बुदम् ॥ १७ ॥

[५] पञ्चमः पर्यायः

(१-६) षड्ऋचस्यास्य पर्यायस्य (१) प्रथमर्च आसुरी गायत्री, (२) द्वितीयाया यवमध्या गायत्री, (३) तृतीयायाः साम्न्युष्णिक्, (४) चतुर्थ्या निचृत्साम्नी बृहती, (५) पञ्चम्याः प्राजापत्यानुष्टुप्, (६) षष्ठ्याश्च विराड्गायत्री छन्दांसि ॥

भूयानिन्द्रो नमुराद्भूयानिन्द्रासि मृत्युभ्यः ॥१॥ -[४६]
भूयानरात्याः शच्याः पतिस्त्वमिन्द्रासि विभूः प्रभूरिति त्वोपास्महे वयम् ॥२॥ -[४७]
नमस्ते अस्तु पश्यत पश्य मा पश्यत ॥३॥ -[४८]
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥४॥ -[४९]
अम्भो अमो महः सह इति त्वोपास्महे वयम् ।
नमस्ते अस्तु पश्यत पश्य मा पश्यत ।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥५॥ -[५०]
अम्भो अरुणं रजतं रजः सह इति त्वोपास्महे वयम् ।
नमस्ते अस्तु पश्यत पश्य मा पश्यत ।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥६॥ -[५१]

भूयान् । इन्द्रः । नमुरात् । भूयान् । इन्द्र । असि । मृत्युऽभ्यः ॥ १ ॥
भूयान् । अरात्याः । शच्याः । पतिः । त्वम् । इन्द्र । असि । विऽभूः । प्रऽभूः । इति । त्वा । उप । आस्महे । वयम् ॥ २ ॥ [४७]
नमः । ते । अस्तु । पश्यत । पश्य । मा । पश्यत ॥ ३ ॥
अन्नऽअद्येन । यशसा । तेजसा । ब्राह्मणऽवर्चसेन ॥ ४ ॥
अम्भः । अमः । महः । सहः । इति । ० ॥ ५ ॥
अम्भः । अरुणम् । रजतम् । रजः । सहः । इति ।० ॥ ६ ॥

XIII.4.44 O bountiful Lord, that much is your grandeur; all these are your a hundred manifestations.

XIII.4.45 All these are tied to your ten million forms; or you yourself are a hundred million.

PARYĀYA V

XIII.4.46 Mightier than the non-dying is the resplendent Lord, O resplendent Lord, you are mightier than deaths.

XIII.4.47 Mightier than the niggardness, you are the Lord of strength (activity), O resplendent Lord, we worship you as pervading, as overlording.

XIII.4.48 Homage be to you, O beholder; behold me, O beholder;

XIII.4.49 With edible food, with fame, with radiance with intellectual brilliance.

XIII.4.50 We worship you as fruit-fullness, as strength, as might, as over powering force. Homage be to you, O beholder; behold me, O beholder, with intellectual brilliance.

XIII.4.51 We worship you as ruddy strength, as silvery emotion and as overpowering force. Homage be to you, O beholder; behold me, O beholder, with edible food, with fame, with radiance, and with intellectual brilliance.

(६) षष्ठः पर्यायः

(१-५) पञ्चर्चस्यास्य पर्यायस्य (१-२) प्रथमाद्वितीययोर्ऋचोः प्राजापत्यानुष्टुप्, (३) तृतीयाया द्विपदार्षी गायत्री, [(४) चतुर्थ्याः साम्न्युष्णिक्, (५) पञ्चम्याश्च निचृत्साम्नी बृहती] छन्दांसि ॥

उरुः पृथुः सुभूर्भुव इति त्वोपास्महे वयम्।
नमस्ते अस्तु पश्यत पश्य मा पश्यत।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥१॥ -[५२]
प्रथो वरो व्यचो लोक इति त्वोपास्महे वयम्।
नमस्ते अस्तु पश्यत पश्य मा पश्यत।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥२॥ -[५३]
भवद्वसुरिदद्वसुः संयद्वसुरायद्वसुरिति त्वोपास्महे वयम् ॥३॥ -[५४]
नमस्ते अस्तु पश्यत पश्य मा पश्यत ॥४॥ -[५५]
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥५॥ -[५६]

उरुः। पृथुः। सुऽभूः। भुवः। इति।० ॥ १ ॥

प्रथः। वरः। व्यचः। लोकः। इति।० ॥ २ ॥

भवत्ऽवसुः। इदत्ऽवसुः। संयत्ऽवसुः। आयत्ऽवसुः। इति। त्वा। उप। आस्महे। वयम् ॥

नमः। ते। अस्तु। पश्यत। पश्य। मा। पश्यत ॥ ४ ॥

अन्नऽअद्येन। यशसा। तेजसा। ब्राह्मणऽवर्चसेन ॥ ५ ॥

॥ इति त्रयोदशं काण्डम् ॥

[त्रयोदशकाण्डे सूक्तानि ४, ऋचः १८८]

PARYĀYA - VI

XIII.4.52 We worship you as excellent, huge, happy, and becoming. Homage be to you, O beholder; behold me, O beholder, with edible food, with fame, with radiance and with intellectual brilliance.

XIII.4.53 We worship you as vast, the cest, pervading, and the overlooker. Homage be to you, O beholder; behold me, O beholder with edible food, with fame, with radiance and with intellectual brilliance.

XIII.4.54 We worship you as becoming wealth, as wealth of this and that sort, as the controller of wealth and as the bringer of wealth.

XIII.4 55 Homage be to you, O beholder; behold me, O beholder. (See also Av. XIII.4.48)

XIII.4.56 With edible food, with fame, with radiance and with intellectual brilliance. (See also Av. XIII.4.49)

Here ends Kāṇḍa XIII

Hymns 4, Verses 188

Kāṇḍa - XIV

चतुर्दशं काण्डम्

अथ चतुर्दशं काण्डम् ॥

(१) प्रथमं सूक्तम्

(१–६४) चतुःषष्ट्यृचस्यास्य सूक्तस्य सावित्री सूर्या ऋषिका । (१–५) प्रथमादिपञ्चर्चां सोमः, (६) षष्ठ्याः स्वविवाहः, (७–२२, २६, २८–६४) सप्तम्यादिषोडशानां षड्विंश्या अष्टाविंश्यादिसप्तत्रिंशतश्चात्मा, (२३) त्रयोविंश्याः सोमार्कौ, (२४) चतुर्विंश्याश्चन्द्रमाः, (२५) पञ्चविंश्या नृणां विवाहमन्त्राशिषो वधूवासःसंस्पर्शमोचनञ्च, (२७) सप्तविंश्याश्च वधूवासःसंस्पर्शमोचनं देवताः । (१–१३, १६–१८, २२, २५–२८, ३०, ३५–३६, ४१–४४, ५१–५२, ६२–६३) प्रथमादित्रयोदशानां षोडश्यादितृचस्य द्वाविंश्याः पञ्चविंश्यादिचतसृणां त्रिंशीपञ्चत्रिंशीषट्त्रिंशीनामेक-चत्वारिंश्यादिचतसृणामेकपञ्चाशीद्विपञ्चाशीद्विषष्टीत्रिषष्टीनाञ्चानुष्टुप्, (१४) चतुर्दश्या विराट् प्रस्तारपङ्क्तिः, (१५) पञ्चदश्या आस्तारपङ्क्तिः, (१९–२०, २४, ३२–३३, ३७, ३९–४०, ४७, ४९–५०, ५३, ५६–५७) एकोनविंशीविंशीचतुर्विंशीद्वात्रिंशीत्रयस्त्रिंशीसप्तत्रिंश्येकोनचत्वारिंशीचत्वारिंशीसप्तचत्वारिंश्ये-कोनपञ्चाशीपञ्चाशीत्रिपञ्चाशीषट्पञ्चाशीसप्तपञ्चाशीनां [(५८–५९, ६१) अष्टपञ्चाश्येकोनषष्ट्येकषष्टी-नाञ्च] त्रिष्टुप्, (२१, ४६) एकविंशीषट्चत्वारिंश्योर्जगती, (२३, ३१, ४५) त्रयोविंश्येकत्रिंशीपञ्च-चत्वारिंशीनां बृहतीगर्भा त्रिष्टुप्, (२९, ५५) एकोनत्रिंशीपञ्चपञ्चाश्योः पुरस्ताद्बृहती, (३४) चतुस्त्रिंश्याः प्रस्तारपङ्क्तिः, (३८) अष्टात्रिंश्याः पुरोबृहती त्रिपदा परोष्णिक्, [(४८) अष्ट-चत्वारिंश्याः पथ्यापङ्क्तिः], (५४, ६४) चतुष्पञ्चाशीचतुःषष्ट्योर्भुरिक्त्रिष्टुप्, (६०) षष्ट्याश्च परानुष्टुप्त्रिष्टुप् छन्दांसि ॥

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः ।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः ॥१॥
सोमेनादित्या बलिनः सोमेन पृथिवी मही ।
अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥२॥
सोमं मन्यते पपिवान्यत्संपिंषन्त्योषधिम् ।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति पार्थिवः ॥३॥

सत्येन । उत्तभिता । भूमिः । सूर्येण । उत्तभिता । द्यौः ।
ऋतेन । आदित्याः । तिष्ठन्ति । दिवि । सोमः । अधि । श्रितः ॥ १ ॥
सोमेन । आदित्याः । बलिनः । सोमेन । पृथिवी । मही ।
अथो इति । नक्षत्राणाम् । एषाम् । उपऽस्थे । सोमः । आऽहितः ॥ २ ॥
सोमम् । मन्यते । पपिऽवान् । यत् । सम्ऽपिंषन्ति । ओषधिम् ।
सोमम् । यम् । ब्रह्माणः । विदुः । न । तस्य । अश्नाति । पार्थिवः ॥ ३ ॥

Somaḥ

XIV.1.1 Earth is upheld by truth; heaven is upheld by the sun; the solar regions are supported by eternal laws; the elixir of divine love is supreme in heaven. (Ṛg. X.85.1)

XIV.1.2 By the elixir of divine love, the solar regions are strong; by the divine elixir, the earth is great; the divine elixir is stationed in the midst of all the constellations. (Ṛg. X.85.2)

XIV.1.3 He, who had drunk, thinks that the herb, which common men crush and grind, is the divine elixir; but which the sages know to be really the elixir, no one tastes that. (Ṛg. X.85.3)

यत्त्वा सोम प्रपिबन्ति तत आ प्यायसे पुनः ।
वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥४॥
आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः ।
ग्राव्णामिच्छृण्वन्तिष्ठसि न ते अश्नाति पार्थिवः ॥५॥
चित्तिरा उपबर्हणं चक्षुरा अभ्यञ्जनम् । द्यौर्भूमिः कोश आसीद्यदयात्सूर्या पतिम् ॥६॥
रैभ्यासीदनुदेयी नाराशंसी न्योचनी । सूर्याया भद्रमिद्वासो गाथयैति परिष्कृता ॥७॥
स्तोमा आसन्प्रतिधयः कुरीरं छन्द ओपशः ।
सूर्याया अश्विना वराग्निरासीत्पुरोगवः ॥८॥
सोमो वधूयुरभवदश्विनास्तामुभा वरा ।
सूर्यां यत्पत्ये शंसन्तीं मनसा सवितादधात् ॥९॥

यत् । त्वा । सोम । प्रऽपिबन्ति । ततः । आ । प्यायसे । पुनः ।
वायुः । सोमस्य । रक्षिता । समानाम् । मासः । आऽकृतिः ॥ ४ ॥

आच्छत्ऽविधानैः । गुपितः । बार्हतैः । सोम । रक्षितः ।
ग्राव्णाम् । इत् । शृण्वन् । तिष्ठसि । न । ते । अश्नाति । पार्थिवः ॥ ५ ॥

चित्तिः । आः । उपऽबर्हणम् । चक्षुः । आः । अभिऽअञ्जनम् ।
द्यौः । भूमिः । कोशः । आसीत् । यत् । अयात् । सूर्या । पतिम् ॥ ६ ॥

रैभी । आसीत् । अनुऽदेयी । नाराशंसी । निऽओचनी ।
सूर्यायाः । भद्रम् । इत् । वासः । गाथया । एति । परिष्कृता ॥ ७ ॥

स्तोमाः । आसन् । प्रतिऽधयः । कुरीरम् । छन्दः । ओपशः ।
सूर्यायाः । अश्विना । वरा । अग्निः । आसीत् । पुरःऽगवः ॥ ८ ॥

सोमः । वधूऽयुः । अभवत् । अश्विना । आस्ताम् । उभा । वरा ।
सूर्याम् । यत् । पत्यै । शंसन्तीम् । मनसा । सविता । अददात् ॥ ९ ॥

XIV.1.4 As they consume you, O virile factor (Soma), you then swell up again. The wind element is the protector of the virile factor. The month is the shape of the years. (Ṛg. X.85.5; Variation)

XIV.1.5 O divine elixir, you are concealed by means of coverings, and protected by the vast cosmic tunes known as Bṛhata Sāmans. You abide listening to the sounds of cosmic vibrations; no terrestrial being can taste you. (Ṛg. X.85.4)

Vivāh (marriage)

XIV.1.6 When Sun's daughter, the bride, goes to her husband, her loving mind becomes the pillow (of her couch), the eye becomes the collyrium; and heaven and earth become her chest of treasure. (Ṛg. X.85.7)

XIV.1.7 The rāibhī verse (verse praising the bride) was her bridal companion; the nārāśansi verse (verse praising the bride groom) was the guide to her home. The dress of the damsel of marriageable age was lovely of course. She goes forth adorned with gāthā (song). (Ṛg. X.85.6; Variation)

XIV.1.8 Hymns (the stomas) are the cross-bars (of the car); the kurīra metre is the thong of the whip; the twin divines are groomsmen of the bride and fire divine becomes leader of the procession. (Ṛg. X.85.8)

XIV.1.9 The young bachelor (Soma) desires to have a bride; the twin divines become the two groomsmen. The divine impeller (the Savitṛ, the Sun) gives away the bride, quite ripe in age, to the husband (Soma), with matured intelligence. (Ṛg. X.85.9)

मनो अस्या अन आसीद्द्यौरासीदुत च्छदिः ।
शुक्रावनड्वाहावास्तां यदयात्सूर्या पतिम् ॥१०॥
ऋक्सामाभ्यामभिहितौ गावौ ते सामनावैताम् ।
श्रोत्रे ते चक्रे आस्तां दिवि पन्थाश्चराचरः ॥११॥
शुची ते चक्रे यात्या व्यानो अक्ष आहतः ।
अनो मनस्मयं सूर्यारोहत्प्रयती पतिम् ॥१२॥
सूर्याया वहतुः प्रागात्सविता यमवासृजत् ।
मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यते ॥१३॥
यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।
क्वैकं चक्रं वामासीत्क्व देष्ट्राय तस्थथुः ॥१४॥
यदयातं शुभस्पती वरेयं सूर्यामुप ।
विश्वे देवा अनु तद्वामजानन्पुत्रः पितरमवृणीत पूषा ॥१५॥

मनः । अस्याः । अनः । आसीत् । द्यौः । आसीत् । उत । छदिः ।
शुक्रौ । अनड्वाहौ । आस्ताम् । यत् । अयात् । सूर्या । पतिम् ॥ १० ॥
ऋक्ऽसामाभ्याम् । अभिऽहितौ । गावौ । ते । सामनौ । ऐताम् ।
श्रोत्रे इति । ते । चक्रे इति । आस्ताम् । दिवि । पन्थाः । चराचरः ॥ ११ ॥
शुची इति । ते । चक्रे इति । यात्याः । विऽआनः । अक्षः । आऽहतः ।
अनः । मनस्मयम् । सूर्या । आ । अरोहत् । प्रऽयती । पतिम् ॥ १२ ॥
सूर्यायाः । वहतुः । प्र । अगात् । सविता । यम् । अवऽअसृजत् ।
मघासु । हन्यन्ते । गावः । फल्गुनीषु । वि । उह्यते ॥ १३ ॥
यत् । अश्विना । पृच्छमानौ । अयातम् । त्रिऽचक्रेण । वहतुम् । सूर्यायाः ।
क्व । एकम् । चक्रम् । वाम् । आसीत् । क्व । देष्ट्राय । तस्थथुः ॥ १४ ॥
यत् । अयातम् । शुभः । पती इति । वरेऽयम् । सूर्याम् । उप ।
विश्वे । देवाः । अनु । तत् । वाम् । अजानन् । पुत्रः । पितरम् । अवृणीत । पूषा ॥ १५ ॥

XIV.1.10 The bride goes to her husband's home, her mind is her chariot, and heaven is her covering; the two shining (orbs) (i.e., the sun and moon) are the oxen that draw it. (Ṛg. X.85.10)

XIV.1.11 These two oxen yoked by the Ṛk and the Sāman verses march with one pace; the two chariot wheels are your cars; the path of ease and comfort is in the heaven. (Ṛg. X.85.11 Variation nominal)

XIV.1.12 As she goes to her Lord, the pair of Sucī (the pure) becomes the swift-moving wheels. The wind is the fastened axle there; the bride mounts the chariot of the mind. (Ṛg. X.85.12)

XIV.1.13 The bridal procession of the damsel of marriageable age, bidden farewell by the (bride's) sire, goes forth. In the days of Māgha, the cows are driven; in the day of Phālguni the wedding takes place. (Ṛg. X.85.13)

XIV.1.14 O twins divine, when inquiring, you went to the nuptial procession of the damsel of marriageable age (Sūryā) by your three-wheeler (car), then where was one wheel of your car ? Where did you stand and wait for the direction ? (Ṛg. X.85.14)

XIV.1.15 O you two lords of benignancy, when you went to the damsel of the marriageable age, worthy of wooing, all the enlightened ones gave assent to you for that. The nourisher Lord (Pūṣā) chose ye like a son his father. (Ṛg. X.85.15; Variation)

द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः ।
अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः ॥१६॥
अर्यमणं यजामहे सुबन्धुं पतिवेदनम् ।
उर्वारुकमिव बन्धनात्प्रेतो मुञ्चामि नामुतः ॥१७॥
प्रेतो मुञ्चामि नामुतः सुबद्धाममुतस्करम् ।
यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति ॥१८॥
प्र त्वा मुञ्चामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवाः ।
ऋतस्य योनौ सुकृतस्य लोके स्योनं ते अस्तु सहसंभलायै ॥१९॥
भगस्त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।
गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥२०॥
इह प्रियं प्रजायै ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं१ सं स्पृशस्वाथ जिर्विर्विदथमा वदासि ॥२१॥

द्वे इति । ते । चक्रे इति । सूर्ये । ब्रह्माणः । ऋतुऽथा । विदुः ।
अथ । एकम् । चक्रम् । यत् । गुहा । तत् । अद्धातयः । इत् । विदुः ॥ १६ ॥

अर्यमणम् । यजामहे । सुऽबन्धुम् । पतिऽवेदनम् ।
उर्वारुकम्ऽइव । बन्धनात् । प्र । इतः । मुञ्चामि । न । अमुतः ॥ १७ ॥

प्र । इतः । मुञ्चामि । न । अमुतः । सुऽबद्धाम् । अमुतः । करम् ।
यथा । इयम् । इन्द्र । मीढ्वः । सुऽपुत्रा । सुऽभगा । असति ॥ १८ ॥

प्र । त्वा । मुञ्चामि । वरुणस्य । पाशात् । येन । त्वा । अबध्नात् । सविता । सुऽशेवाः ।
ऋतस्य । योनौ । सुऽकृतस्य । लोके । स्योनम् । ते । अस्तु । सहऽसंभलायै ॥ १९ ॥

भगः । त्वा । इतः । नयतु । हस्तऽगृह्य । अश्विना । त्वा । प्र । वहताम् । रथेन ।
गृहान् । गच्छ । गृहऽपत्नी । यथा । असः । वशिनी । त्वम् । विदथम् । आ । वदासि ॥२०॥

इह । प्रियम् । प्रऽजायै । ते । सम् । ऋध्यताम् । अस्मिन् । गृहे । गार्हऽपत्याय । जागृहि ।
एना । पत्या । तन्वम् । सम् । स्पृशस्व । अथ । जिर्विः । विदथम् । आ । वदासि ॥ २१ ॥

XIV.1.16 O bride, the learned persons in their season know your two chariot wheels (the sun and moon); the other third wheel (the year) which is concealed, is known to those wise only who are aware of the highest truth. (Ṛg. X.85.16)

XIV.1.17 We worship the eternal law-giver, a kind friend, a husband-finder. Like a melon from its stalk, from here I release you, not from there.

XIV.1.18 From here I release her completely, not from there. I make her bound securely at that place, so that, O bounteous resplendent Lord, she is blessed with good sons and nuptial bliss.

XIV.1.19 I release you completely from the venerable Lord's (Varuṇa) fetters, with which the propitious creator Lord had bound you. In the abode of the right and in the world of good deeds, may there be bliss for you along with your wooer. (Ṛg. X.85.24; Variation)

XIV.1.20 May the Lord of wealth and glory (Bhāga) conduct you from here grasping your hand; may the twin divine doctors (Aśvinau) transport you in their chariot.;go to the house, so that you may become the mistress of the house. Having control over all, speak amicably to the gathering.

XIV.1.21 May there be pleasing prosperity for your progeny here. Be alert and vigilant to household duties in this house. Closely united your person with this man, your husband. Then having reached the ripe old age, you will speak in the councils.

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वस्तकौ ॥२२॥
पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातोर्णवम् ।
विश्वान्यो भुवना विचष्ट ऋतूँरन्यो विदधज्जायसे नवः ॥२३॥
नवोनवो भवसि जायमानोह्नां केतुरुषसामेष्यग्रम् ।
भागं देवेभ्यो वि दधास्यायन्प्र चन्द्रमस्तिरसे दीर्घमायुः ॥२४॥
परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु ।
कृत्यैषा पद्वती भूत्वा जाया विशते पतिम् ॥२५॥
नीललोहितं भवति कृत्यासक्तिर्व्यज्यते ।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥२६॥
अश्लीला तनूर्भवति रुशती पापयामुया ।
पतिर्यद्वध्वो३ वाससः स्वमङ्गमभ्यूर्णुते ॥२७॥

इह । एव । स्तम् । मा । वि । यौष्टम् । विश्वम् । आयुः । वि । अश्नुतम् ।
क्रीडन्तौ । पुत्रैः । नप्तृऽभिः । मोदमानौ । सुऽअस्तकौ ॥ २२ ॥
पूर्वऽअपरम् । चरतः । मायया । एतौ । शिशू इति । क्रीडन्तौ । परि । यातः । अर्णवम् ।
विश्वा । अन्यः । भुवना । विऽचष्टे । ऋतून् । अन्यः । विऽदधत् । जायसे । नवः ॥ २३ ॥
नवःऽनवः । भवसि । जायमानः । अह्नाम् । केतुः । उषसाम् । एषि । अग्रम् ।
भागम् । देवेभ्यः । वि । दधासि । आऽयन् । प्र । चन्द्रमः । तिरसे । दीर्घम् । आयुः ॥ २४ ॥
परा । देहि । शामुल्यम् । ब्रह्मऽभ्यः । वि । भज । वसु ।
कृत्या । एषा । पत्ऽवती । भूत्वा । आ । जाया । विशते । पतिम् ॥ २५ ॥
नीलऽलोहितम् । भवति । कृत्या । आसक्तिः । वि । अज्यते ।
एधन्ते । अस्याः । ज्ञातयः । पतिः । बन्धेषु । बध्यते ॥ २६ ॥
अश्लीला । तनूः । भवति । रुशती । पापया । अमुया ।
पतिः । यत् । वध्वः । वाससः । स्वम् । अङ्गम् । अभिऽऊर्णुते ॥ २७ ॥

XIV.1.22 May both of you stay just here. May you not be seperated. May you enjoy the whole span of your life playing with children and grand-children, (of sons and daughters, both) rejoicing in your comfortable house. (Ṛg. X.85.42; Variation)

Somārkau

XIV.1.23 Moving one after the other by invisible force, these two playful children go up to the ocean. One of them oversees all the beings. You, the other one, are born anew making the seasons. (Ṛg. X.85.18; Variation)

Candramāḥ

XIV.1.24 Born afresh you are ever-new. A pennant of days, you go before dawns. You allot to the bounties of Nature their share as you come. You prolong our life-span, O delightful moon. (Ṛv. X.85.19 Variation)

Marriage Ceremonies

XIV.1.25 (O wife), put away the garment soiled by the body; give wealth to the learned priests. The Kṛttaipa, the feeling of uncertainty has become active; it has gone to the husband's heart as his wife. (Ṛg. X.85.29)

XIV.1.26 Blue and red becomes her form (married wife). The kṛtya (the uncertainty factor) clinging to her is left behind. May her kinsmen in husband's family prosper. The husband is bound fast in bonds of love. (Ṛg. X.85.28)

XIV.1.27 Coarse and vulgar becomes his body hurting with this malignity, if the husband wraps his member with the bride's garment. (Ṛg. X.85.30; Variation)

आशसनं विशसनमथो अधिविकर्तनम् ।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मोत शुम्भति ॥२८॥
तृष्टमेतत्कटुकमपाष्ठवद्विषवन्नैतदत्तवे ।
सूर्यां यो ब्रह्मा वेद स इद्वाधूयमर्हति ॥२९॥
स इत्तत्स्योनं हरति ब्रह्मा वासः सुमङ्गलम् ।
प्रायश्चित्तिं यो अध्येति येन जाया न रिष्यति ॥३०॥
युवं भगं सं भरतं समृद्धमृतं वदन्तावृतोद्येषु ।
ब्रह्मणस्पते पतिमस्यै रोचय चारु संभलो वदतु वाचमेताम् ॥३१॥
इहेदसाथ न परो गमाथेमं गावः प्रजया वर्धयाथ ।
शुभं यतीरुस्रियाः सोमवर्चसो विश्वे देवाः क्रन्निह वो मनांसि ॥३२॥
इमं गावः प्रजया सं विशाथायं देवानां न मिनाति भागम् ।
अस्मै वः पूषा मरुतश्च सर्वे अस्मै वो धाता सविता सुवाति ॥३३॥

आऽशसनम् । विऽशसनम् । अथो इति । अधिऽविकर्तनम् ।
सूर्यायाः । पश्य । रूपाणि । तानि । ब्रह्मा । उत । शुम्भति ॥ २८ ॥
तृष्टम् । एतत् । कटुकम् । अपाष्ठऽवत् । विषऽवत् । न । एतत् । अत्तवे ।
सूर्याम् । यः । ब्रह्मा । वेद । सः । इत् । वाधूऽयम् । अर्हति ॥ २९ ॥
सः । इत् । तत् । स्योनम् । हरति । ब्रह्मा । वासः । सुऽमङ्गलम् ।
प्रायश्चित्तिम् । यः । अधिऽएति । येन । जाया । न । रिष्यति ॥ ३० ॥
युवम् । भगम् । सम् । भरतम् । समऽऋद्धम् । ऋतम् । वदन्तौ । ऋतऽउद्येषु ।
ब्रह्मणः । पते । पतिम् । अस्यै । रोचय । चारु । समऽभलः । वदतु । वाचम् । एताम् ॥
इह । इत् । असाथ । न । परः । गमाथ । इमम् । गावः । प्रऽजया । वर्धयाथ ।
शुभम् । यतीः । उस्रियाः । सोमऽवर्चसः । विश्वे । देवाः । क्रन् । इह । वः । मनांसि ॥३२॥
इमम् । गावः । प्रऽजया । सम् । विशाथ । अयम् । देवानाम् । न । मिनाति । भागम् ।
अस्मै । वः । पूषा । मरुतः । च । सर्वे । अस्मै । वः । धाता । सविता । सुवाति ॥३३॥

XIV.1.28 Cutting up, cutting through, and also cutting to small pieces (the heart as if); look at the beauteous forms of the damsel of marriageable age. The wise one makes them splendid. (Ṛg. X.85.35; Variation)

XIV.1.29 This is thirst-causing, bitter, full of barbs, mixed with poison; it is not to be consumed. The wise man, who understands well the damsel of marriageable age, deserves indeed the bride's garment. (Ṛg. X.85.34; Variation)

XIV.1.30 Surely he, the learned and wise one (Brahman) takes that pleasing and auspicious robe, who studies the ways of atonement, so that the wife is never harmed.

XIV.1.31 May both of you accumulate rich wealth speaking right unto right - speaking persons. O Lord of sacred knowledge, make the husband dear and pleasant to her. Let the husband speak so sweetly to her.

XIV.1.32 May you remain just here. Do not go away. O cows,may you make him prosper with progeny. O cows, lustrous like moon, you bring good fortune. May all the bounties of nature endear this place to your hearts.

XIV.1.33 O cows, enter this house along with your progeny. This man does not diminish the allotted portion of enlightened ones. For him, may the nourisher Lord and the all the cloud-bearing winds, for him, may the sustainer and the inspirer Lord quicken you.

अनृक्षरा ऋजवः सन्तु पन्थानो येभिः सखायो यन्ति नो वरेयम् ।
सं भगेन समर्यम्णा सं धाता सृजतु वर्चसा ॥३४॥
यच्च वर्चो अक्षेषु सुरायां च यदाहितम् ।
यद्गोष्वश्विना वर्चस्तेनेमां वर्चसावतम् ॥३५॥
येन महानघ्न्या जघनमश्विना येन वा सुरा ।
येनाक्षा अभ्यषिच्यन्त तेनेमां वर्चसावतम् ॥३६॥
यो अनिध्मो दीदयदप्स्व१न्तर्यं विप्रास ईडते अध्वरेषु ।
अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्यावान् ॥३७॥
इदमहं रुशन्तं ग्राभं तनूदूषिमपोहामि । यो भद्रो रोचनस्तमुदचामि ॥३८॥
आस्यै ब्राह्मणाः स्नपनीर्हरन्त्ववीरघ्नीरुदजन्त्वापः ।
अर्यम्णो अग्निं पर्यैतु पूषन्प्रतीक्षन्ते श्वशुरो देवरश्च ॥३९॥

अनृक्षराः । ऋजवः । सन्तु । पन्थानः । येभिः । सखायः । यन्ति । नः । वरेऽयम् ।
सम् । भगेन । सम् । अर्यम्णा । सम् । धाता । सृजतु । वर्चसा ॥ ३४ ॥

यत् । च । वर्चः । अक्षेषु । सुरायाम् । च । यत् । आऽहितम् ।
यत् । गोषु । अश्विना । वर्चः । तेन । इमाम् । वर्चसा । अवतम् ॥ ३५ ॥

येन । महाऽनघ्न्याः । जघनम् । अश्विना । येन । वा । सुरा ।
येन । अक्षाः । अभिऽअसिच्यन्त । तेन । इमाम् । वर्चसा । अवतम् ॥ ३६ ॥

यः । अनिध्मः । दीदयत् । अप्ऽसु । अन्तः । यम । विप्रासः । ईडते । अध्वरेषु ।
अपाम् । नपात् । मधुऽमतीः । अपः । दाः । याभिः । इन्द्रः । ववृधे । वीर्यऽवान् ॥३७॥

इदम् । अहम् । रुशन्तम् । ग्राभम् । तनूऽदूषिम् । अप । ऊहामि ।
यः । भद्रः । रोचनः । तम् । उत् । अचामि ॥ ३८ ॥

आ । अस्यै । ब्राह्मणाः । स्नपनीः । हरन्तु । अवीरऽघ्नीः । उत् । अजन्तु । आपः ।
अर्यम्णः । अग्निम् । परि । एतु । पूषन् । प्रति । ईक्षन्ते । श्वशुरः । देवरः । च ॥ ३९ ॥

XIV.1.34 May the pathways, by which our friends travel for wooing, be free from thorns and straight. May the sustainer Lord along with the Lord of good fortune and with Ordainer Lord invest (this couple) with lustre. (Ṛg. X.85.23; Variation)

XIV.1.35 What attractiveness is there in dice and what attractiveness is there in wine, what attractiveness is there in kine, with that attractiveness, O twins divine, may you invest this maiden.

XIV.1.36 The attractiveness, with which the thighs of a stark naked lady are endowed, or with which the wine (is endowed); with which dice have been sprinkled, with that attractiveness, may you invest this maiden.

XIV.1.37 O child of the waters (i.e., the fire), may you, who shine within the waters without any fuel, and whom the wise ones praise at the sacrifices, give us waters rich in sweetness, with which the resplendent one grows mighty.

XIV.1.38 Now I throw away the injurious (waters), causing seizure and spoiling the body. What is good and sparkling, that (water), I take up.

XIV.1.39 Let the learned ones bring bathing water for this maiden. Let her go around the fire of the eternal law-giver. O nourisher Lord, father-in-law and the brother-in-law are waiting for her.

शं ते हिरण्यं शमु सन्त्वापः शं मेथिर्भवतु शं युगस्य तर्द्म ।
शं त आपः शतपवित्रा भवन्तु शमु पत्या तन्वं सं स्पृशस्व ॥४०॥

खे रथस्य खेनसः खे युगस्य शतक्रतो ।
अपालामिन्द्र त्रिष्पूत्वाकृणोः सूर्यत्वचम् ॥४१॥
आशासाना सौमनसं प्रजां सौभाग्यं रयिम् ।
पत्युरनुव्रता भूत्वा सं नह्यस्वामृताय कम् ॥४२॥
यथा सिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा ।
एवा त्वं सम्राज्ञ्येधि पत्युरस्तं परेत्य ॥४३॥
सम्राज्ञ्येधि श्वशुरेषु सम्राज्ञ्युत देवृषु ।
ननान्दुः सम्राज्ञ्येधि सम्राज्ञ्युत श्वश्र्वाः ॥४४॥

या अकृन्तन्नवयन्याश्च तत्निरे या देवीरन्ताँ अभितोददन्त ।
तास्त्वा जरसे सं व्ययन्त्वायुष्मतीदं परि धत्स्व वासः ॥४५॥

शम् । ते । हिरण्यम् । शम् । ऊँ इति । सन्तु । आपः । शम् । मेथिः । भवतु । शम् ।
युगस्य । तर्द्म । शम् । ते । आपः । शतऽपवित्राः । भवन्तु । शम् । ऊँ इति । पत्या ।
तन्वम् । सम् । स्पृशस्व ॥ ४० ॥

खे । रथस्य । खे । अनसः । खे । युगस्य । शतक्रतो इति शतऽक्रतो ।
अपालाम् । इन्द्र । त्रिः । पूत्वा । अकृणोः । सूर्यऽत्वचम् ॥ ४१ ॥

आऽशासाना । सौमनसम् । प्रऽजाम् । सौभाग्यम् । रयिम् ।
पत्युः । अनुऽव्रता । भूत्वा । सम् । नह्यस्व । अमृताय । कम् ॥ ४२ ॥

यथा । सिन्धुः । नदीनाम् । साम्ऽराज्यम् । सुसुवे । वृषा ।
एव । त्वम् । सम्ऽराज्ञी । एधि । पत्युः । अस्तम् । पराऽइत्य ॥ ४३ ॥

सम्ऽराज्ञी । एधि । श्वशुरेषु । सम्ऽराज्ञी । उत । देवृषु ।
ननान्दुः । सम्ऽराज्ञी । एधि । सम्ऽराज्ञी । उत । श्वश्र्वाः ॥ ४४ ॥

याः । अकृन्तन् । अवयन् । याः । च । तत्निरे । याः । देवीः । अन्तान् । अभितः । अददन्त ।
ताः । त्वा । जरसे । सम् । व्ययन्तु । आयुष्मती । इदम् । परि । धत्स्व । वासः ॥ ४५ ॥

XIV.1.40 May the gold be auspicious to you; auspicious be waters; auspicious be the central pillar; auspicious be the perforation of the yoke; may the waters, cleansing in a hundred ways, be auspicious to you. May you closely unite your person with your husband in happiness.

XIV.1.41 Thrice, the resplendent Lord, the selfless worker of hundreds of deeds, cleansed the sinning woman, first having dragged her through the hole of a chariot (i.e., body physically cleaned); then she has been passed through the hole of a cart, (i.e., her vital breathing complex cleaned) and lastly from the hole of the yoke (i.e., spiritually cleaned by the system of the Yoga). Her skin thus finally becomes resplendent like the sun. (Ṛg. VIII.91.7)

XIV.1.42 Desiring friendliness (affection), offspring, marital bliss, and wealth, being devoted to your husband, prepare yourself for immortal happiness.

XIV.1.43 Just as mighty sindhu (river) has won supremacy of the streams, so going to your husband's house, may you prosper as a queen supreme.

XIV.1.44 May you prosper as a queen supreme among your father-in-law, and also queen supreme among your brothers-in-law. Be a queen to your sister-in-law, and also a queen to your mother-in-law.

XIV.1.45 The divinities that have spun, woven and that have stretched (the wrap), the divinities that have drawn the ends on all sides, may they weave you nicely upto ripe old age. Enjoying a good long life, endue this garment.

जीवं रुदन्ति वि नयन्त्यध्वरं दीर्घामनु प्रसितिं दीध्युर्नरः ।
वामं पितृभ्यो य इदं समीरिरे मयः पतिभ्यो जनये परिष्वजे ॥४६॥
स्योनं ध्रुवं प्रजायै धारयामि तेश्मानं देव्याः पृथिव्या उपस्थे ।
तमा तिष्ठानुमाद्या सुवर्चा दीर्घं त आयुः सविता कृणोतु ॥४७॥
येनाग्निरस्या भूम्या हस्तं जग्राह दक्षिणम् ।
तेन गृह्णामि ते हस्तं मा व्यथिष्ठा मया सह प्रजया च धनेन च ॥४८॥
देवस्ते सविता हस्तं गृह्णातु सोमो राजा सुप्रजसं कृणोतु ।
अग्निः सुभगां जातवेदाः पत्ये पत्नीं जरदष्टिं कृणोतु ॥४९॥
गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥५०॥
भगस्ते हस्तमग्रहीत्सविता हस्तमग्रहीत् ।
पत्नी त्वमसि धर्मणाहं गृहपतिस्तव ॥५१॥

जीवम् । रुदन्ति । वि । नयन्ति । अध्वरम् । दीर्घाम् । अनु । प्रऽसितिम् । दीध्युः । नरः ।
वामम् । पितृऽभ्यः । ये । इदम् । सम्ऽईरिरे । मयः । पतिऽभ्यः । जनये । परिऽस्वजे ॥ ४६ ॥
स्योनम् । ध्रुवम् । प्रऽजायै । धारयामि । ते । अश्मानम् । देव्याः । पृथिव्याः । उपऽस्थे ।
तम् । आ । तिष्ठ । अनुऽमाद्या । सुऽवर्चाः । दीर्घम् । ते । आयुः । सविता । कृणोतु ॥४७॥
येन । अग्निः । अस्याः । भूम्याः । हस्तम् । जग्राह । दक्षिणम् ।
तेन । गृह्णामि । ते । हस्तम् । मा । व्यथिष्ठाः । मया । सह । प्रऽजया । च । धनेन । च ॥४८॥
देवः । ते । सविता । हस्तम् । गृह्णातु । सोमः । राजा । सुऽप्रजसम् । कृणोतु ।
अग्निः । सुऽभगाम् । जातऽवेदाः । पत्ये । पत्नीम् । जरत्ऽअष्टिम् । कृणोतु ॥ ४९ ॥
गृह्णामि । ते । सौभगऽत्वाय । हस्तम् । मया । पत्या । जरत्ऽअष्टिः । यथा । असः ।
भगः । अर्यमा । सविता । पुरम्ऽधिः । मह्यम् । त्वा । अदुः । गार्हऽपत्याय । देवाः ॥ ५० ॥
भगः । ते । हस्तम् । अग्रहीत् । सविता । हस्तम् । अग्रहीत् ।
पत्नी । त्वम् । असि । धर्मणा । अहम् । गृहऽपतिः । तव ॥ ५१ ॥

XIV.1.46 There are men, who grieve for the life (of their wives lying seriously ill), and get them admitted to sacred places for treatment. In the prayful mood, they wish them a long life and hold them in their embraces; they ask their elders to pray for recovery. Upon such husbands, the wives bestow their love and long for their embraces. (Ṛg. X.40.10; Variation nominal)

XIV.1.47 In the lap of the earth divine, I hold this auspicious stone firmly for your offsprings. Stand upon it, delighted and lustrous. May the creator Lord make your life span long.

XIV.1.48 Whereby the adorable Lord (Agni) grasped the right hand of this earth, thereby I grasp your hand. May you not be anguished living with me with children and with wealth.

XIV.1.49 May the creator Lord take hold of your hand. May the blissful Lord, the sovereign, bless you with good offspring. May the adorable Lord, cognizant of all, make the wife full of marital bliss for the husband till old age.

XIV.1.50 I accept your hand for good fortune, that you attain old age with me as your husband. Our Lord of grace, cosmic orders, creation and wisdom, has given you to me that I may be the master of a household. (Ṛg X.85.36; Variation nominal)

XIV.1.51 The Lord of good fortune (Bhaga) has taken hold of your hand; the creator Lord has taken hold of your hand. You are the wife by established law and (by established law) I am your house-holder (husband).

ममेयमस्तु पोष्या मह्यं त्वादाद्बृहस्पतिः ।
मया पत्या प्रजावति सं जीव शरदः शतम् ॥५२॥
त्वष्टा वासो व्यदधाच्छुभे कं बृहस्पतेः प्रशिषा कवीनाम् ।
तेनेमां नारीं सविता भगश्च सूर्यामिव परि धत्तां प्रजया ॥५३॥
इन्द्राग्नी द्यावापृथिवी मातरिश्वा मित्रावरुणा भगो अश्विनोभा ।
बृहस्पतिर्मरुतो ब्रह्म सोम इमां नारीं प्रजया वर्धयन्तु ॥५४॥
बृहस्पतिः प्रथमः सूर्यायाः शीर्षे केशाँ अकल्पयत् ।
तेनेमामश्विना नारीं पत्ये सं शोभयामसि ॥५५॥
इदं तद्रूपं यदवस्त योषा जायां जिज्ञासे मनसा चरन्तीम् ।
तामन्वर्तिष्ये सखिभिर्नवग्वैः क इमान्विद्वान्वि चचर्त पाशान् ॥५६॥
अहं वि ष्यामि मयि रूपमस्या वेददित्पश्यन्मनसः कुलायम् ।
न स्तेयमद्मि मनसोदमुच्ये स्वयं श्रथ्नानो वरुणस्य पाशान् ॥५७॥

मम । इयम् । अस्तु । पोष्या । मह्यम् । त्वा । अदात् । बृहस्पतिः ।
मया । पत्या । प्रजाऽवति । सम् । जीव । शरदः । शतम् ॥ ५२ ॥
त्वष्टा । वासः । वि । अदधात् । शुभे । कम् । बृहस्पतेः । प्रऽशिषा । कवीनाम् ।
तेन । इमाम् । नारीम् । सविता । भगः । च । सूर्याम्ऽइव । परि । धत्ताम् । प्रऽजया ॥५३॥
इन्द्राग्नी इति । द्यावापृथिवी इति । मातरिश्वा । मित्रावरुणा । भगः । अश्विना । उभा ।
बृहस्पतिः । मरुतः । ब्रह्म । सोमः । इमाम् । नारीम् । प्रऽजया । वर्धयन्तु ॥ ५४ ॥
बृहस्पतिः । प्रथमः । सूर्यायाः । शीर्षे । केशान् । अकल्पयत् ।
तेन । इमाम् । अश्विना । नारीम् । पत्ये । सम् । शोभयामसि ॥ ५५ ॥
इदम् । तत् । रूपम । यत् । अवस्त । योषा । जायाम् । जिज्ञासे । मनसा । चरन्तीम् ।
ताम् । अनु । अर्तिष्ये । सखिऽभिः । नवऽग्वैः । कः । इमान् । विद्वान् । वि । चचर्त । पाशान् ॥
अहम् । वि । स्यामि । मयि । रूपम् । अस्याः । वेदत् । इत् । पश्यन् । मनसः । कुलायम् ।
न । स्तेयम् । अद्मि । मनसा । उत् । अमुच्ये । स्वयम् । श्रथ्नानः । वरुणस्य । पाशान् ॥ ५७ ॥

XIV.1.52 Let it be my care to nourish her. The Lord supreme has given you to me. May you, blessed with children, live with me, your husband, through a hundred autumns.

XIV.1.53 The cosmic Architect (Tvaṣṭṛ) has made the garment for her weal and happiness by the direction of the Lord supreme and the sages. May the creator Lord and the Lord of good fortune endure this woman with this garment, as they endure a marriable maid with progeny.

XIV.1.54 May the Lord resplendent and adorable, the heaven and earth, the wind of the midspace, the Lord of good fortune, and both the twin physicians, the Lord supreme, the cloud-bearing winds, the Lord of sacred knowledge, and the blissful Lord, make this woman prosper with offsprings.

XIV.1.55 First of all, the Lord supreme arrange the hair on the head of a maiden of marriageable age. Thereby, O twins divine, we adorn beautifully this woman for her husband.

XIV.1.56 This is the beauty with which the young maiden is invested. I am curious to know how her mind moves. I shall follow her with my companions ninefold (navagva). Who is the learned one, that has untied these fetters ?

XIV.1.57 I reflect her beauty in myself. Watching her, the nest of my mind, I have come to know. I shall not eat stealthily. Unloosening the fetters of the venerable Lord, I free myself in mind.

प्र त्वा मुञ्चामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवाः ।
उरुं लोकं सुगमत्र पन्थां कृणोमि तुभ्यं सहपत्न्यै वधु ॥५८॥
उद्यच्छध्वमप रक्षो हनाथेमां नारीं सुकृते दधात ।
धाता विपश्चित्पतिमस्यै विवेद भगो राजा पुर एतु प्रजानन् ॥५९॥
भगस्ततक्ष चतुरः पादान्भगस्ततक्ष चत्वार्युष्पलानि ।
त्वष्टा पिपेश मध्यतोनु वर्ध्रान्त्सा नो अस्तु सुमङ्गली ॥६०॥
सुकिंशुकं वहतुं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।
आ रोह सूर्ये अमृतस्य लोकं स्योनं पतिभ्यो वहतुं कृणु त्वम् ॥६१॥
अभ्रातृघ्नीं वरुणापशुघ्नीं बृहस्पते ।
इन्द्रापतिघ्नीं पुत्रिणीमास्मभ्यं सवितर्वह ॥६२॥
मा हिंसिष्टं कुमार्यं स्थूणे देवकृते पथि ।
शालाया देव्या द्वारं स्योनं कृण्मो वधूपथम् ॥६३॥

प्र । त्वा । मुञ्चामि । वरुणस्य । पाशात् । येन । त्वा । अबध्नात् । सविता । सुऽशेवाः ।
उरुम् । लोकम् । सुऽगम् । अत्र । पन्थाम् । कृणोमि । तुभ्यम् । सहऽपत्न्यै । वधु ॥ ५८ ॥
उत् । यच्छध्वम् । अप । रक्षः । हनाथ । इमाम् । नारीम् । सुऽकृते । दधात ।
धाता । विपःऽचित् । पतिम् । अस्यै । विवेद । भगः । राजा । पुरः । एतु । प्रऽजानन् ॥ ५९ ॥
भगः । ततक्ष । चतुरः । पादान् । भगः । ततक्ष । चत्वारि । उष्पलानि ।
त्वष्टा । पिपेश । मध्यतः । अनु । वर्ध्रान् । सा । नः । अस्तु । सुऽमङ्गली ॥ ६० ॥
सुऽकिंशुकम् । वहतुम् । विश्वऽरूपम् । हिरण्यऽवर्णम् । सुऽवृतम् । सुऽचक्रम् ।
आ । रोह । सूर्ये । अमृतस्य । लोकम् । स्योनम् । पतिऽभ्यः । वहतुम् । कृणु । त्वम् ॥६१॥
अभ्रातृऽघ्नीम् । वरुण । अपशुऽघ्नीम् । बृहस्पते ।
इन्द्र । अपतिऽघ्नीम् । पुत्रिणीम् । आ । अस्मभ्यम् । सवितः । वह ॥ ६२ ॥
मा । हिंसिष्टम् । कुमार्यम् । स्थूणे इति । देवऽकृते । पथि ।
शालायाः । देव्याः । द्वारम् । स्योनम् । कृण्मः । वधूऽपथम् ॥ ६३ ॥

XIV.1.58 I release you completely from the venerable Lord's (Varuṇa's) fetters, with which the propitious creator Lord had bound you. O bride, plenty of accommodation and an easy approach, I make for you along with your husband. (Av. XIV.1.19; Variation)

XIV.1.59 Raise your weapons up; smite away the destroyers of life. Set this woman in the world of virtue. The wise sustainer Lord has found a husband for her. May the Lord of good fortune, the foreknowing sovereign, lead her in front.

XIV.1.60 The Lord of good fortune (Bhaga) has fashioned the four feet (of the litter); the Lord of good fortune has wrought the four pieces (of the frame). The cosmic architect (Tvaṣṭṛ) has adorned the straps in the middle. May she be very auspicious for us.

XIV.1.61 O maiden of marriageable age (Sūrya), mount this chariot, decked with beautiful flowers, painted in all the hues, golden-coloured, strong wheeled and rolling smoothly, which is like the abode of immortality. Make this chariot comfortable for your husband.

XIV.1.62 O venerable Lord, bring her, unharming the brothers; O Lord supreme, bring her unharming the cattle; O resplendent Lord, bring her unharming the husband; O creator Lord, bring her blessed with children to us.

XIV.1.63 O two pillars, may you not hurt the maiden, traversing the path laid by the enlightened ones. We make the door of the divine home a pleasant path for the bride.

ब्रह्मापरं युज्यतां ब्रह्म पूर्वं ब्रह्मान्ततो मध्यतो ब्रह्म सर्वतः ।
अनाव्याधां देवपुरां प्रपद्य शिवा स्योना पतिलोके वि राज ॥६४॥

ब्रह्म । अपरम् । युज्यताम् । ब्रह्म । पूर्वम् । ब्रह्म । अन्ततः । मध्यतः । ब्रह्म । सर्वतः ।
अनाव्याधाम् । देवऽपुराम् । प्रऽपद्य । शिवा । स्योना । पतिऽलोके । वि । राज ॥६४॥

(२) द्वितीयं सूक्तम्

(१-७५) पञ्चसप्तत्यृचस्यास्य सूक्तस्य सावित्री सूर्या ऋषिका । (१-९, १२-३५, ३७-७५) प्रथमादिनवर्चां द्वादश्यादिचतुर्विंशतेः सप्तत्रिंश्याद्येकोनचत्वारिंशतश्चात्मा, (१०) दशम्या यक्ष्मनाशनम्, (११) एकादश्या दम्पत्योः परिपन्थिनाशनम्, (३६) षट्त्रिंश्याश्च देवा देवताः । (१-४, ७-८, १०-११, १६, २१-२३, २७-३०, ४५-४६, ५३-५८, ६३-६७, ७२-७३) प्रथमादिचतसृणां सप्तम्यष्टमीदशम्येकादशीषोडशीनामेकविंश्यादितृचस्य सप्तविंश्यादिचतसृणां पञ्चचत्वारिंशीषट्चत्वारिंश्योस्त्रिपञ्चाश्यादितृचद्वयस्य त्रिषष्ट्यादिपञ्चानां द्विसप्ततितमात्रिसप्ततितमयोश्चानुष्टुप्, (५-६, १२, ३१, ४०) पञ्चमीषष्ठीद्वादश्येकत्रिंशीचत्वारिंशीनां जगती, (९) नवम्यास्त्र्यवसाना षट्पदा विराडत्यष्टिः, (१३-१४, १७-१९, ४१-४२, ४९, ६१, ७०, ७४-७५) त्रयोदशीचतुर्दश्योः सप्तदश्यादितृचस्यैकचत्वारिंशीद्विचत्वारिंश्येकोनपञ्चाश्येकषष्टीसप्ततितमाचतुःसप्ततितमापञ्चसप्ततितमानां [(२४-२५, ३२, ३४, ३६, ३८) चतुर्विंशीपञ्चविंशीद्वात्रिंशीचतुस्त्रिंशीषट्त्रिंश्यष्टात्रिंशीनाञ्च] त्रिष्टुप्, (१५, ५१) पञ्चदश्येकपञ्चाश्योर्भुरिगनुष्टुप्, (२०) विंश्याः पुरस्ताद्बृहती, [(२६) षड्विंश्या विराडनुष्टुप्], (३३) त्रयस्त्रिंश्या विराडास्तारपङ्क्तिः, (३५) पञ्चत्रिंश्याः पुरोबृहती त्रिष्टुप्, (३७, ३९) सप्तत्रिंश्येकोनचत्वारिंश्योर्भुरिक्त्रिष्टुप्, (४३) त्रिचत्वारिंश्यास्त्रिष्टुब्गर्भा पङ्क्तिः, (४४) चतुश्चत्वारिंश्याः प्रस्तारपङ्क्तिः, [(४७) सप्तचत्वारिंश्याः पथ्याबृहती], (४८) अष्टचत्वारिंश्याः सतःपङ्क्तिः, [(५०) पञ्चाश्या उपरिष्टाद्बृहती], (५२) द्विपञ्चाश्या विराट्परोष्णिक्, (५९-६०, ६२) एकोनषष्टीषष्टीद्विषष्टीनां पथ्यापङ्क्तिः, [(६८) अष्टषष्ट्याः विराट् पुर उष्णिक्], (६९) एकोनसप्ततितमायास्त्र्यवसाना षट्पदातिशक्वरी, (७१) एकसप्ततितमायाश्च बृहती छन्दांसि ॥

तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह ।
स नः पतिभ्यो जायां दा अग्ने प्रजया सह ॥१॥
पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥२॥
सोमस्य जाया प्रथमं गन्धर्वस्तेऽपरः पतिः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥३॥

तुभ्यम् । अग्रे । परि । अवहन् । सूर्याम् । वहतुना । सह ।
सः । नः । पतिऽभ्यः । जायाम् । दाः । अग्ने । प्रऽजया । सह ॥ १ ॥
पुनः । पत्नीम् । अग्निः । अदात् । आयुषा । सह । वर्चसा ।
दीर्घऽआयुः । अस्याः । यः । पतिः । जीवाति । शरदः । शतम् ॥ २ ॥
सोमस्य । जाया । प्रथमम् । गन्धर्वः । ते । अपरः । पतिः ।
तृतीयः । अग्निः । ते । पतिः । तुरीयः । ते । मनुष्यऽजाः ॥ ३ ॥

XIV.1.64 Let the sacred knowledge be applied after as well as before; let the sacred knowledge (be applied) at the end, in the middle and all around. Having arrived at the impenetrable strong-hold of the enlightened ones, may you, propitious and delightful, shine brightly in your husband's world.

Marriage ceremonies

XIV.2.1 First of all they carry the maiden of marriageable age along with the bridal gifts to you. May you as such, O fire divine, give us, the husbands, a wife capable of bearing children. (Ṛg. X.85.38; Variation).

XIV.2.2 The fire divine infuses marital desire in the bride, and furnishes splendour; may he who is her husband, enjoy life, living for a hundred years. (Ṛg. X.85.39)

XIV.2.3 First of all you are the wife of some (virility); next the sustainer of the earth is your husband; your third husband is the fire divine; your fourth (husband) is one born of men (i.e., human being). (Ṛg. X.85.40; Variation).

सोमो॑ दददन्ध॒र्वाय॑ गन्ध॒र्वो द॑ददग्नये॑ ।
र॒यिं च॑ पु॒त्रांश्चा॑दादग्निर्मह्य॒मथो॑ इ॒माम् ॥४॥
आ वा॑मगन्त्सुम॒तिर्वा॑जिनीवसू॒ न्य॑श्विना हृ॒त्सु कामा॑ अरंसत ।
अभू॑तं गो॒पा मि॑थु॒ना शु॑भस्पती प्रि॒या अ॑र्य॒म्णो दुर्याँ॑ अशीमहि ॥५॥
सा म॑न्दसा॒ना मन॑सा शि॒वेन॑ र॒यिं धे॑हि॒ सर्व॑वीरं वच॒स्य॑म् ।
सु॒गं ती॒र्थं सु॑प्रपा॒णं शु॑भस्पती स्था॒णुं प॑थि॒ष्ठाम॑प दु॒र्म॒तिं ह॑तम् ॥६॥
या ओष॑धयो॒ या न॒द्यो॒३॒॑ यानि॒ क्षेत्रा॑णि॒ या वना॑ ।
तास्त्वा॑ वधु प्र॒जाव॑तीं॒ पत्ये॑ रक्षन्तु र॒क्षसः॑ ॥७॥
एमं पन्था॑मरुक्षाम सु॒गं स्व॑स्ति॒वाह॑नम् ।
यस्मि॒न्वी॒रो न रिष्य॑त्य॒न्येषां॑ वि॒न्दते॒ वसु॑ ॥८॥
इ॒दं सु मे॑ नरः शृणु॒त यया॒शिषा॒ दंप॑ती वा॒मम॑श्नु॒तः ।
ये ग॑न्ध॒र्वा अ॑प्स॒रस॑श्च दे॒वीरे॒षु वा॑नस्प॒त्येषु॒ येधि॑ त॒स्थुः ।
स्यो॒नास्ते॑ अ॒स्यै व॒ध्वै॑ भव॑न्तु मा हिं॑सिषुर्वह॒तुमु॒ह्यमा॑नम् ॥९॥

सोमः॑ । द॒द॒त् । ग॒न्ध॒र्वाय॑ । ग॒न्ध॒र्वः । द॒द॒त् । अ॒ग्नये॑ ।
र॒यिम् । च॒ । पु॒त्रान् । च॒ । अ॒दा॒त् । अ॒ग्निः । मह्य॑म् । अथो॑ इति॑ । इ॒माम् ॥ ४ ॥

आ । वा॒म् । अ॒ग॒न् । सु॒ऽम॒तिः । वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू । नि॑ । अ॒श्वि॒ना । हृ॒त्ऽसु । कामाः॑ । अ॒रं॒स॒त । अभू॑तम् । गो॒पा । मि॒थु॒ना । शु॒भः॒ । प॒ती॒ इति॑ । प्रि॒याः । अ॒र्य॒म्णः । दुर्या॑न् । अ॒शी॒म॒हि॒ ॥ ५ ॥

सा । म॒न्द॒सा॒ना । मन॑सा । शि॒वेन॑ । र॒यिम् । धे॒हि॒ । सर्व॑ऽवीरम् । व॒च॒स्य॑म् । सु॒ऽगम् । ती॒र्थम् । सु॒ऽप्र॒पा॒नम् । शु॒भः॒ । प॒ती॒ इति॑ । स्था॒णुम् । प॒थि॒ऽस्थाम् । अप॑ । दुः॒ऽम॒तिम् । ह॒त॒म् ॥

याः । ओष॑धयः । याः । न॒द्यः॑ । यानि॑ । क्षेत्रा॑णि । या । वना॑ ।
ताः । त्वा॒ । व॒धु॒ । प्र॒जाऽव॑तीम् । पत्ये॑ । र॒क्ष॒न्तु॒ । र॒क्षसः॑ ॥ ७ ॥

आ । इ॒मम् । पन्था॑म् । अ॒रु॒क्षा॒म॒ । सु॒ऽगम् । स्व॒स्ति॒ऽवाह॑नम् ।
यस्मि॑न् । वी॒रः । न । रिष्य॑ति । अ॒न्येषा॑म् । वि॒न्दते॑ । वसु॑ ॥ ८ ॥

इ॒दम् । सु । मे॒ । न॒रः॒ । शृ॒णु॒त॒ । यया॑ । आ॒ऽशिषा॑ । दंप॑ती॒ इति॒ दम्ऽप॑ती । वा॒मम् । अ॒श्नु॒तः॒ ।
ये । ग॒न्ध॒र्वाः । अ॒प्स॒रसः॑ । च॒ । दे॒वीः । ए॒षु । वा॒न॒स्प॒त्येषु॑ । ये । अधि॑ । त॒स्थुः ।
स्यो॒नाः । ते । अ॒स्यै । व॒ध्वै॑ । भ॒व॒न्तु॒ । मा । हिं॒सि॒षुः॒ । व॒ह॒तुम् । उ॒ह्यमा॑नम् ॥९॥

XIV.2.4 Soma (the youthful love) gives her to the Gandharva (attachment personified), the Gandharva gives her to Agni (heat of passion), and finally Agni has given her to me for the sake of children and wealth. (Ṛg. X.85.41)

XIV.2.5 Your friendly grace has come (to us), O you two full of vigour and wealth. O twins divine, desires have filled our hearts. O Lords of benignancy, may you become our twin protectors. May we reach the pleasant dwellings of the ordainer Lord. (Ṛg. X.85.12; Variation).

XIV.2.6 Delighted, with good intent, (O maiden), bring to us riches with all brave sons worthy of raise. O Lords of benignancy, may we have an easy crossing (of river), with a good approach to drinking water. May you drive away the unfriendly persons who stand as road-block or on our way. (Ṛg. X.85.13; Variation).

XIV.2.7 Whatsoever the herbs are there, whatsoever the rivers, whatsoever the fields, whatsoever the forests, may all those, O bride, guard you, the bearer of children, from the destroyers of life for your husband.

XIV.2.8 Let us ride along this path, easy to bring weal, whereon no hero suffers harm and he wins the wealth of his enemies.

XIV.2.9 O men, listen attentively to my this blessing whereby the married couples obtain delight. May the sustainers of the earth (gandharvas), and the divinities moving within the waters (apsaras), who rule over these forests, be gracious to this bride. May they not harm the bridal chariot as it is driven.

ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनाँ अनु ।
पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ॥१०॥
मा विदन्परिपन्थिनो य आसीदन्ति दंपती ।
सुगेन दुर्गमतीतामप द्रान्त्वरातयः ॥११॥
सं काशयामि वहतुं ब्रह्मणा गृहैरघोरेण चक्षुषा मित्रियेण ।
पर्याणद्धं विश्वरूपं यदस्ति स्योनं पतिभ्यः सविता तत्कृणोतु ॥१२॥
शिवा नारीयमस्तमागन्निमं धाता लोकमस्यै दिदेश ।
तामर्यमा भगो अश्विनोभा प्रजापतिः प्रजया वर्धयन्तु ॥१३॥
आत्मन्वत्युर्वरा नारीयमागन्तस्यां नरो वपत बीजमस्याम् ।
सा वः प्रजां जनयद्वक्षणाभ्यो बिभ्रती दुग्धमृषभस्य रेतः ॥१४॥
प्रति तिष्ठ विराडसि विष्णुरिवेह सरस्वति ।
सिनीवालि प्र जायतां भगस्य सुमतावसत् ॥१५॥

ये । वध्वः । चन्द्रम् । वहतुम् । यक्ष्माः । यन्ति । जनान् । अनु ।
पुनः । तान् । यज्ञियाः । देवाः । नयन्तु । यतः । आऽगताः ॥ १० ॥
मा । विदन् । परिऽपन्थिनः । ये । आऽसीदन्ति । दंपती इति दम्ऽपती ।
सुऽगेन । दुःऽगम् । अति । इताम् । अप । द्रान्तु । अरातयः ॥ ११ ॥
सम् । काशयामि । वहतुम् । ब्रह्मणा । गृहैः । अघोरेण । चक्षुषा । मित्रियेण । परिऽआ-
नद्धम् । विश्वऽरूपम् । यत् । अस्ति । स्योनम् । पतिऽभ्यः । सविता । तत् । कृणोतु ॥१२॥
शिवा । नारी । इयम् । अस्तम् । आ । अगन् । इमम् । धाता । लोकम् । अस्यै । दिदेश ।
ताम् । अर्यमा । भगः । अश्विना । उभा । प्रजाऽपतिः । प्रऽजया । वर्धयन्तु ॥ १३ ॥
आत्मन्ऽवती । उर्वरा । नारी । इयम् । आ । अगन् । तस्याम् । नरः । वपत । बीजम् । अस्याम् ।
सा । वः । प्रऽजाम् । जनयत् । वक्षणाभ्यः । बिभ्रती । दुग्धम् । ऋषभस्य । रेतः ॥ १४ ॥
प्रति । तिष्ठ । विऽराट् । असि । विष्णुःऽइव । इह । सरस्वति ।
सिनीवालि । प्र । जायताम् । भगस्य । सुऽमतौ । असत् ॥ १५ ॥

XIV.2.10 Following the people, what wasting diseases go to the delightful chariot of the bride, may the enlightened ones, skilled in sacrifices, conduct those back, wherefrom they came. (Ṛg. X.85.31; Variation).

XIV.2.11 Let not the robbers, who lie in ambush and approach the husband and wife, reach them; may they (the couple) by easy roads escape from all expected dangers. May all adversities keep aloof. (Ṛg. X.85.32; Variation).

XIV.2.12 With my prayer, I make the bridal chariot viewed by the houses with a friendly and not hostile eye. Whatever of all sorts is well-fastened there, may the creator Lord make that delightful for the husbands.

XIV.2.13 This auspicious woman has come home. The sustainer Lord has directed her to this place. May the Ordainer Lord, the Lord of good fortune, both the twins divine, the Lord of creatures make her prosper with progeny.

XIV.2.14 Full of spirit, and fertile this woman has come; O man, sow your seed into her. Bearing the squeezed out semen of virile male, may she bear children for you from her flanks.

XIV.2.15 Stay here respected. You are greatly shining like the Omnipresent Lord. O divine mid wife, (Sinīvalī), may she give birth to children, may she favoured by the Lord of good fortune (enjoy the marital bliss).

उद्व ऊर्मिः शम्या हुन्त्वापो योक्त्राणि मुञ्चत ।
मादुष्कृतौ व्येनसावघ्न्यावशुनमारताम् ॥१६॥
अघोरचक्षुरपतिघ्नी स्योना शग्मा सुशेवा सुयमा गृहेभ्यः ।
वीरसूर्देवृकामा सं त्वयैधिषीमहि सुमनस्यमाना ॥१७॥
अदेवृघ्न्यपतिघ्नीहैधि शिवा पशुभ्यः सुयमा सुवर्चाः ।
प्रजावती वीरसूर्देवृकामा स्योनेममग्निं गार्हपत्यं सपर्य ॥१८॥
उत्तिष्ठेतः किमिच्छन्तीदमागा अहं त्वेडे अभिभूः स्वाद्गृहात् ।
शून्यैषी निर्ऋते याजगन्धोत्तिष्ठाराते प्र पत मेह रंस्थाः ॥१९॥
यदा गार्हपत्यमसपर्यैत्पूर्वमग्निं वधूरियम् ।
अधा सरस्वत्यै नारि पितृभ्यश्च नमस्कुरु ॥२०॥
शर्म वर्मैतदा हरास्यै नार्या उपस्तरे ।
सिनीवालि प्र जायतां भगस्य सुमतावसत् ॥२१॥

उत् । वः । ऊर्मिः । शम्याः । हन्तु । आपः । योक्त्राणि । मुञ्चत ।
मा । अदुःऽकृतौ । विऽएनसौ । अघ्न्यौ । अशुनम् । आ । अरताम् ॥ १६ ॥

अघोरऽचक्षुः । अपतिऽघ्नी । स्योना । शग्मा । सुऽशेवा । सुऽयमा । गृहेभ्यः ।
वीरऽसूः । देवृऽकामा । सम् । त्वया । एधिषीमहि । सुऽमनस्यमाना ॥ १७ ॥

अदेवृऽघ्नी । अपतिऽघ्नी । इह । एधि । शिवा । पशुऽभ्यः । सुऽयमा । सुऽवर्चाः ।
प्रजाऽवती । वीरऽसूः । देवृऽकामा । स्योना । इमम् । अग्निम् । गार्हऽपत्यम् । सपर्य ॥ १८ ॥

उत् । तिष्ठ । इतः । किम् । इच्छन्ती । इदम् । आ । अगाः । अहम् । त्वा । ईडे ।
अभिऽभूः । स्वात् । गृहात् । शून्यऽएषी । निःऽऋते । या । आऽजगन्थ । उत् । तिष्ठ ।
अराते । प्र । पत । मा । इह । रंस्थाः ॥ १९ ॥

यदा । गार्हऽपत्यम् । असपर्यैत् । पूर्वम् । अग्निम् । वधूः । इयम् ।
अध । सरस्वत्यै । नारि । पितृऽभ्यः । च । नमः । कुरु ॥ २० ॥

शर्म । वर्म । एतत् । आ । हर । अस्यै । नार्यै । उपऽस्तिरे ।
सिनीवालि । प्र । जायताम् । भगस्य । सुऽमतौ । असत् ॥ २१ ॥

XIV.2.16 O waters, may your wave strike the pins upwards; may you release the yoke-ropes, May not these two inviolables (bullocks), well-behaved and innocent, come to unpleasant harm. (Ṛg. X.85.13; Variation).

XIV.2.17 May you not be evil-eyed, or killer of your husband. May you be delighting, kind, helpful, disciplined to the (member of the) household, bearer of brave children and pleasing to your brothers-in-law. With you, may we prosper well in friendly happiness. (Ṛg. X.85.44; Variation).

XIV.2.18 Not bringing death to your brothers-in-law, not bring death to your husband, well-disciplined and brilliant, may you prosper here auspicious to the cattle. Having plenty of progeny, bearer of brave sons, pleasing to the brothers-in-law, delightful, may you look after this household fire.

XIV.2.19 Get up hence. Desiring what have you come here. I, the conquerer, request you (to go) out from my own house. O perdition, you have come here seeking to empty this house. Stand up, O malignity; flee away. Do not tarry here.

XIV.2.20 When first of all this bride has tended the household fire, thereafter, O woman, pay your homage to the divine doctress as well as to the elders.

XIV.2.21 Bring for this woman such a comfortable and protective bedding, so that, O divine midwife, may she give birth to children and be favoured by the Lord of good fortune (enjoy the marital bliss).

यं बल्बजं न्यस्यथ चर्म चोपस्तृणीथन ।
तदा रोहतु सुप्रजा या कन्या विन्दते पतिम् ॥२२॥
उप स्तृणीहि बल्बजमधि चर्मणि रोहिते ।
तत्रोपविश्य सुप्रजा इममग्निं सपर्यतु ॥२३॥
आ रोह चर्मोप सीदाग्निमेष देवो हन्ति रक्षांसि सर्वा ।
इह प्रजां जनय पत्ये अस्मै सुज्यैष्ठ्यो भवत्पुत्रस्त एषः ॥२४॥
वि तिष्ठन्तां मातुरस्या उपस्थान्नानारूपाः पशवो जायमानाः ।
सुमङ्गल्युप सीदेममग्निं संपत्नी प्रति भूषेह देवान् ॥२५॥
सुमङ्गली प्रतरणी गृहाणां सुशेवा पत्ये श्वशुराय शंभूः ।
स्योना श्वश्र्वै प्र गृहान्विशेमान् ॥२६॥
स्योना भव श्वशुरेभ्यः स्योना पत्ये गृहेभ्यः ।
स्योनास्यै सर्वस्यै विशे स्योना पुष्टायैषां भव ॥२७॥

यम् । बल्बजम । निऽअस्यथ । चर्म । च । उपऽस्तृणीथन ।
तत् । आ । रोहतु । सुऽप्रजाः । या । कन्या । विन्दते । पतिम् ॥ २२ ॥
उप । स्तृणीहि । बल्बजम् । अधि । चर्मणि । रोहिते ।
तत्र । उपऽविश्य । सुऽप्रजाः । इमम् । अग्निम् । सपर्यतु ॥ २३ ॥
आ । रोह । चर्म । उप । सीद । अग्निम् । एषः । देवः । हन्ति । रक्षांसि । सर्वा ।
इह । प्रऽजाम् । जनय । पत्ये । अस्मै । सुऽज्यैष्ठ्यः । भवत् । पुत्रः । ते । एषः ॥२४॥
वि । तिष्ठन्ताम् । मातुः । अस्याः । उपऽस्थात् । नानाऽरूपाः । पशवः । जायमानाः ।
सुऽमङ्गली । उप । सीद । इमम् । अग्निम् । समऽपत्नी । प्रति । भूष । इह । देवान् ॥२५॥
सुऽमङ्गली । प्रऽतरणी । गृहाणाम् । सुऽशेवा । पत्ये । श्वशुराय । शम्ऽभूः ।
स्योना । श्वश्र्वै । प्र । गृहान् । विश । इमान् ॥ २६ ॥
स्योना । भव । श्वशुरेभ्यः । स्योना । पत्ये । गृहेभ्यः ।
स्योना । अस्यै । सर्वस्यै । विशे । स्योना । पुष्टाय । एषाम् । भव ॥ २७ ॥

XIV.2.22 What coarse grass (balbaja, Eleusine indica) you cast (in a heap) and what hide you spread over it, let the maid, who finds a husband and will have good children, mount on it.

XIV.2.23 Cast the coarse grass in a heap. On the hide spread over it, sitting there, let this bearer of good progeny tend to this fire.

XIV.2.24 Mount upon (this) hide. Sit by the fire. This divinity kills all the destroyers of life. May you give birth to children here for this husband. May this son of yours enjoy the prominence of the eldest.

XIV.2.25 May the children of various forms come forth from the lap of this mother as they are born. O propitious one, sit by this fire. Along with your husband, may you serve the enlightened ones here.

XIV.2.26 O propitious one, augmenter of household, gladdening to husband, pleasing to the father-in-law, delighting to the mother-in-law, enter this family (home).

XIV.2.27 May you be delightful to the fathers-in-law; delightful to husband and to the household; delightful to all this clan; be delightful in their prosperity.

सु॒म॒ङ्ग॒लीरि॒यं व॒धूरि॒मां स॒मेत॒ पश्य॑त ।
सौभा॑ग्यम॒स्यै द॒त्त्वा दौर्भा॑ग्यैर्वि॒परे॑तन ॥२८॥

या दु॒र्हार्दो॑ यु॒व॒तयो॒ याश्चे॒ह जर॑ती॒रपि॑ ।
वर्चो॒ न्व॒स्यै सं द॒त्ताथास्तं॑ वि॒परे॑तन ॥२९॥

रु॒क्मप्र॑स्तरणं व॒ह्यं विश्वा॑ रू॒पाणि॒ बिभ्र॑तम् ।
आरो॑हत्सू॒र्या सा॑वि॒त्री बृ॑ह॒ते सौभ॑गाय॒ कम् ॥३०॥

आ रो॑ह॒ तल्पं॑ सुमन॒स्यमा॑ने॒ह प्र॒जां ज॑नय॒ पत्ये॑ अ॒स्मै ।
इ॒न्द्रा॒णीव॑ सु॒बुधा॒ बुध्य॑माना॒ ज्योति॑रग्रा उ॒षस॒ः प्रति॑ जागरासि ॥३१॥

दे॒वा अग्रे॒ न्य॑पद्यन्त॒ पत्नी॒ः सम॑स्पृशन्त त॒न्व॑स्त॒नूभि॑ः ।
सू॒र्येव॑ नारि वि॒श्वरू॑पा महि॒त्वा प्र॒जाव॑ती॒ पत्या॒ सं भ॑वे॒ह ॥३२॥

उत्ति॑ष्ठे॒तो विश्वा॑वसो॒ नम॑सेडामहे त्वा ।
जा॒मिमि॑च्छ पितृ॒षदं॒ न्य॑क्तां॒ स ते॑ भा॒गो ज॒नुषा॒ तस्य॑ विद्धि ॥३३॥

सु॒ऽम॒ङ्ग॒लीः । इ॒यम् । व॒धूः । इ॒माम् । स॒म्ऽए॑त । पश्य॑त ।
सौभा॑ग्यम् । अ॒स्यै । द॒त्त्वा । दौः॒ऽभा॑ग्यैः । वि॒ऽपरे॑तन ॥ २८ ॥

याः । दु॒ःऽहार्दः॑ । यु॒व॒तय॑ः । याः । च॒ । इ॒ह । जर॑तीः । अपि॑ ।
वर्चः॑ । नु । अ॒स्यै । सम् । द॒त्त॒ । अथ॑ । अस्त॑म् । वि॒ऽपरे॑तन ॥ २९ ॥

रु॒क्मऽप्र॑स्तरणम् । व॒ह्यम् । विश्वा॑ । रू॒पाणि॑ । बिभ्र॑तम् ।
आ । अ॒रो॒ह॒त् । सू॒र्या । सा॒वि॒त्री । बृ॒ह॒ते । सौभ॑गाय । कम् ॥ ३० ॥

आ । रो॒ह॒ । तल्प॑म् । सु॒ऽम॒न॒स्यमा॑ना । इ॒ह । प्र॒ऽजाम् । ज॒न॒य॒ । पत्ये॑ । अ॒स्मै॒ ।
इ॒न्द्रा॒णीऽइ॑व । सु॒ऽबुधा॑ । बुध्य॑माना । ज्योति॑ःऽअग्राः । उ॒षस॑ः । प्रति॑ । जा॒ग॒रा॒सि॒ ॥३१॥

दे॒वाः । अग्रे॑ । नि । अ॒प॒द्य॒न्त॒ । पत्नी॑ः । सम् । अ॒स्पृ॒श॒न्त॒ । त॒न्व॑ः । त॒नूभि॑ः ।
सू॒र्याऽइ॑व । ना॒रि॒ । वि॒श्वऽरू॑पा । म॒हि॒ऽत्वा । प्र॒जाऽव॑ती । पत्या॑ । सम् । भ॒व॒ । इ॒ह ॥३२॥

उत् । ति॒ष्ठ॒ । इ॒तः । वि॒श्व॒व॒सो॒ इति॑ विश्वऽवसो । नम॑सा । ई॒डा॒म॒हे॒ । त्वा॒ ।
जा॒मिम् । इ॒च्छ॒ । पि॒तृ॒ऽसद॑म् । निऽअ॑क्ताम् । सः । ते॒ । भा॒गः । ज॒नुषा॑ । तस्य॑ । वि॒द्धि॒ ॥

XIV.2.28 Propitious is this bride. Come all of you and have a look at her. Granting good fortune to her, go back driving the misfortunes away. (Ṛg. X.85.33; Variation)

XIV.2.29 What evil-minded young women are here and so also the old ones, may they give their prowess to this bride and then go back home.

XIV.2.30 This damsel of marriageable age (Sūrya), this girl at procreative stage (Sāvitrī) has mounted this gold-cushioned litter, bearing all sorts of decorations for great happiness and good fortune.

XIV.2.31 Mount the bridal bed with friendly and cheerful mind. Give birth to offsprings here for this husband of yours. Alert and easy to awake like Indrānī, may you wake up to meet the dawns followed by light.

XIV.2.32 The enlightened ones, since olden times, used to lie with their wives. Bodies embrace bodies closely. O woman beauteous and great like a girl of marriageable age (Sūrya), capable of bearing children, may you unite here with your husband.

XIV.2.33 O youth, rich with all sorts of wealth (Viśvavasu), rise up hence. With reverence we pay homage to you. Seek a virtuous woman living in her father's house and well-adorned. That is your share by birth. Avail of that.

अप्सरसः सधमादं मदन्ति हविर्धानमन्तरा सूर्यं च ।
तास्ते जनित्रमभि ताः परेहि नमस्ते गन्धर्वर्तुना कृणोमि ॥३४॥
नमो गन्धर्वस्य नमसे नमो भामाय चक्षुषे च कृण्मः ।
विश्वावसो ब्रह्मणा ते नमोभि जाया अप्सरसः परेहि ॥३५॥
राया वयं सुमनसः स्यामोदितो गन्धर्वमावीवृताम ।
अगन्त्स देवः परमं सधस्थमगन्म यत्र प्रतिरन्त आयुः ॥३६॥
सं पितरावृत्विये सृजेथां माता पिता च रेतसो भवाथः ।
मर्य इव योषामधिरोहयैनां प्रजां कृण्वाथामिह पुष्यतं रयिम् ॥३७॥
तां पूषं छिवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति ।
या न ऊरू उशती विश्रयाति यस्यामुशन्तः प्रहरेम शेपः ॥३८॥
आ रोहोरुमुप धत्स्व हस्तं परि ष्वजस्व जायां सुमनस्यमानः ।
प्रजां कृण्वाथामिह मोदमानौ दीर्घं वामायुः सविता कृणोतु ॥३९॥

अप्सरसः । सधऽमादम् । मदन्ति । हविःऽधानम् । अन्तरा । सूर्यम् । च । ताः । ते ।
जनित्रम् । अभि । ताः । परा । इहि । नमः । ते । गन्धर्वऽऋतुना । कृणोमि ॥ ३४ ॥
नमः । गन्धर्वस्य । नमसे । नमः । भामाय । चक्षुषे । च । कृण्मः ।
विश्वावसो इति विश्वऽवसो । ब्रह्मणा । ते । नमः । अभि । जायाः । अप्सरसः । परा । इहि ॥
राया । वयम् । सुऽमनसः । स्याम । उत् । इतः । गन्धर्वम् । आ । अवीवृताम ।
अगन् । सः । देवः । परमम् । सधऽस्थम् । अगन्म । यत्र । प्रऽतिरन्ते । आयुः ॥ ३६ ॥
सम् । पितरौ । ऋत्विये इति । सृजेथाम् । माता । पिता । च । रेतसः । भवाथः । मर्यःऽइव ।
योषाम् । अधि । रोहय । एनाम् । प्रऽजाम् । कृण्वाथाम् । इह । पुष्यतम् । रयिम् ॥३७॥
ताम् । पूषन् । शिवऽतमाम् । आ । ईरयस्व । यस्याम् । बीजम् । मनुष्याः । वपन्ति ।
या । नः । ऊरू इति । उशती । विऽश्रयाति । यस्याम् । उशन्तः । प्रऽहरेम । शेपः ॥३८॥
आ । रोह । ऊरुम् । उप । धत्स्व । हस्तम् । परि । स्वजस्व । जायाम् । सुऽमनस्यमानः ।
प्रऽजाम् । कृण्वाथाम् । इह । मोदमानौ । दीर्घम् । वाम् । आयुः । सविता । कृणोतु ॥३९॥

XIV.2.34 The energies moving in the clouds revel in their common dwelling place, which is in between the oblation-receptacle and the sun. They are your relatives. Go away to them. O sustainer of earth, I pay homage to you in due season. (First half Av. VII.109.3)

XIV.2.35 Homage to the food provided by the sustainer of the earth (the cloud); to the wrathful eye we pay homage. O master of all sorts of wealth, homage to you with sacred knowledge. May you go away to your wives, the energies active within the waters (apsaras).

XIV.2.36 May we be friendly with wealth. May we attain to the sustainer of the earth from this place. That divine one has gone to the highest abode, where we reach by prolonging our life-span.

XIV.2.37 O you two parents, unite in your due season. You will become mother and father of your progeny. As a male mounts a female, so mount her. Bring forth your offsprings here and accumulate wealth.

XIV.2.38 O Lord of nourishment, inspire her who is most auspicious, in whom men may sow seed, who shall twine her loving arms about me, and enter into consummation. (Ṛv. X.85.37)

XIV.2.39 Mount the thigh. Apply a caressing hand. Embrace your wife with friendly and cheerful mind. May both of you, rejoicing, bring forth progeny here. May the creator Lord grant you long-long life.

आ वां प्रजां जनयतु प्रजापतिरहोरात्राभ्यां समनक्त्वर्यमा ।
अदुर्मङ्गली पतिलोकमा विशेमं शं नो भव द्विपदे शं चतुष्पदे ॥४०॥
देवैर्दत्तं मनुना साकमेतद्वाधूयं वासो वध्वश्च वस्त्रम् ।
यो ब्रह्मणे चिकितुषे ददाति स इद्रक्षांसि तल्पानि हन्ति ॥४१॥
यं मे दत्तो ब्रह्मभागं वधूयोर्वाधूयं वासो वध्वश्च वस्त्रम् ।
युवं ब्रह्मणेनुमन्यमानौ बृहस्पते साकमिन्द्रश्च दत्तम् ॥४२॥
स्योनाद्योनेरधि बुध्यमानौ हसामुदौ महसा मोदमानौ ।
सुगू सुपुत्रौ सुगृहौ तराथो जीवावुषसो विभातीः ॥४३॥
नवं वसानः सुरभिः सुवासा उदागां जीव उषसो विभातीः ।
आण्डात्पतत्रीवामुक्षि विश्वस्मादेनसस्परि ॥४४॥
शुम्भनी द्यावापृथिवी अन्तिसुम्ने महिव्रते ।
आपः सप्त सुस्रुवुर्देवीस्ता नो मुञ्चन्त्वंहसः ॥४५॥

आ । वाम् । प्रऽजाम् । जनयतु । प्रजाऽपतिः । अहोरात्राभ्याम् । सम् । अनक्तु । अर्यमा ।
अदुःऽमङ्गली । पतिऽलोकम् । आ । विश । इमम् । शम् । नः । भव । द्विऽपदे । शम् । चतुःऽपदे ॥
देवैः । दत्तम् । मनुना । साकम् । एतत् । वाधूऽयम् । वासः । वध्वः । च । वस्त्रम् ।
यः । ब्रह्मणे । चिकितुषे । ददाति । सः । इत् । रक्षांसि । तल्पानि । हन्ति ॥ ४१ ॥
यम् । मे । दत्तः । ब्रह्मऽभागम् । वधूऽयोः । वाधूऽयम् । वासः । वध्वः । च । वस्त्रम् ।
युवम् । ब्रह्मणे । अनुऽमन्यमानौ । बृहस्पते । साकम् । इन्द्रः । च । दत्तम् ॥ ४२ ॥
स्योनात् । योनेः । अधि । बुध्यमानौ । हसामुदौ । महसा । मोदमानौ ।
सुगू इति सुऽगू । सुऽपुत्रौ । सुऽगृहौ । तराथः । जीवौ । उषसः । विऽभातीः ॥ ४३ ॥
नवम् । वसानः । सुरभिः । सुऽवासाः । उत्ऽआगाम् । जीवः । उषसः । विऽभातीः ।
आण्डात् । पतत्रीऽइव । अमुक्षि । विश्वस्मात् । एनसः । परि ॥ ४४ ॥
शुम्भनी इति । द्यावापृथिवी इति । अन्तिसुम्ने इत्यन्तिऽसुम्ने । महिव्रते इति महिऽव्रते ।
आपः । सप्त । सुस्रुवुः । देवीः । ताः । नः । मुञ्चन्तु । अंहसः ॥ ४५ ॥

XIV.2.40 May the Lord of creatures bless both of you with offspring. May the ordainer Lord keep you together day and night. Never unpropitious (O bride), enter this house (world) of your husband. Be you a blessing for our bipeds, a blessing for our quadrupeds. (Ṛg. X.85.43; Variation)

XIV.2.41 Presented by the enlightened ones along with the thoughtful persons, this nuptial dress and the brides garment, whosoever gives to a learned intellectual person, he verily destroys the harmful germs of the marriage-bed.

XIV.2.42 What nuptial dress of the wooer and the bride's garment, which is an intellectual person's share, you give to me, that O Lord supreme along with the resplendent Lord, both of you assentingly give to an intellectual person.

XIV.2.43 Waking up in your comfortable house, laughing merrily and greatly rejoicing, having good cattle, good sons, and good household, may you two spirits swim through the splendours of dawn.

XIV.2.44 Clothed in new garments, fragrant and well-dressed, spirited I have risen up to the splendours of dawn. Like a bird coming out of the egg, may I be freed completely from all the sin.

XIV.2.45 Seven rays of the sun make the waters of the ocean to descend down in streams from the sky. May those (waters) loosen the iron-headed weapon (lodged in your body) and remove it. (Av. VII.112.1)

सूर्यायै देवेभ्यो मित्राय वरुणाय च ।
ये भूतस्य प्रचेतसस्तेभ्य इदमकरं नमः ॥४६॥
य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता संधिं मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः ॥४७॥
अपास्मत्तम उच्छतु नीलं पिशङ्गमुत लोहितं यत् ।
निर्दहनी या पृषातक्य१स्मिन्तां स्थाणावध्या संजामि ॥४८॥
यावतीः कृत्या उपवासने यावन्तो राज्ञो वरुणस्य पाशाः ।
व्यृद्धयो या असमृद्धयो या अस्मिन्ता स्थाणावधि सादयामि ॥४९॥
या मे प्रियतमा तनूः सा मे बिभाय वाससः ।
तस्याग्रे त्वं वनस्पते नीविं कृणुष्व मा वयं रिषाम ॥५०॥
ये अन्ता यावतीः सिचो य ओतवो ये च तन्तवः ।
वासो यत्पत्नीभिरुतं तन्नः स्योनमुप स्पृशात् ॥५१॥

सूर्यायै । देवेभ्यः । मित्राय । वरुणाय । च ।
ये । भूतस्य । प्रऽचेतसः । तेभ्यः । इदम् । अकरम् । नमः ॥ ४६ ॥
यः । ऋते । चित् । अभिऽश्रिषः । पुरा । जत्रुऽभ्यः । आऽतृदः ।
समऽधाता । समऽधिम् । मघऽवा । पुरुऽवसुः । निःऽकर्ता । विऽह्रुतम् । पुनः ॥४७॥
अप । अस्मत् । तमः । उच्छतु । नीलम् । पिशङ्गम् । उत । लोहितम् । यत् ।
निःऽदहनी । या । पृषातकी । अस्मिन् । ताम् । स्थाणौ । अधि । आ । सजामि ॥४८॥
यावतीः । कृत्याः । उपऽवासने । यावन्तः । राज्ञः । वरुणस्य । पाशाः ।
विऽऋद्धयः । याः । असमऽऋद्धयः । याः । अस्मिन् । ताः । स्थाणौ । अधि । सादयामि ॥४९॥
या । मे । प्रियऽतमा । तनूः । सा । मे । बिभाय । वाससः ।
तस्य । अग्रे । त्वम् । वनस्पते । नीविम् । कृणुष्व । मा । वयम् । रिषाम ॥ ५० ॥
ये । अन्ताः । यावतीः । सिचः । ये । ओतवः । ये । च । तन्तवः ।
वासः । यत् । पत्नीभिः । उतम् । तत् । नः । स्योनम् । उप । स्पृशात् ॥ ५१ ॥

XIV.2.46 I offer this adoration to the bride, to the divine powers, to the sun and the water, (and to all those) who are kind and considerate towards created worlds. (Ṛg. X.85.17)

XIV.2.47 The bounteous Lord is a great healer. He, even before injury to neck or any part, is afflicted, confers capacity in the body to heal up the wound and closes the injured part, and hastens the recovery. He, the bounteous Lord, without ligature or healing material, closes up the wound again before making incision in the neck or any injured part and makes whole the dis-severed part. (Ṛg. VIII.1.12)

XIV.2.48 May the gloom, that is blue, brown and also red, go away from us. What burning disease (pṛṣtaki) is in this (nuptial garment), that I fasten to this wooden post.

XIV.2.49 Whatever evil designs are there in the clothing, whatever the nooses of the venerable Lord, the sovereign, whatever the poverties and miseries are there, them I fasten to this wooden post.

XIV.2.50 This body, which is dearest to me, is frightened of the garment. (Therefore) O Lord of vegetation, may you first make yourself an inner wrap. May we not suffer harm.

XIV.2.51 What ends (of threads), what borders, what woofs and what wraps are there; what cloths is woven by the wives, may that be of pleasant touch to us.

उशतीः कन्यला इमाः पितृलोकात्पतिं यतीः ।
अव दीक्षामसृक्षत स्वाहा ॥५२॥

बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । वर्चो गोषु प्रविष्टं यत्तेनेमां सं सृजामसि ॥५३॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । तेजो गोषु प्रविष्टं यत्तेनेमां सं सृजामसि ॥५४॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । भगो गोषु प्रविष्टो यस्तेनेमां सं सृजामसि ॥५५॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । यशो गोषु प्रविष्टं यत्तेनेमां सं सृजामसि ॥५६॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । पयो गोषु प्रविष्टं यत्तेनेमां सं सृजामसि ॥५७॥
बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् । रसो गोषु प्रविष्टो यस्तेनेमां सं सृजामसि ॥५८॥

उशतीः । कन्यलाः । इमाः । पितृऽलोकात् । पतिम् । यतीः ।
अव । दीक्षाम् । असृक्षत । स्वाहा ॥ ५२ ॥

बृहस्पतिना । अवऽसृष्टाम् । विश्वे । देवाः । अधारयन् ।
वर्चः । गोषु । प्रऽविष्टम् । यत् । तेन । इमाम् । सम् । सृजामसि ॥ ५३ ॥

बृहस्पतिना ।० । तेजः । गोषु । प्रऽविष्टम् । यत् । तेन ।० ॥ ५४ ॥

बृहस्पतिना । ० । भगः । गोषु । प्रऽविष्टः । यः । तेन ।० ॥ ५५ ॥

बृहस्पतिना । ० । यशः । गोषु । प्रविष्टम् । यत् । तेन ।० ॥ ५६ ॥

बृहस्पतिना ।० । पयः । गोषु । प्रऽविष्टम् । यत् । तेन ।० ॥ ५७ ॥

बृहस्पतिना । अवऽसृष्टाम् । विश्वे । देवाः । अधारयन् ।
रसः । गोषु । प्रऽविष्टः । यः । तेन । इमाम् । सम् । सृजामसि ॥ ५८ ॥

XIV.2.52 Full of desire, these girls, going to husband from the father's house, have discarded the consecration. Svāhā.

XIV.2.53 Her, whom the Lord supreme has discarded, all the bounties of Nature uphold. The lusture that has entered the cows, therewith we unite this (bride).

XIV.2.54 Her, whom the Lord supreme has discarded, all the bounties of Nature uphold. The vigour that has entered the cows, therewith we unite this (bride).

XIV.2.55 Her, whom the Lord supreme has discarded, all the bounties of Nature have adopted. The good fortune that has entered the cows, herewith we unite this (bride).

XIV.2.56 Her, whom the Lord supreme has discarded, all the bounties of Nature have adopted. The glory that has entered the cows, therewith we unite this (bride).

XIV.2.57 Her, whom the Lord supreme has discarded all the bounties of Nature uphold. The milk that has entered the cows, therewith we unite this (bride).

XIV.2.58 Her, whom the Lord supreme has discarded, all the bounties of Nature uphold. The sap that has entered the cows, therewith we untie this (bride).

यदीमे केशिनो जना गृहे ते समनर्तिषू रोदेन कृण्वन्तो३घम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्र मुञ्चताम् ॥५९॥
यदीयं दुहिता तव विकेश्यरुदद्गृहे रोदेन कृण्वत्य१घम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्र मुञ्चताम् ॥६०॥
यज्जामयो यद्युवतयो गृहे ते समनर्तिषू रोदेन कृण्वतीरघम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्र मुञ्चताम् ॥६१॥
यत्ते प्रजायां पशुषु यद्वा गृहेषु निष्ठितमघकृद्भिरघं कृतम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्र मुञ्चताम् ॥६२॥
इयं नार्युप ब्रूते पूल्यान्यावपन्तिका ।
दीर्घायुरस्तु मे पतिर्जीवाति शरदः शतम् ॥६३॥
इहेमाविन्द्र सं नुद चक्रवाकेव दंपती ।
प्रजयैनौ स्वस्तकौ विश्वमायुर्व्य१श्नुताम् ॥६४॥

यदि । इमे । केशिनः । जनाः । गृहे । ते । समऽअनर्तिषुः । रोदेन । कृण्वन्तः । अघम् ।
अग्निः । त्वा । तस्मात् । एनसः । सविता । च । प्र । मुञ्चताम् ॥ ५९ ॥
यदि । इयम् । दुहिता । तव । विऽकेशी । अरुदत् । गृहे । रोदेन । कृण्वती । अघम् ॥०॥६०॥
यत् । जामयः । यत् । युवतयः । गृहे । ते । समऽअनर्तिषुः । रोदेन । कृण्वतीः । अघम् ॥० ॥
यत् । ते । प्रऽजायाम् । पशुषु । यत् । वा । गृहेषु । निऽस्थितम् । अघकृत्ऽभिः । अघम् ।
कृतम् । अग्निः । त्वा । तस्मात् । एनसः । सविता । च । प्र । मुञ्चताम ॥ ६२ ॥
इयम् । नारी । उप । ब्रूते । पूल्यानि । आऽवपन्तिका ।
दीर्घऽआयुः । अस्तु । मे । पतिः । जीवाति । शरदः । शतम् ॥ ६३ ॥
इह । इमौ । इन्द्र । सम् । नुद । चक्रवाकाऽइव । दंपती इति दम्ऽपती ।
प्रऽजया । एनौ । सुऽअस्तकौ । विश्वम् । आयुः । वि । अश्नुताम् ॥ ६४ ॥

XIV.2.59 If these people with long hair have danced together in your house, creating unpleasantness with wails and cries, may the Lord adorable and inspirer, free you from that nuisance.

XIV.2.60 If this daughter of yours has wept with loosened hair in your house, creating unpleasantness with wails and cries, may the Lord adorable and inspirer, free you from that nuisance.

XIV.2.61 If the sisters and the young ladies have danced together in your house, creating unpleasantness with wails and cries, may the Lord adorable and inspirer, free you from that nuisance.

XIV.2.62 What evil the evil-doers have set in your progeny, in your cattle, or in your homes, may the Lord adorable and inspirer, free you from that nuisance.

XIV.2.63 This women, scattering handfuls of grain, says : "may my husband be long-lived; may he live through a hundred autumns".

XIV.2.64 O resplendent Lord, may you urge these two spouses to each other like a cakravāka couple. May both of them live their full life-span with children in their nice home.

यदासन्द्यामुपधाने यद्वोपवासने कृतम् ।
विवाहे कृत्यां यां चक्रुरास्नाने तां नि दध्मसि ॥६५॥
यद्दुष्कृतं यच्छमलं विवाहे वहतौ च यत् ।
तत्संभलस्य कम्बले मृज्महे दुरितं वयम् ॥६६॥
संभले मलं सादयित्वा कम्बले दुरितं वयम् ।
अभूम यज्ञियाः शुद्धाः प्र ण आयूंषि तारिषत् ॥६७॥
कृत्रिमः कङ्कतः शतदन्य एषः ।
अपास्याः केश्यं मलमप शीर्षण्यं लिखात् ॥६८॥
अङ्गादङ्गाद्वयमस्या अप यक्ष्मं नि दध्मसि ।
तन्मा प्रापत्पृथिवीं मोत देवान्दिवं मा प्रापदुर्व१न्तरिक्षम् ।
अपो मा प्रापन्मलमेतदग्ने यमं मा प्रापत्पितृंश्च सर्वान् ॥६९॥
सं त्वा नह्यामि पयसा पृथिव्याः सं त्वा नह्यामि पयसौषधीनाम् ।
सं त्वा नह्यामि प्रजया धनेन सा संनद्धा सनुहि वाजमेमम् ॥७०॥

यत् । आऽसन्द्याम् । उपऽधाने । यत् । वा । उपऽवासने । कृतम् ।
विऽवाहे । कृत्याम् । याम् । चक्रुः । आऽस्नाने । ताम् । नि । दध्मसि ॥ ६५ ॥

यत् । दुःऽकृतम् । यत् । शमलम् । विऽवाहे । वहतौ । च । यत् ।
तत् । सम्ऽभलस्य । कम्बले । मृज्महे । दुःऽइतम् । वयम् ॥ ६६ ॥

सम्ऽभले । मलम् । सादयित्वा । कम्बले । दुःऽइतम् । वयम् ।
अभूम । यज्ञियाः । शुद्धाः । प्र । नः । आयूंषि । तारिषत् ॥ ६७ ॥

कृत्रिमः । कण्टकः । शतऽदन् । यः । एषः ।
अप । अस्याः । केश्यम् । मलम् । अप । शीर्षण्यम् । लिखात् ॥ ६८ ॥

अङ्गात्ऽअङ्गात् । वयम् । अस्याः । अप । यक्ष्मम् । नि । दध्मसि । तत् । मा ।
प्र । आपत् । पृथिवीम् । मा । उत । देवान् । दिवम् । मा । प्र । आपत् । उरु ।
अन्तरिक्षम् । अपः । मा । प्र । आपत् । मलम् । एतत् । अग्ने । यमम् । मा । प्र । आपत् ।
पितृन् । च । सर्वान् ॥ ६९ ॥

सम् । त्वा । नह्यामि । पयसा । पृथिव्याः । सम् । त्वा । नह्यामि । पयसा । ओषधीनाम् । सम् ।
त्वा । नह्यामि । प्रऽजया । धनेन । सा । सम्ऽनद्धा । सनुहि । वाजम् । आ । इमम् ॥७०॥

XIV.2.65 What evil design they have put in the chair, on the cushion and what on the covering; what evil design they have put in the wedding ceremony, all that we sink in the bath.

XIV.2.66 What misdeed and what mischief was done at the marriage and in the bridal procession, that blemish we wipe off at the dress of the intermediary.

XIV.2.67 Having deposited the malignancy on the intermediary and the fault on his dress, we have become holy and pure. May he prolong our life-spans.

XIV.2.68 May this hundred toothed artificial thorn (i.e., the comb) scratch away the dirt of her hair and of her head.

XIV.2.69 From each and every limb of hers, we take away the wasting disease. May that not go to the earth, not to the bounties of Nature; may that not go to the sky, nor to the vast midspace. May this malignity not go to the waters, O adorable Lord; neither may it go to the controller Lord, nor to all the elders.

XIV.2.70 I harness you well with the essence of the earth. I harness you with the essence of the herbs. I harness with progeny and wealth. So harnessed, attain to this vigour.

अमोहमस्मि सा त्वं सामाहमस्म्यृक्त्वं द्यौरहं पृथिवी त्वम्।
ताविह सं भवाव प्रजामा जनयावहै ॥७१॥

जनियन्ति नावग्रवः पुत्रियन्ति सुदानवः। अरिष्टासू सचेवहि बृहते वाजसातये ॥७२॥

ये पितरो वधूदर्शा इमं वहतुमागमन्। ते अस्यै वध्वै संपत्न्यै प्रजावच्छर्म यच्छन्तु ॥७३॥

येदं पूर्वागन्रशनायमाना प्रजामस्यै द्रविणं चेह दत्त्वा।
तां वहन्त्वगतस्यानु पन्थां विराडियं सुप्रजा अत्यजैषीत् ॥७४॥

प्र बुध्यस्व सुबुधा बुध्यमाना दीर्घायुत्वाय शतशारदाय।
गृहान्गच्छ गृहपत्नी यथासो दीर्घं त आयुः सविता कृणोतु ॥७५॥

अमः। अहम्। अस्मि। सा। त्वम्। साम। अहम्। अस्मि। ऋक्। त्वम्। द्यौः। अहम्। पृथिवी। त्वम्। तौ। इह। सम्। भवाव। प्रऽजाम्। आ। जनयावहै ॥ ७१ ॥

जनिऽयन्ति। नौ। अग्रवः। पुत्रिऽयन्ति। सुऽदानवः।
अरिष्टासू इत्यरिष्टऽअसू। सचेवहि। बृहते। वाजऽसातये ॥ ७२ ॥

ये। पितरः। वधूऽदर्शाः। इमम्। वहतुम्। आऽअगमन्।
ते। अस्यै। वध्वै। समऽपत्न्यै। प्रजाऽवत्। शर्म। यच्छन्तु ॥ ७३ ॥

या। इदम्। पूर्वा। अगन्। रशनाऽयमाना। प्रऽजाम्। अस्यै। द्रविणम्। च। इह। दत्त्वा।
ताम्। वहन्तु। अगतस्य। अनु। पन्थाम्। विऽराट्। इयम्। सुऽप्रजाः। अति। अजैषीत् ॥ ७४ ॥

प्र। बुध्यस्व। सुऽबुधा। बुध्यमाना। दीर्घायुऽत्वाय। शतऽशारदाय।
गृहान्। गच्छ। गृहऽपत्नी। यथा। असः। दीर्घम्। ते। आयुः। सविता। कृणोतु ॥७५॥

॥ इति चतुर्दशं काण्डम् ॥

[चतुर्दशकाण्डे सूक्ते २, ऋचः १३९]

XIV.2.71 Here I am, and you are she. I am the Sāman (song), you are the Ṛk (verse). I am the heaven and you the earth. As such, let both of us unite. Let us procreate children.

XIV.2.72 Unmarried men desire wives. Liberal donors desire sons. May we two, with our vitality unimpaired, live together to win great wealth and strength.

XIV.2.73 May the elders, who desirous of beholding the bride, have come to this bridal procession, grant to this bride along with her husband progeny and comfort (happiness).

XIV.2.74 May they conduct this bride, who came to this place first as if girdling (the house-hold), along with the pathways yet unfrequented. May this shining one, blessed with children win.

XIV.2.75 Alert and easy to awake, may you go on waking up for a long life of a hundred autumns. Go to the house, so that, you may become the mistress of the household. May the creator Lord grant you a long life.

Here ends Kāṇḍa XIV

Hymns 2, Verses 139

Kāṇḍa - XV

पञ्चदशं काण्डम्

अथ पञ्चदशं काण्डम् ॥

'व्रात्य आसीत्' इत्यारभ्य 'अह्ना प्रत्यङ्' इत्यन्तानामष्टादशपर्यायाणामथर्वा ऋषिः। (१–४, ६–१८) प्रथमादिचतुर्णां षष्ठादित्रयोदशानाञ्च पर्यायाणामध्यात्मं व्रात्यो वा, (५) पञ्चमस्य च रुद्रो देवता ॥

[१] प्रथमः पर्यायः

(१–८) अष्टर्चस्यास्य पर्यायस्य (१) प्रथमर्चः साम्नी पङ्क्तिः, (२) द्वितीयाया द्विपदा साम्नी बृहती, (३) तृतीयाया एकपदा यजुर्ब्राह्म्यनुष्टुप्, (४) चतुर्थ्या एकपदा विराड्गायत्री, (५) पञ्चम्याः साम्न्यनुष्टुप्, (६) षष्ठ्यास्त्रिपदा प्राजापत्या बृहती, (७) सप्तम्या आसुरी पङ्क्तिः, (८) अष्टम्याश्च त्रिपदानुष्टुप् छन्दांसि ॥

व्रात्य आसीदीयमान एव स प्रजापतिं समैरयत् ॥१॥
स प्रजापतिः सुवर्णमात्मन्नपश्यत्तत्प्राजनयत् ॥२॥
तदेकमभवत्तल्ललाममभवत्तन्महदभवत्तज्ज्येष्ठमभवत्त-
द्ब्रह्माभवत्तत्तपोभवत्तत्सत्यमभवत्तेन प्राजायत ॥३॥
सोऽवर्धत स महानभवत्स महादेवोऽभवत् ॥४॥
स देवानामीशां पर्यैत्स ईशानोभवत् ॥५॥

व्रात्यः। आसीत्। ईयमानः। एव। सः। प्रजाऽपतिम्। सम्। ऐरयत् ॥ १ ॥

सः। प्रजाऽपतिः। सुऽवर्णम्। आत्मन्। अपश्यत्। तत्। प्र। अजनयत् ॥ २ ॥

तत्। एकम्। अभवत्। तत्। ललामम्। अभवत्। तत्। महत्। अभवत्। तत्। ज्येष्ठम्। अभवत्। तत्। ब्रह्म। अभवत्। तत्। तपः। अभवत्। तत्। सत्यम्। अभवत्। तेन। प्र। अजायत ॥ ३ ॥

सः। अवर्धत। सः। महान्। अभवत्। सः। महाऽदेवः। अभवत् ॥ ४ ॥

सः। देवानाम्। ईशाम्। परि। ऐत्। सः। ईशानः। अभवत् ॥ ५ ॥

PARYĀYA - I

Vrātyāḥ

XV.1.1 There was the Vrātya (the Supreme Being), just roaming about. He stirred the Prajāpati (the Lord of creatures) to life.

XV.1.2 He, the Lord of creatures, beheld the beauteous one within him. He begot that.

XV.1.3 That became singular; that became beautiful; that became great; that became the chiefest; that became the Lord Supreme; that became the penance; that became the truth; thereby that procreated.

XV.1.4 He grew up; he became great; he became Mahādeva (the great Lord).

XV.1.5 He attained sway over the enlightened ones. Be became Īśāna (the Master).

स एकव्रात्योऽभवत्स धनुरादत्त तदेवेन्द्रधनुः ॥६॥
नीलमस्योदरं लोहितं पृष्ठम् ॥७॥
नीलेनैवाप्रियं भ्रातृव्यं प्रोर्णोति लोहितेन
द्विषन्तं विध्यतीति ब्रह्मवादिनो वदन्ति ॥८॥

सः । एकऽव्रात्यः । अभवत् । सः । धनुः । आ । अदत्त । तत् । एव । इन्द्रऽधनुः ॥ ६ ॥
नीलम् । अस्य । उदरम् । लोहितम् । पृष्ठम् ॥ ७ ॥
नीलेन । एव । अप्रियम् । भ्रातृव्यम् । प्र । ऊर्णोति । लोहितेन । द्विषन्तम् । विध्यति । इति । ब्रह्मऽवादिनः । वदन्ति ॥ ८ ॥

[२] द्वितीयः पर्यायः

(१-२८) अष्टाविंशत्यृचस्यास्य पर्यायस्य (१, ६, ९, १५, २१, २६) प्रथमाषष्ठीनवमीपञ्चदश्येकविंशीषड्विंशीनामृचां साम्न्यनुष्टुप्, (२, १६, २२) द्वितीयाषोडशीद्वाविंशीनां साम्नी त्रिष्टुप्, (३) तृतीयाया द्विपदार्षी पङ्क्तिः, (४, १८, २४) चतुर्थ्यष्टादशीचतुर्विंशीनां द्विपदा ब्राह्मी गायत्री, (५, १३, २५) पञ्चमीत्रयोदशीपञ्चविंशीनां द्विपदार्ची जगती, [७, १४ (२), २० (२), २७] सप्तम्याश्चतुर्दशीविंश्योर्द्वितीयावसानर्चोः सप्तविंश्याश्च पदपङ्क्तिः, [८, १४ (३), २० (३), २८] अष्टम्याश्चतुर्दशीविंश्योस्तृतीयावसानर्चोरष्टाविंश्याश्च त्रिपदा प्राजापत्या त्रिष्टुप्, (१०) दशम्या एकपदोष्णिक्, (११) एकादश्या द्विपदार्षी भुरिक्त्रिष्टुप्, (१२) द्वादश्या आर्षी परानुष्टुप्, [१४ (१)] चतुर्दश्याः प्रथमावसानर्चः साम्नी पङ्क्तिः, (१७) सप्तदश्या द्विपदा विराडार्षी पङ्क्तिः, (१९) एकोनविंश्या द्विपदा विराडार्ची जगती, (२०) विंश्या आसुरी गायत्री, (२३) त्रयोविंश्याश्च निचृदार्षी पङ्क्तिश्छन्दांसि ॥

स उदतिष्ठत्स प्राचीं दिशमनु व्यचलत् ॥१॥
तं बृहच्च रथन्तरं चादित्याश्च विश्वे च देवा अनुव्यचलन् ॥२॥
बृहते च वै स रथन्तराय चादित्येभ्यश्च विश्वेभ्यश्च
देवेभ्य आ वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ॥३॥

सः । उत् । अतिष्ठत् । सः । प्राचीम् । दिशम् । अनु । वि । अचलत् ॥ १ ॥
तम् । बृहत् । च । रथम्ऽतरम् । च । आदित्याः । च । विश्वे । च । देवाः । अनुऽव्यचलन् ॥२॥
बृहते । च । वै । सः । रथम्ऽतराय । च । आदित्येभ्यः । च । विश्वेभ्यः । च । देवेभ्यः । आ । वृश्चते । यः । एवम् । विद्वांसम् । व्रात्यम् । उपऽवदति ॥ ३ ॥

XV.1.6 He became the sole vrātya (the Supreme being); He took hold of a low. That, in very deed, is the rainbow.

XV.1.7 Blue (black) is its belly; red is its back.

XV.1.8 With the blue (black) it covers the disagreeable hostile cousin; with the red it pierce through the hateful enemy, so say the knowledgeable ones.

PARYĀYA - II

XV.2.1 He rose up. He started moving towards the eastern quarter.

XV.2.2 The bṛhat Sāman and the rathāntara Sāman, the old sages and all the enlightened ones started moving following him.

XV.2.3 From the bṛhat Sāman and from the rathāntara Sāman, from the old sages and from all the enlightened ones, is he cut off, whoso reviles such a knowledgeable wandering saint.

बृहतश्च वै स रथन्तरस्य चादित्यानां च विश्वेषां च
देवानां प्रियं धाम भवति तस्य प्राच्यां दिशि ॥४॥
श्रद्धा पुंश्चली मित्रो मागधो विज्ञानं वासोऽहरुष्णीषं
रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः ॥५॥
भूतं च भविष्यच्च परिष्कन्दौ मनो विपथम् ॥६॥
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः ॥७॥
कीर्तिश्च यशश्च पुरःसरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥८॥ (१)
स उदतिष्ठत्स दक्षिणां दिशमनु व्यचलत् ॥९॥
तं यज्ञायज्ञियं च वामदेव्यं च यज्ञश्च यजमानश्च पशवश्चानुव्यचलन् ॥१०॥

बृहतः । च । वै । सः । रथम्ऽतरस्य । च । आदित्यानाम् । च । विश्वेषाम् । च । देवानाम् । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ ४ ॥

तस्य । प्राच्याम् । दिशि । श्रद्धा । पुंश्चली । मित्रः । मागधः । विऽज्ञानम् । वासः । अहः । उष्णीषम् । रात्री । केशाः । हरितौ । प्रऽवर्तौ । कल्मलिः । मणिः ॥ ५ ॥

भूतम् । च । भविष्यत् । च । परिऽस्कन्दौ । मनः । विऽपथम् ॥ ६ ॥

मातरिश्वा । च । पवमानः । च । विपथऽवाहौ । वातः । सारथिः । रेष्मा । प्रऽतोदः । कीर्तिः । च । यशः । च । पुरःऽसरौ ॥ ७ ॥

आ । एनम् । कीर्तिः । गच्छति । आ । यशः । गच्छति । यः । एवम् । वेद ॥ ८ ॥

सः । उत् । अतिष्ठत् । सः । दक्षिणाम् । दिशम् । अनु । वि । अचलत् ॥ ९ ॥

तम् । यज्ञायज्ञियम् । च । वामऽदेव्यम् । च । यज्ञः । च । यजमानः । च । पशवः । च । अनुऽव्यचलन् ॥ १० ॥

XV.2.4 Surely he becomes a favourite of the bṛhat Sāman and the rathāntara Sāman, of the old sages and of all the enlightened ones. In the eastern quarter, he has a pleasing abode.

XV.2.5 The faith becomes his sweet hear, the sun his praise-singer, comprehension his garment, day his turban, night his hair, two rays his two ear-rings, the brightness (of stars) his jewel;

XV.2.6 Both, what has been and what is to be, become his two foot men, the mind his war-chariot;

XV.2.7 The atmosphere wind and the purifying wind (become) his two chariot-horses, the gale his charioteer and the tempest his whip;

XV.2.8 Glory and fame (become) his two fore-runners; to him comes the glory, (to him) comes the fame, who knows it thus.

XV.2.9 He rose up. He started moving towards the southern quarter.

XV.2.10 The yājnayajniya Sāman and the Vāmadevya Saman, the sacrifice, and the sacrificer and the cattle started following him.

यज्ञायज्ञियाय च वै स वामदेव्याय च यज्ञाय च यजमानाय च
पशुभ्यश्चा वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ॥११॥
यज्ञायज्ञियस्य च वै स वामदेव्यस्य च यज्ञस्य च
यजमानस्य च पशूनां च प्रियं धाम भवति तस्य दक्षिणायां दिशि ॥१२॥
उषाः पुंश्चली मन्त्रो मागधो विज्ञानं वासोऽहरुष्णीषं
रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः ॥१३॥
अमावास्या च पौर्णमासी च परिष्कन्दौ मनो विपथम् ।
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः ।
कीर्तिश्च यशश्च पुरःसरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥१४॥ (२)
स उदतिष्ठत्स प्रतीचीं दिशमनु व्यचलत् ॥१५॥
तं वैरूपं च वैराजं चापश्च वरुणश्च राजानुव्यचलन् ॥१६॥
वैरूपाय च वै स वैराजाय चाद्भ्यश्च वरुणाय च
राज्ञ आ वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ॥१७॥

यज्ञायज्ञियाय । च । वै । सः । वामऽदेव्याय । च । यज्ञाय । च । यजमानाय । च ।
पशुऽभ्यः । च । आ । वृश्चते । यः । एवम् । विद्वांसम् । व्रात्यम् । उपऽवदति ॥ ११ ॥

यज्ञायज्ञियस्य । च । वै । सः । वामऽदेव्यस्य । च । यज्ञस्य । च । यजमानस्य । च ।
पशूनाम् । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ १२ ॥

तस्य । दक्षिणायाम् । दिशि । उषाः । पुंश्चली । मन्त्रः । मागधः । विऽज्ञानम् । वासः ।
अहः । उष्णीषम् । रात्री । केशाः । हरितौ । प्रऽवर्तौ । कल्मलिः । मणिः ॥ १३ ॥

अमाऽवास्या । च । पौर्णऽमासी । च ।०।०।० ॥ १४ ॥

सः । उत् । अतिष्ठत् । सः । प्रतीचीम् । दिशम् । अनु । वि । अचलत् ॥ १५ ॥

तम् । वैरूपम् । च । वैराजम् । च । आपः । च । वरुणः । च । राजा । अनुऽव्यचलन् ॥

वैरूपाय । च । वै । सः । वैराजाय । च । अत्ऽभ्यः । च । वरुणाय । च । राज्ञे । आ ।
वृश्चते । यः । एवम् । विद्वांसम् । व्रात्यम् । उपऽवदति ॥ १७ ॥

XV.2.11 From the yajnāyjniya Sāman and from the Vāmadevya Sāman, from the sacrifice and the sacrificer and from the cattle is he cut off, whoso reviles such a knowledgeable, wandering saint.

XV.2.12 Surely he becomes a favourite of the yajnāyajniya Sāman and the Vāmadevya Sāman, of the sacrifice and the sacrificer and of the cattle. In the southern quarter he has a pleasing abode.

XV.2.13 The dawn becomes his sweet heart, the hymn his praise-singer, comprehension his garment, day his turban, night his hair, two rays his two ear-rings, the brightness (of stars) his jewel;

XV.2.14 The night of no moon and the night of full moon (become) his two foot men, the wind his war-chariot; the atmospheric wind and the purified wind (become) his two chariot-horses, the gale his charioteer and the tempest his whip; glory and fame become his two fore-runners; to him comes the glory, (to him) comes the fame, who knows it thus.

XV.2.15 He rose up. He started moving towards the western quarter.

XV.2.16 The Vairūpa Sāman and the vairāja Sāman, the waters and the venerable king started following him.

XV.2.17 From the Vairūpa Sāman and from the Vairāja Sāman, from the waters and from the venerable king is he cut off, whoso reviles such a knowledgeable wandering saint;

वैरूपस्य च वै स वैराजस्य चापां च वरुणस्य च
राज्ञः प्रियं धाम भवति तस्य प्रतीच्यां दिशि ॥१८॥
इरा पुंश्चली हसो मागधो विज्ञानं वासोऽहरुष्णीषं
रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः ॥१९॥
अहश्च रात्री च परिष्कन्दौ मनो विपथम् ।
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः ।
कीर्तिश्च यशश्च पुरःसरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥२०॥ (२)
स उदतिष्ठत्स उदीचीं दिशमनु व्यचलत् ॥२१॥
तं श्यैतं च नौधसं च सप्तर्षयश्च सोमश्च राजानुव्यचलन् ॥२२॥
श्यैताय च वै स नौधसाय च सप्तर्षिभ्यश्च सोमाय च
राज्ञ आ वृश्चते य एवं विद्वांसं व्रात्यमुपवदति ॥२३॥

वैरूपस्य । च । वै । सः । वैराजस्य । च । अपाम् । च । वरुणस्य । च । राज्ञः । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ १८ ॥

तस्य । प्रतीच्याम् । दिशि । इरा । पुंश्चली । हसः । मागधः । विऽज्ञानम् । वासः । अहः । उष्णीषम् । रात्री । केशाः । हरितौ । प्रऽवर्तौ । कल्मलिः । मणिः ॥ १९ ॥

अहः । च । रात्री । च ।०।०।० ॥ २० ॥

सः । उत् । अतिष्ठत् । सः । उदीचीम् । दिशम् । अनु । वि । अचलत् ॥ २१ ॥

तम् । श्यैतम् । च । नौधसम् । च । सप्तऽऋषयः । च । सोमः । च । राजा । अनुऽव्यचलन् ॥ २२ ॥

श्यैताय । च । वै । सः । नौधसाय । च । सप्तर्षिऽभ्यः । च । सोमाय । च । राज्ञे । आ । वृश्चते । यः । एवम् । विद्वांसम् । व्रात्यम् । उपऽवदति ॥ २३ ॥

XV.2.18 Surely he becomes a favourite of the Vairūpa Sāman and the Vairāja Sāman, of the waters and of the venerable king. In the western quarter he has a pleasing abode.

XV.2.19 The earth (irā) becomes his sweet heart, the laughter his praise-singer, comprehension his garment, day his turban, night his hair, two rays his two ear-rings, the brightness (of stars) his jewel;

XV.2.20 The day and the night (become) his two footmen, the mind his war-chariot, the atmospheric wind and the purifying wind (become) his two chariot-horses, the gale his charioteer and the tempest his whip; glory and fame become his two fore-runners; to him comes the glory, (to him) comes the fame, who knows it thus.

XV.2.21 He rose up. He started moving towards the northern quarter.

XV.2.22 The śyaita Sāman and the naudhasa Sāman, the seven seers and the sparkling Soma (the cure juice) started following him.

XV.2.23 From the śyaita Sāman and the naudhasa Saman, from the seven-seers and from the sparkling Soma is he cut off, whoso reviles such a knowledgeable wandering saint.

श्यैतस्य च वै स नौधसस्य च सप्तर्षीणां च सोमस्य च
राज्ञः प्रियं धाम भवति तस्योदीच्यां दिशि ॥२४॥
विद्युत्पुंश्चली स्तनयित्नुर्मागधो विज्ञानं वासोऽहरुष्णीषं
रात्री केशा हरितौ प्रवर्तौ कल्मलिर्मणिः ॥२५॥
श्रुतं च विश्रुतं च परिष्कन्दौ मनो विपथम् ॥२६॥
मातरिश्वा च पवमानश्च विपथवाहौ वातः सारथी रेष्मा प्रतोदः ॥२७॥
कीर्तिश्च यशश्च पुरःसरावैनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥२८॥ (४)

श्यैतस्य । च । वै । सः । नौधसस्य । च । सप्तऽऋषीणाम । च । सोमस्य । च ।
राज्ञः । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ २४ ॥

तस्य । उदीच्याम् । दिशि । विऽद्युत् । पुंश्चली । स्तनयित्नुः । मागधः । विऽज्ञानम् ।
वासः । अहः । उष्णीषम् । रात्री । केशाः । हरितौ । प्रऽवर्तौ । कल्मलिः । मणिः ॥२५॥

श्रुतम् । च । विऽश्रुतम् । च । परिऽस्कन्दौ । मनः । विऽपथम् ॥ २६ ॥

मातरिश्वा । च । पवमानः । च । विपथऽवाहौ । वातः । सारथिः । रेष्मा । प्रऽतोदः ।
कीर्तिः । च । यशः । च । पुरःऽसरौ ॥२७॥

आ । एनम् । कीर्तिः । गच्छति । आ । यशः । गच्छति । यः । एवम् । वेद ॥ २८ ॥ [४]

[३] तृतीयः पर्यायः

(१-११) एकादशर्चस्यास्य पर्यायस्य (१) प्रथमर्चः पिपीलिकमध्या गायत्री, (२) द्वितीयायाः साम्न्युष्णिक्, (३) तृतीयाया याजुषी जगती, (४) चतुर्थ्या द्विपदार्च्युष्णिक्, (५) पञ्चम्या आर्ची बृहती, (६) षष्ठ्या आसुर्यनुष्टुप्, (७) सप्तम्याः साम्नी गायत्री, (८) अष्टम्या आसुरी पङ्क्तिः, (९) नवम्या आसुरी जगती, (१०) दशम्याः प्राजापत्या त्रिष्टुप्, (११) एकादश्याश्च विराड्गायत्री छन्दांसि ॥

स संवत्सरमूर्ध्वोऽतिष्ठत्तं देवा अब्रुवन्व्रात्य किं नु तिष्ठसीति ॥१॥

सः । सम्ऽवत्सरम् । ऊर्ध्वः । अतिष्ठत् । तम् । देवाः । अब्रुवन् । व्रात्य । किम् । नु । तिष्ठसि । इति ।

XV.2.24 Surely he becomes a favourite of the śyaita Sāman and the naudhasa Sāman, of the seven-seers and of the sparkling Soma (the cure-juice). In the northern quarter he has a pleasing abode.

XV.2.25 The brightening becomes his sweet-heart, the thunder-cloud his praise-singer, comprehension his garment, day his turban, night his hair, two rays his two ear-rings, the brightness (of stars) his jewel;

XV.2.26 What is heard and what is listened (become) his two footmen, the mind his war-chariot;

XV.2.27 The atmospheric wind and the purifying wind (become) his two chariot-horses, the gale his charioteer and the tempest his whip;

XV.2.28 Glory and fame become his two forerunners; to him comes the glory, (to him) comes the fame, who knows it thus.

PARYĀYA - III

Vrātyāḥ

XV.3.1 He remained standing erect for a year. The enlightened ones asked him : "O wandering saint, why do you remain standing?"

सोऽब्रवीदासन्दीं मे सं भरन्त्विति ॥२॥
तस्मै व्रात्यायासन्दीं समभरन् ॥३॥
तस्या ग्रीष्मश्च वसन्तश्च द्वौ पादावास्तां शरच्च वर्षाश्च द्वौ ॥४॥
बृहच्च रथंतरं चानूच्ये३ आस्तां यज्ञायज्ञियं च वामदेव्यं च तिरश्च्ये३ ॥५॥
ऋचः प्राञ्चस्तन्तवो यजूंषि तिर्यञ्चः ॥६॥
वेद आस्तरणं ब्रह्मोपबर्हणम् ॥७॥
सामासाद उद्गीथोऽपश्रयः ॥८॥
तामासन्दीं व्रात्य आरोहत् ॥९॥

सः । अब्रवीत् । आऽसन्दीम् । मे । सम् । भरन्तु । इति ॥ २ ॥

तस्मै । व्रात्याय । आऽसन्दीम् । सम् । अभरन् ॥ ३ ॥

तस्याः । ग्रीष्मः । च । वसन्तः । च । द्वौ । पादौ । आस्ताम् । शरत् । च । वर्षाः । च । द्वौ ॥

बृहत् । च । रथम्ऽतरम् । च । अनुच्ये३ इति । आस्ताम् । यज्ञायज्ञियम् । च ।
वामऽदेव्यम् । च । तिरश्च्ये३ इति ॥ ५ ॥

ऋचः । प्राञ्चः । तन्तवः । यजूंषि । तिर्यञ्चः ॥ ६ ॥

वेदः । आऽस्तरणम् । ब्रह्म । उपऽबर्हणम् ॥ ७ ॥

साम । आऽसादः । उत्ऽगीथः । अपऽश्रयः ॥ ८ ॥

ताम् । आऽसन्दीम् । व्रात्यः । आ । अरोहत् ॥ ९ ॥

XV.3.2 He said : "Let them bring a settee for me."

XV.3.3 For that wandering saint they brought a settee.

XV.3.4 Summer and spring were the two feet of that (settee). Autumn and the rains were the other two feet.

XV.3.5 The bṛhat Sāman and the rathāntara Sāman were the two elbow-pieces and the yajnāyajniya Sāman and the Vāmadevya Sāman were the two cross-boards.

XV.3.6 The Ṛk verses were the lengthwise strings and the Yajus (sacrificial formulas) the crosswise strings.

XV.3.7 The Veda (the sacred knowledge) was the carpet and the prayer the pillow.

XV.3.8 The Sāman was the seat and Udgītha (Saman Chanting) the support.

XV.3.9 The Vrātya (the wandering saint) ascended that settee.

तस्य देवजनाः परिष्कन्दा आसन्त्संकल्पाः प्रहाय्याऽ३ विश्वानि भूतान्युपसदः ॥१०॥
विश्वान्येवास्य भूतान्युपसदो भवन्ति य एवं वेद ॥११॥

तस्य । देवऽजनाः । परिऽस्कन्दाः । आसन् । समऽकल्पाः । प्रऽहाय्याः । विश्वानि । भूतानि । उपऽसदः ॥ १० ॥

विश्वानि । एव । अस्य । भूतानि । उपऽसदः । भवन्ति । यः । एवम् । वेद ॥ ११ ॥

[४] चतुर्थः पर्यायः

(१–१८) अष्टादशर्चस्यास्य पर्यायस्य (१, १३, १६) प्रथमात्रयोदशीषोडशीनामृचां दैवी जगती, (२, ८) द्वितीयाष्टम्योरार्च्यनुष्टुप्, (३, १२) तृतीयाद्वादश्योर्द्विपदा प्राजापत्या जगती, (४, ७, १०) चतुर्थीसप्तमीदशमीनां प्राजापत्या गायत्री, (५) पञ्चम्याः प्राजापत्या पङ्क्तिः, (६) षष्ठ्या आर्ची जगती, (९) नवम्या आर्ची त्रिष्टुप् (भौमा), (११) एकादश्याः साम्नी त्रिष्टुप्, (१४) चतुर्दश्याः प्राजापत्या बृहती, (१५, १८) पञ्चदश्यष्टादश्योर्द्विपदार्ची पङ्क्तिः, (१७) सप्तदश्याश्चार्च्युष्णिक् छन्दांसि ॥

तस्मै प्राच्या दिशः ॥१॥
वासन्तौ मासौ गोप्तारावकुर्वन्बृहच्च रथंतरं चानुष्ठातारौ ॥२॥
वासन्तावेनं मासौ प्राच्या दिशो गोपायतो बृहच्च
रथंतरं चानु तिष्ठतो य एवं वेद ॥३॥ (१)
तस्मै दक्षिणाया दिशः ॥४॥
ग्रैष्मौ मासौ गोप्तारावकुर्वन्यज्ञायज्ञियं च वामदेव्यं चानुष्ठातारौ ॥५॥

तस्मै । प्राच्याः । दिशः ॥ १ ॥

वासन्तौ । मासौ । गोप्तारौ । अकुर्वन् । बृहत् । च । रथम्ऽतरम् । च । अनुऽस्थातारौ ॥२॥

वासन्तौ । एनम् । मासौ । प्राच्याः । दिशः । गोपायतः । बृहत् । च । रथम्ऽतरम् । च । अनु । तिष्ठतः । यः । एवम् । वेद ॥ ३ ॥

तस्मै । दक्षिणायाः । दिशः ॥ ४ ॥

ग्रैष्मौ । मासौ । गोप्तारौ । अकुर्वन् । यज्ञायज्ञियम् । च । वामऽदेव्यम् । च । अनुऽस्थातारौ ॥

XV.3.10 The godly people became his footmen, solemn vows his messengers and all the beings his attendants.

XV.3.11 All the beings become his attendants,whoever knows it thus.

PARYĀYA IV

XV.4.1 For him of (from) the eastern quarter;

XV.4.2 They made the two spring-months protectors and the brhat and the rathāntara Sāmans attendants.

XV.4.3 The two spring months protect (him) from the eastern quarter and the bṛhat and the rathāntara Sāmans attend him, who knows it thus.

XV.4.4 For him of (from) the southern quarter;

XV.4.5 They made the two summer-months protectors and the yajnāyajniya and the vāmadevya Sāmans attendants.

ग्रैष्मावेनं मासौ दक्षिणाया दिशो गोपायतो यज्ञायज्ञियं च
वामदेव्यं चानु तिष्ठतो य एवं वेद ॥६॥ (२)
तस्मै प्रतीच्या दिशः ॥७॥
वार्षिकौ मासौ गोप्तारावकुर्वन्वैरूपं च वैराजं चानुष्ठातारौ ॥८॥
वार्षिकावेनं मासौ प्रतीच्या दिशो गोपायतो वैरूपं च
वैराजं चानु तिष्ठतो य एवं वेद ॥९॥ (३)
तस्मा उदीच्या दिशः ॥१०॥
शारदौ मासौ गोप्तारावकुर्वञ्छ्यैतं च नौधसं चानुष्ठातारौ ॥११॥
शारदावेनं मासावुदीच्या दिशो गोपायतः श्यैतं च
नौधसं चानु तिष्ठतो य एवं वेद ॥१२॥ (४)

ग्रैष्मौ । एनम् । मासौ । दक्षिणायाः । दिशः । गोपायतः । यज्ञायज्ञियम । च । वामऽदेव्यम् । च । अनु । तिष्ठतः । यः । एवम् । वेद ॥ ६ ॥

तस्मै । प्रतीच्याः । दिशः ॥ ७ ॥

वार्षिकौ । मासौ । गोप्तारौ । अकुर्वन् । वैरूपम् । च । वैराजम् । च । अनुऽस्थातारौ ॥

वार्षिकौ । एनम् । मासौ । प्रतीच्याः । दिशः । गोपायतः । वैरूपम् । च । वैराजम् । च । अनु । तिष्ठतः । यः । एवम् । वेद ॥ ९ ॥

तस्मै । उदीच्याः । दिशः ॥ १० ॥

शारदौ । मासौ । गोप्तारौ । अकुर्वन् । श्यैतम् । च । नौधसम् । च । अनुऽस्थातारौ ।

शारदौ । एनम् । मासौ । उदीच्याः । दिशः । गोपायतः । श्यैतम् । च । नौधसम् । च । अनु । तिष्ठतः । यः । एवम । वेद ॥ १२ ॥

XV.4.6 The two summer-months protect (him) from the southern quarter and the yajnāyajniya Sāmans attend him, who knows it thus.

XV.4.7 For him of (from) the western quarter;

XV.4.8 They made the two rainy months protectors and the Vairūpa and the Vairāja Sāmans attendants.

XV.4.9 The two rainy months protect (him) from the western quarter and the vairūpa and the vairāja Sāmans attend him, who knows it thus.

XV.4.10 For him of (from) the northern quarter;

XV.4.11 They made the two autumn months protectors and the śyaita and the naudhasa Sāmans attendants.

XV.4.12 The two autumn months protect (him) from the northern quarter and the śyaita and the naudhasa Sāmans attend him, who knows it thus.

तस्मै ध्रुवाया दिशः ॥१३॥
हैमनौ मासौ गोप्तारावकुर्वन्भूमिं चाग्निं चानुष्ठातारौ ॥१४॥
हैमनावेनं मासौ ध्रुवाया दिशो गोपायतो
भूमिश्चाग्निश्चानु तिष्ठतो य एवं वेद ॥१५॥ (४)
तस्मा ऊर्ध्वाया दिशः ॥१६॥
शैशिरौ मासौ गोप्तारावकुर्वन्दिवं चादित्यं चानुष्ठातारौ ॥१७॥
शैशिरावेनं मासावूर्ध्वाया दिशो गोपायतो
द्यौश्चादित्यश्चानु तिष्ठतो य एवं वेद ॥१८॥ (६)

तस्मै । ध्रुवायाः । दिशः ॥ १३ ॥

हैमनौ । मासौ । गोप्तारौ । अकुर्वन् । भूमिम् । च । अग्निम् । च । अनुऽस्थातारौ ॥१४॥

हैमनौ । एनम् । मासौ । ध्रुवायाः । दिशः । गोपायतः । भूमिः । च । अग्निः । च । अनु । तिष्ठतः । यः । एवम् । वेद ॥१५॥

तस्मै । ऊर्ध्वायाः । दिशः ॥ १६ ॥

शैशिरौ । मासौ । गोप्तारौ । अकुर्वन् । दिवम् । च । आदित्यम् । च । अनुऽस्थातारौ ॥

शैशिरौ । एनम् । मासौ । ऊर्ध्वायाः । दिशः । गोपायतः । द्यौः । च । आदित्यः । च । अनु । तिष्ठतः । यः । एवम् । वेद ॥ १८ ॥

[५] पञ्चमः पर्यायः

(१–१६) षोडशर्चस्यास्य पर्यायस्य (१) प्रथमर्चस्त्रिपदा समविषमा गायत्री, (२) द्वितीयायास्त्रिपदा भुरिगार्ची त्रिष्टुप्, [३, ५ (२), ७ (२), ९ (२), ११ (२), १३ (२), १६] तृतीयायाः पञ्चमीसप्तमीनवम्येकादशीत्रयोदशीनां द्वितीयावसानर्चां षोडश्याश्च द्विपदा प्राजापत्यानुष्टुप्, (४) चतुर्थ्यास्त्रिपदा स्वराट् प्राजापत्या पङ्क्तिः, [५ (१), ७ (१), ९ (१), १३ (१)] पञ्चमीसप्तमीनवमीत्रयोदशीनां प्रथमावसानर्चां त्रिपदा ब्राह्मी गायत्री, (६, ८, १२) षष्ठ्यष्टमीद्वादशीनां त्रिपदा ककुप्, (१०, १४) दशमीचतुर्दश्योर्भुरिग्विषमा गायत्री, [११ (१)] एकादश्याः प्रथमावसानर्चो निचृद्ब्राह्मी गायत्री, (१५) पञ्चदश्याश्च विराट् छन्दांसि ॥

तस्मै प्राच्या दिशो अन्तर्देशाद्भवमिष्वासमनुष्ठातारमकुर्वन् ॥१॥

तस्मै । प्राच्याः । दिशः । अन्तःऽदेशात् । भवम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥

XV.4.13 For him of (from) the nadir quarter,

XV.4.14 They made the two winter-months protectors and earth and fire attendants.

XV.4.15 The two winter-months protect (him) from the nadir quarter and earth and fire attend him, who knows it thus.

XV.4.16 For him of (from) the zenith quarter,

XV.4.17 they made the two frosty months protectors and sky and the sun attendants.

XV.4.18 The two frosty months protect (him) from the zenith quarter and sky and the sun attend him, who knows it thus.

PARYĀYA - V

Ruḍraḥ

XV.5.1 For him, from the intermediate region of the eastern quarter, they have made the archer Bhava (the Lord of existence) the attendant.

भव एनमिष्वासः प्राच्या दिशो अन्तर्देशादनुष्ठातानु
तिष्ठति नैनं शर्वो न भवो नेशानः ॥२॥
नास्य पशून्न समानान्हिनस्ति य एवं वेद ॥३॥ (१)
तस्मै दक्षिणाया दिशो अन्तर्देशाच्छर्वमिष्वासमनुष्ठातारमकुर्वन् ॥४॥
शर्व एनमिष्वासो दक्षिणाया दिशो अन्तर्देशादनुष्ठातानु
तिष्ठति नैनं शर्वो न भवो नेशानः ।
नास्य पशून्न समानान्हिनस्ति य एवं वेद ॥५॥ (२)
तस्मै प्रतीच्या दिशो अन्तर्देशात्पशुपतिमिष्वासमनुष्ठातारमकुर्वन् ॥६॥
पशुपतिरेनमिष्वासः प्रतीच्या दिशो अन्तर्देशादनुष्ठातानु
तिष्ठति नैनं शर्वो न भवो नेशानः ।
नास्य पशून्न समानान्हिनस्ति य एवं वेद ॥७॥ (३)

भवः । एनम् । इषुऽआसः । प्राच्याः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति ॥२॥
न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य । पशून् । न । समानान् ।
हिनस्ति । यः । एवम् । वेद ॥ ३ ॥
तस्मै । दक्षिणायाः । दिशः । अन्तःऽदेशात् । शर्वम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥
शर्वः । एनम् । इषुऽआसः । दक्षिणायाः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु ।
तिष्ठति । न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य ।०॥ ५ ॥
तस्मै । प्रतीच्याः । दिशः । अन्तःऽदेशात् । पशुऽपतिम् । इषुऽआसम् । अनुऽस्थातारम् ।
अकुर्वन् ॥ ६ ॥
पशुऽपतिः । एनम् । इषुऽआसः । प्रतीच्याः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता ।
अनु । तिष्ठति । न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य ।०॥७ ॥

XV.5.2 The archer Bhava stands as an attendant to attend him from the intermediate region of the eastern quarter. Neither Śarva, nor Bhava, nor Īśāna -

XV.5.3 does any harm to him, who knows it thus, nor to his animals, nor to his kinsmen.

XV.5.4 For him, from the intermediate region of the southern quarter, they have made the archer Śarva (the Lord of destruction) the attendant.

XV.5.5 The archer Śarva stands as an attendant to attend him from the intermediate region of the southern quarter. Neither Śarva, nor Bhava, nor Īśāna - does harm to him, who knows it thus, nor to his animals, nor to his kinsmen.

XV.5.6 For him, from the intermediate region of the western quarter, they have made the archer Paśupati (the Lord of animals) the attendant.

XV.5.7 The archer Paśupati stands as an attendant to attend him from the intermediate region of the western quarter. Neither Śarva, nor Bhava, nor Īśāna - does any harm to him, who knows it thus, nor to his animals, nor to his kinsmen.

तस्मा उदीच्या दिशो अन्तर्देशादुग्रं देवमिष्वासमनुष्ठातारमकुर्वन् ॥८॥
उग्र एनं देव इष्वास उदीच्या दिशो अन्तर्देशादनुष्ठातानु
तिष्ठति नैनं शर्वो न भवो नेशानः ।
नास्य पशून्न समानान्हिनस्ति य एवं वेद ॥९॥ (४)
तस्मै ध्रुवाया दिशो अन्तर्देशाद्रुद्रमिष्वासमनुष्ठातारमकुर्वन् ॥१०॥
रुद्र एनमिष्वासो ध्रुवाया दिशो अन्तर्देशादनुष्ठातानु
तिष्ठति नैनं शर्वो न भवो नेशानः ।
नास्य पशून्न समानान्हिनस्ति य एवं वेद ॥११॥ (५)
तस्मा ऊर्ध्वाया दिशो अन्तर्देशान्महादेवमिष्वासमनुष्ठातारमकुर्वन् ॥१२॥
महादेव एनमिष्वास ऊर्ध्वाया दिशो अन्तर्देशादनुष्ठातानु
तिष्ठति नैनं शर्वो न भवो नेशानः ।
नास्य पशून्न समानान्हिनस्ति य एवं वेद ॥१३॥ (६)
तस्मै सर्वेभ्यो अन्तर्देशेभ्य ईशानमिष्वासमनुष्ठातारमकुर्वन् ॥१४॥

तस्मै । उदीच्याः । दिशः । अन्तःऽदेशात् । उग्रम् । देवम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥ ८ ॥

उग्रः । एनम् । देवः । इषुऽआसः । उदीच्याः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति । न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य ।०॥ ९ ॥

तस्मै । ध्रुवायाः । दिशः । अन्तःऽदेशात् । रुद्रम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥

तिष्ठति । न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य ।०। ॥ ११ ॥

तस्मै । ऊर्ध्वायाः । दिशः । अन्तःऽदेशात् । महाऽदेवम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥

महाऽदेवः । एनम् । इषुऽआसः । ऊर्ध्वायाः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति । न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य ।० ॥१३॥

तस्मै । सर्वेभ्यः । अन्तःऽदेशेभ्यः । ईशानम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥१४ ॥

XV.5.8 For him, from the intermediate region of the northern quarter, they have made the archer Ugra deva (the fierce deity) the attendant.

XV.5.9 The archer Ugra deva stands as an attendant to attend him from the intermediate region of the northern quarter. Neither śarva, nor Bhava, nor Īśāna - does any harm to him, who knows it thus, nor to his animals, nor to his kinsman.

XV.5.10 For him, from the intermediate region of the nadir quarter, they have made the archer Rudra (the terrible punisher) the attendant.

XV.5.11 The archer Rudra stands as an attendant to attend him from the intermediate region of the nadir quarter. Neither Śarva, nor Bhava, nor Īśāna - does any harm to him, who knows it thus, nor to his animals, nor to his kinsmen.

XV.5.12 For him, from the intermediate region of the zenith quarter, they have made the archer Mahādeva (the great Lord) the attendant.

XV.5.13 The archer Mahādeva stands as an attendant to attend him from the intermediate region of the zenith quarter. Neither Śarva, nor Bhava, nor Īśāna - does any harm to him, who knows it thus, nor to his animals, nor to his kinsmen.

XV.5.14 For him, from all the intermediate regions, they have made the archer Īśāna (the master Lord) the attendant.

ईशान एनमिष्वासः सर्वेभ्यो अन्तर्देशेभ्योनुष्ठातानु
तिष्ठति नैनं शर्वो न भवो नेशानः ॥१५॥
नास्य पशून्न समानान्हिनस्ति य एवं वेद ॥१६॥ (७)

ईशानः । एनम् । इषुऽआसः । सर्वेभ्यः । अन्तःऽदेशेभ्यः । अनुऽस्थाता । अनु । तिष्ठति ॥
न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य । पशून् । न । समानान्' ।
हिनस्ति । यः । एवम् । वेद ॥ १६ ॥

[६] षष्ठः पर्यायः

(१-२६) षड्विंशत्यृचस्यास्य पर्यायस्य (१, ४) प्रथमाचतुर्थ्योर्ऋचोरासुरी पङ्क्तिः, (२, १७) द्वितीयासप्तदश्योरार्ची पङ्क्तिः, (३) तृतीयाया आर्षी पङ्क्तिः, (५, ११) पञ्चम्येकादश्योः साम्नी त्रिष्टुप्, (६, १२) षष्ठीद्वादश्योर्निचृद्बृहती, (७, १०, १३, १६, २४) सप्तमीदशमीत्रयोदशीषोडशीचतुर्विंशीनामासुरी बृहती, (८) अष्टम्याः साम्नी पङ्क्तिः, (९) नवम्याः प्राजापत्या त्रिष्टुप्, (१४, २३) चतुर्दशीत्रयोविंश्योरार्ची त्रिष्टुप्, (१५, १८) पञ्चदश्यष्टादश्योर्विराड्जगती, (१९) एकोनविंश्या आर्च्युष्णिक्, (२०) विंश्याः साम्न्यनुष्टुप्, (२१) एकविंश्या आर्ची बृहती, (२२) द्वाविंश्याः परोष्णिक्, (२५) पञ्चविंश्या आर्च्यनुष्टुप्, (२६) षड्विंश्याश्च विराड्बृहती छन्दांसि ॥

स ध्रुवां दिशमनु व्यचलत् ॥१॥
तं भूमिश्चाग्निश्चौषधयश्च वनस्पतयश्च वानस्पत्याश्च वीरुधश्चानुव्यचलन् ॥२॥
भूमेश्च वै सोऽग्नेश्चौषधीनां च वनस्पतीनां च वानस्पत्यानां
च वीरुधां च प्रियं धाम भवति य एवं वेद ॥३॥ (१)
स ऊर्ध्वां दिशमनु व्यचलत् ॥४॥
तमृतं च सत्यं च सूर्यश्च चन्द्रश्च नक्षत्राणि चानुव्यचलन् ॥५॥

सः । ध्रुवाम् । दिशम् । अनु । वि । अचलत् ॥ १ ॥

तम् । भूमिः । च । अग्निः । च । ओषधयः । च । वनस्पतयः । च । वानस्पत्याः ।
च । वीरुधः । च । अनुऽव्यचलन् ॥ २ ॥

भूमेः । च । वै । सः । अग्नेः । च । ओषधीनाम् । च । वनस्पतीनाम् । च । वानस्पत्यानाम् । च । वीरुधाम् । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ ३ ॥

सः । ऊर्ध्वाम् । दिशम् । अनु । वि । अचलत् ॥ ४ ॥

तम् । ऋतम् । च । सत्यम् । च । सूर्यः । च । चन्द्रः । च । नक्षत्राणि । च । अनुऽव्यचलन् ॥

XV.5.15 The archer Īśāna stands as an attendant to attend him from all the intermediate regions. Neither Śarva, nor Bhava, nor Īśāna -

XV.5.16 does any harm to him, who knows it thus, nor to his animals, nor to his kinsmen.

PARYĀYA - VI

Vrātyāḥ

XV.6.1 He started moving towards the nadir quarter.

XV.6.2 Earth and fire, herbs and trees, plants and shrubs started following him.

XV.6.3 Surely he, who knows it thus, becomes a pleasing abode of earth and fire of herbs and trees and of plants and shrubs.

XV.6.4 He started moving towards the zenith quarter.

XV.6.5 Righteousness and truth, sun and moon, and stars started following him.

ऋतस्य च वै स सत्यस्य च सूर्यस्य च चन्द्रस्य च
नक्षत्राणां च प्रियं धाम भवति य एवं वेद ॥६॥ (२)
स उत्तमां दिशमनु व्यचलत् ॥७॥
तमृचश्च सामानि च यजूंषि च ब्रह्म चानुव्यचलन् ॥८॥
ऋचां च वै स साम्नां च यजुषां च ब्रह्मणश्च प्रियं धाम भवति य एवं वेद ॥९॥ (३)
स बृहतीं दिशमनुव्यचलत् ॥१०॥
तमितिहासश्च पुराणं च गाथाश्च नाराशंसीश्चानुव्यचलन् ॥११॥
इतिहासस्य च वै स पुराणस्य च गाथानां च नाराशंसीनां च
प्रियं धाम भवति य एवं वेद ॥१२॥ (४)
स परमां दिशमनु व्यचलत् ॥१३॥

ऋतस्य । च । वै । सः । सत्यस्य । च । सूर्यस्य । च । चन्द्रस्य । च । नक्षत्राणाम् ।
च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ ६ ॥

सः । उत्ऽतमाम् । दिशम् । अनु । वि । अचलत् ॥ ७ ॥

तम् । ऋचः । च । सामानि । च । यजूंषि । च । ब्रह्म । च । अनुऽव्यचलन् ॥ ८ ॥

ऋचाम् । च । वै । सः । साम्नाम् । च । यजुषाम । च । ब्रह्मणः । च । प्रियम् । धाम ।
भवति । यः । एवम् । वेद ॥ ९ ॥ [३]

सः । बृहतीम् । दिशम् । अनु । वि । अचलत् ॥ १० ॥

तम् । इतिहऽआसः । च । पुराणम् । च । गाथाः । च । नाराशंसीः । च । अनुऽव्यचलन् ॥

इतिहऽआसस्य । च । वै । सः । पुराणस्य । च । गाथानाम् । च । नाराशंसीनाम् ।
च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ १२ ॥

सः । परमाम् । दिशम् । अनु । वि । अचलत् ॥ १३ ॥

XV.6.6 Surely he, who knows it thus, becomes a pleasing anode of righteousness and truth, of sun and moon and of stars.

XV.6.7 He started moving towards the uppermost quarter.

XV.6.8 Ṛk verses and Sāman chants, yajus (sacrificial formulas) and the sacred knowledge started following him.

XV.6.9 Surely he, who knows it thus, becomes a pleasing abode of Ṛk verses and Sāman chants, of Yajus and the sacred knowledge.

XV.6.10 He started moving towards the lofty quarter.

XV.6.11 Itihāsa (history) and Purāṇa (stories of ancient times),Gāthās (legends) and Nārāśansīs (biographies of men) started following him.

XV.6.12 Surely he, who knows it thus, becomes a pleasing abode of Itihāsa and Purāṇās, ofGāthas andNaraśansīs.

XV.6.13 He started moving towards the supreme quarter.

तमाहवनीयश्च गार्हपत्यश्च दक्षिणाग्निश्च यज्ञश्च यजमानश्च पशवश्चानुव्यचलन् ॥१४॥

आहवनीयस्य च वै स गार्हपत्यस्य च दक्षिणाग्नेश्च यज्ञस्य च
यजमानस्य च पशूनां च प्रियं धाम भवति य एवं वेद ॥१५॥ (५)

सोनादिष्टां दिशमनु व्यचलत् ॥१६॥

तमृतवश्चार्तवाश्च लोकाश्च लौक्याश्च मासाश्चार्धमासाश्चाहोरात्रे चानुव्यचलन् ॥१७॥

ऋतूनां च वै स आर्तवानां च लोकानां च लौक्यानां च मासानां
चार्धमासानां चाहोरात्रयोश्च प्रियं धाम भवति य एवं वेद ॥१८॥ (६)

सोनावृत्तां दिशमनु व्यचलत्ततो नावर्त्स्यन्नमन्यत ॥१९॥

तं दितिश्चादितिश्चेडा चेन्द्राणी चानुव्यचलन् ॥२०॥

तम् । आऽहवनीयः । च । गार्हऽपत्यः । च । दक्षिणऽअग्निः । च । यज्ञः । च । यजमानः । च । पशवः । च । अनुऽव्यचलन् ॥ १४ ॥

आऽहवनीयस्य । च । वै । सः । गार्हऽपत्यस्य । च । दक्षिणऽअग्नेः । च । यज्ञस्य । च । यजमानस्य । च । पशूनाम् । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ १५ ॥

सः । अनादिष्टाम् । दिशम् । अनु । वि । अचलत् ॥ १६ ॥

तम् । ऋतवः । च । आर्तवाः । च । लोकाः । च । लौक्याः । च । मासाः च । अर्ध-ऽमासाः । च । अहोरात्रे इति । च । अनुऽव्यचलन् ॥ १७ ॥

ऋतूनाम् । च । वै । सः । आर्तवानाम् । च । लोकानाम् । च । लौक्यानाम् । च । मासानाम । च । अर्धऽमासानाम् । च । अहोरात्रयोः । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ १८ ॥

सः । अनावृत्ताम् । दिशम् । अनु । वि। अचलत् । ततः । न । आऽवर्त्स्यन् । अमन्यत ॥

तम् । दितिः । च । अदितिः । च । इडा । च । इन्द्राणी । च । अनुऽव्यचलन् ॥२०॥

XV.6.14 Āhavanīya (sacrificial fire) and garhapatya (house-holder's fire), dakśināgni (southern fire) and the sacrifice, the sacrificer and the animals started following him.

XV.6.15 Surely he, who knows it thus, becomes a pleasing abode of Āhavanīya and garhapatya, of dakśināgni and the sacrifice, and of the sacrificer and the animals.

XV.6.16 He started moving towards the unspecified quarter.

XV.6.17 Seasons and groups of seasons, Lokas (people) and Laukyas (communities), months and half months, days and nights started following him.

XV.6.18 Surely he, who knows it thus, becomes a pleasing abode of seasons and groups of seasons, of Lokas and Lokyas, of months and half-months, and of days and nights.

XV.6.19 He started moving towards the quarter of no return. He resolved not to return therefrom.

XV.6.20 Diti (bondage) and Aditi (freedom), Iḍa and Indrāṇi started following him.

दितेश्च वै सोदितेश्चेडायाश्चेन्द्राण्याश्च प्रियं धाम भवति य एवं वेद ॥२१॥ (७)
स दिशोनु व्यचलत्तं विराडनु व्यचलत्सर्वे च देवाः सर्वाश्च देवताः ॥२२॥
विराजश्च वै स सर्वेषां च देवानां सर्वासां च देवतानां प्रियं धाम भवति य एवं वेद ॥२३॥ (८)
स सर्वानन्तर्देशाननु व्यचलत् ॥२४॥
तं प्रजापतिश्च परमेष्ठी च पिता च पितामहश्चानुव्यचलन् ॥२५॥
प्रजापतेश्च वै स परमेष्ठिनश्च पितुश्च पितामहस्य
च प्रियं धाम भवति य एवं वेद ॥२६॥ (९)

दितेः । च । वै । सः । अदितेः । च । इडायाः । च । इन्द्राण्याः । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ २१ ॥

सः । दिशः । अनु । वि । अचलत् । तम् । विऽराट् । अनु । वि । अचलत् । सर्वे । च । देवाः । सर्वाः । च । देवताः ॥ २२ ॥

विऽराजः । च । वै । सः । सर्वेषाम् । च । देवानाम् । सर्वासाम् । च । देवतानाम् । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ २३ ॥

सः । सर्वान् । अन्तःऽदेशान् । अनु । वि । अचलत् ॥ २४ ॥

तम् । प्रजाऽपतिः । च । परमेऽस्थी । च । पिता । च । पितामहः । च । अनुऽव्यचलन् ॥

प्रजाऽपतेः । च । वै । सः । परमेऽस्थिनः । च । पितुः । च । पितामहस्य । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ २६ ॥

XV.6.21 Surely he, who knows it thus, becomes a pleasing abode of Diti and Aditi, of Iḍa and Indrāṇi.

XV.6.22 He started moving towards the directions. Virāj (the cosmic cow) started following him, and also all the enlightened ones and all the bounties of Nature.

XV.6.23 Surely he, who knows it thus, becomes a pleasing abode of virāj, of all the enlightened ones and of all the bounties of Nature.

XV.6.24 He started moving towards all the intermediate regions.

XV.6.25 Prajāpati (Lord of creatures) and Parameśthi (the Lord dwelling in the highest abode), the father and the grandfather started following him.

XV.6.26 Surely he, who knows it thus, becomes a pleasing abode of Prajāpati and of Parameśthi, of the father and the grandfather.

[७] सप्तमः पर्यायः

(१–५) पञ्चर्चस्यास्य पर्यायस्य (१) प्रथमर्चस्त्रिपदा निचृद्गायत्री, (२) द्वितीयाया एकपदा विराड्बृहती, (३) तृतीयाया विराडुष्णिक्, (४) चतुर्थ्या एकपदा गायत्री, (५) पञ्चम्याश्च पङ्क्तिश्छन्दांसि ॥

स महिमा सद्रुर्भूत्वान्तं पृथिव्या अगच्छत्स समुद्रोऽभवत् ॥१॥

तं प्रजापतिश्च परमेष्ठी च पिता च पितामहश्चापश्च श्रद्धा च
वर्षं भूत्वानुव्यवर्तयन्त ॥२॥

ऐनमापो गच्छन्त्यैनं श्रद्धा गच्छत्यैनं वर्षं गच्छति य एवं वेद ॥३॥

तं श्रद्धा च यज्ञश्च लोकश्चान्नं चान्नाद्यं च भूत्वाभिपर्यावर्तन्त ॥४॥

ऐनं श्रद्धा गच्छत्यैनं यज्ञो गच्छत्यैनं लोको गच्छत्यैनमन्नं
गच्छत्यैनमन्नाद्यं गच्छति य एवं वेद ॥५॥

सः । महिमा । सद्रुः । भूत्वा । अन्तम् । पृथिव्याः । अगच्छत् । सः । समुद्रः । अभवत् ॥

तम् । प्रजाऽपतिः । च । परमेऽस्थी । च । पिता । च । पितामहः । च । आपः । च । श्रद्धा । च । वर्षम् । भूत्वा । अनुऽव्यवर्तयन्त ॥ २ ॥

आ । एनम् । आपः । गच्छन्ति । आ । एनम् । श्रद्धा । गच्छति । आ । एनम् । वर्षम् । गच्छति । यः । एवम् । वेद ॥ ३ ॥

तम् । श्रद्धा । च । यज्ञः । च । लोकः । च । अन्नम् । च । अन्नऽअद्यम् । च । भूत्वा । अभिऽपर्यावर्तन्त ॥ ४ ॥

आ । एनम् । श्रद्धा । गच्छति । आ । एनम् । यज्ञः । गच्छति । आ । एनम् । लोकः । गच्छति । आ । एनम् । अन्नम् । गच्छति । आ । एनम् । अन्नऽअद्यम् । गच्छति । यः । एवम् । वेद ॥ ५ ॥

PARYĀYA - VII

Vrātyaḥ

XV.7.1 He, the majesty personified, becoming fluid went to the end of the earth. He becomes Ocean.

XV.7.2 The Lord of the creatures, and the Lord dwelling in the highest abode, and the father, and the grand-father, the waters and faith, taking the form of the rain, followed him carefully.

XV.7.3 Water comes to him, faith comes to him, the rain comes to him, who knows it thus.

XV.7.4 Faith and sacrifice and free movement turned towards and surrounded him taking the form of food and edibles.

XV.7.5 To him, who knows it thus, comes faith and sacrifice; to him comes free movement; to him comes the food; to him come the edibles.

[८] अष्टमः पर्यायः

(१-३) तृचस्यास्य पर्यायस्य प्रथमर्चः साम्न्युष्णिक्, (२) द्वितीयायाः प्राजापत्यानुष्टुप्, (३) तृतीयायाश्चार्ची पङ्क्तिश्छन्दांसि ॥

सोऽरज्यत ततो राजन्योऽजायत ॥१॥

स विशः सबन्धूनन्नमन्नाद्यमभ्युदतिष्ठत् ॥२॥

विशां च वै स सबन्धूनां चान्नस्य चान्नाद्यस्य च प्रियं धाम भवति य एवं वेद ॥३॥

सः । अरज्यत । ततः । राजन्यः । अजायत ॥ १ ॥

सः । विशः । सऽबन्धून् । अन्नम् । अन्नऽअद्यम् । अभिऽउदतिष्ठत् ॥ २ ॥

विशाम् । च । वै । सः । सऽबन्धूनाम् । च । अन्नस्य । च । अन्नऽअद्यस्य । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ ३ ॥

[९] नवमः पर्यायः

(१-३) तृचस्यास्य पर्यायस्य (१) प्रथमर्च आसुरी जगती, (२) द्वितीयाया आर्ची गायत्री, (३) तृतीयायाश्चार्ची पङ्क्तिश्छन्दांसि ॥

स विशोऽनु व्यचलत् ॥१॥

तं सभा च समितिश्च सेना च सुरा चानुव्यचलन् ॥२॥

सभायाश्च वै स समितेश्च सेनायाश्च सुरायाश्च प्रियं धाम भवति य एवं वेद ॥३॥

सः । विशः । अनु । वि । अचलत् ॥ १ ॥

तम् । सभा । च । सम्ऽइतिः । च । सेना । च । सुरा । च । अनुऽव्यचलन ॥ २ ॥

सभायाः । च । वै । सः । सम्ऽइतेः । च । सेनायाः । च । सुरायाः । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥ ३ ॥

PARYĀYA - VIII

Vrātyāḥ

XV.8.1 He became exulted; therefrom sprang the rājanya (ruling power).

XV.8.2 He rose up to gain people along with the kinsmen, food and edibles.

XV.8.3 He, who knows it thus, becomes the pleasing abode of the people along with the kinsmen, of food and the edibles.

PARYĀYA - IX

Vrātyāḥ

XV.9.1 He followed the wishes of the people.

XV.9.2 The assembly, the war-council, the army, and the treasury (surā) followed him.

XV.9.3 He, who knows it thus, becomes the pleasing abode of the assembly, of the war-council, of the army and of the treasury.

[१०] दशमः पर्यायः

(१-११) एकादशर्चस्यास्य पर्यायस्य (१) प्रथमर्चो द्विपदा साम्नी बृहती, (२) द्वितीयायास्त्रिपदार्ची पङ्क्तिः, (३) तृतीयाया द्विपदा प्राजापत्या पङ्क्तिः, (४) चतुर्थ्यास्त्रिपदा वर्धमाना गायत्री, (५) पञ्चम्यास्त्रिपदा साम्नी बृहती, (६, ८, १०) षष्ठ्यष्टमीदशमीनां द्विपदासुरी गायत्री, (७, ९) सप्तमीनवम्योः साम्न्युष्णिक्, (११) एकादश्याश्चासुरी बृहती छन्दांसि ॥

तद्यस्यैवं विद्वान्व्रात्यो राज्ञोतिथिर्गृहानागच्छेत् ॥१॥
श्रेयांसमेनमात्मनो मानयेत्तथा क्षत्राय ना वृश्चते तथा राष्ट्राय ना वृश्चते ॥२॥
अतो वै ब्रह्म च क्षत्रं चोदतिष्ठतां ते अब्रूतां कं प्र विशावेति ॥३॥
अतो वै बृहस्पतिमेव ब्रह्म प्रा विशत्विन्द्रं क्षत्रं तथा वा इति ॥४॥
अतो वै बृहस्पतिमेव ब्रह्म प्राविशदिन्द्रं क्षत्रम् ॥५॥
इयं वा उ पृथिवी बृहस्पतिर्द्यौरेवेन्द्रः ॥६॥
अयं वा उ अग्निर्ब्रह्मासावादित्यः क्षत्रम् ॥७॥
ऐनं ब्रह्म गच्छति ब्रह्मवर्चसी भवति ॥८॥

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । राज्ञः । अतिथिः । गृहान् । आऽगच्छेत् ॥ १ ॥

श्रेयांसम् । एनम् । आत्मनः । मानयेत् । तथा । क्षत्राय । न । आ । वृश्चते । तथा । राष्ट्राय । न । आ । वृश्चते ॥ २ ॥

अतः । वै । ब्रह्म । च । क्षत्रम् । च । उत् । अतिष्ठताम् । ते इति । अब्रूताम् । कम् । प्र । विशाव । इति ॥ ३ ॥

अतः । वै । बृहस्पतिम् । एव । ब्रह्म । प्र । विशतु । इन्द्रम । क्षत्रम् । तथा । वै । इति ॥४॥

अतः । वै । बृहस्पतिम् । एव । ब्रह्म । प्र । अविशत् । इन्द्रम् । क्षत्रम् ॥ ५ ॥

इयम् । वै । ऊं इति । पृथिवी । बृहस्पतिः । द्यौः । एव । इन्द्रः ॥ ६ ॥

अयम् । वै । ऊं इति । अग्निः । ब्रह्म । असौ । आदित्यः । क्षत्रम् ॥ ७ ॥

आ । एनम् । ब्रह्म । गच्छति । ब्रह्मऽवर्चसी । भवति ॥ ८ ॥

PARYĀYA - X

XV.10.1 So let the king, to whose dwellings comes such a knowledgeable vow-observing sage as a guest -

XV.10.2 Consider him as conducive to his welfare and honour him. By doing so he is not cut off from the ruling power; by doing so he is not cut off from the kingdom.

XV.10.3 From him, verily, sprang up the intellectual power and the ruling power; they said : " Who shall we enter?"

XV.10.4 From him, let the intellectual power, verily, enter into the lord of knowledge (Brhaspati) and so the ruling power into the resplendent army - chief was the reply.

XV.10.5 From him, verily, the intellectual power entered into the lord of knowledge and the rulling power into the resplendent army-chief.

XV.10.6 This earth, verily is Brhaspati (the lord of knowledge) and the heaven itself is the Indra (the resplendent army-chief).

XV.10.7 Also, this adorable leader (fire), verily, is the intellectual power and the yonder sun is the ruling power.

XV.10.8 Unto him comes the intellectual power; (and) he becomes lustrous with intellectual power,

यः पृथिवीं बृहस्पतिमग्निं ब्रह्म वेद ॥९॥
ऐनमिन्द्रियं गच्छतीन्द्रियवान्भवति ॥१०॥
य आदित्यं क्षत्रं दिवमिन्द्रं वेद ॥११॥

यः । पृथिवीम् । बृहस्पतिम् । अग्निम् । ब्रह्म । वेद ॥ ९ ॥

आ । एनम् । इन्द्रियम् । गच्छति । इन्द्रियऽवान् । भवति ॥ १० ॥

यः । आदित्यम् । क्षत्रम् । दिवम् । इन्द्रम् । वेद ॥ ११ ॥

[११] एकादशः पर्यायः

(१-११) एकादशर्चस्यास्य पर्यायस्य (१) प्रथमर्चो दैवी पङ्क्तिः, (२) द्वितीयाया द्विपदा पूर्वात्रिष्टुबतिशक्वरी, (३-६, ८) तृतीयादिचतसृणामष्टम्याश्च निचृदार्ची बृहती, (७, ९) सप्तमीनवम्योर्द्विपदा प्राजापत्या बृहती, (१०) दशम्या भुरिगार्ची बृहती, (११) एकादश्याश्च द्विपदार्च्यनुष्टुप् छन्दांसि ॥

तद्यस्यैवं विद्वान्व्रात्योतिथिर्गृहानागच्छेत् ॥१॥
स्वयमेनमभ्युदेत्य ब्रूयाद्व्रात्य क्वावात्सीर्व्रात्योदकं व्रात्य तर्पयन्तु व्रात्य यथा ते प्रियं
तथास्तु व्रात्य यथा ते वशस्तथास्तु व्रात्य यथा ते निकामस्तथास्त्विति ॥२॥
यदेनमाह व्रात्य क्वावात्सीरिति पथ एव तेन देवयानानव रुन्धे ॥३॥
यदेनमाह व्रात्योदकमित्यप एव तेनाव रुन्धे ॥४॥
यदेनमाह व्रात्य तर्पयन्त्विति प्राणमेव तेन वर्षीयांसं कुरुते ॥५॥

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । अतिथिः । गृहान् । आऽगच्छेत् ॥ १ ॥

स्वयम् । एनम् । अभिऽउदेत्य । ब्रूयात् । व्रात्य । क्व । अवात्सीः । व्रात्य । उदकम् । व्रात्य । तर्पयन्तु । व्रात्य । यथा । ते । प्रियम् । तथा । अस्तु । व्रात्य । यथा । ते । वशः । तथा । अस्तु । व्रात्य । यथा । ते । निऽकामः । तथा । अस्तु । इति ॥ २ ॥

यत् । एनम् । आह । व्रात्य । क्व । अवात्सीः । इति । पथः । एव । तेन । देवऽयानान् । अव । रुन्द्धे ॥ ३ ॥

यत् । एनम् । आह । व्रात्य । उदकम् । इति । अपः । एव । तेन । अव । रुन्द्धे ॥ ४ ॥

यत् । एनम् । आह । व्रात्य । तर्पयन्तु । इति । प्राणम् । एव । तेन । वर्षीयांसम् । कुरुते ॥५॥

XV.10.9 who knows earth as the lord of knowledge and adorable leader (fire) as the intellectual power.

XV.10.10 Unto him comes great power of sense organs; (and) he becomes strong with bodily power,

XV.10.11 who knows the sun as ruling power and heaven as the resplendent army-chief.

PARYĀYA - XI

Vratyāḥ

XV.11.1 So to whose dwelling such a knowledgeable vow-observing sage comes as a guest.

XV.11.2 He himself should get up to greet him and say ; "O Vrātya, where did you stay (for the night)? Vrātya, here is the water (for you). Vrātya, let them entertain you. Vrātya, let it be as it pleases you. Vrātya, let it be as you command. Vrātya, let it be as you desire.

XV.11.3 When he says ; "Vrātya, where did you stay (for the night", thereby in fact, he secures the paths traversed by the enlightened ones.

XV.11.4 When he says to him ; "Vrātya, here is water (for you)", thereby, in fact, he secures waters (for himself).

XV.11.5 When he says to him ; "Vrātya, let them entertain you," thereby he makes his very life-breath longer.

यदैनमाह व्रात्य यथा ते प्रियं तथास्त्विति प्रियमेव तेनाव रुन्धे ॥६॥
ऐनं प्रियं गच्छति प्रियः प्रियस्य भवति य एवं वेद ॥७॥ (१)
यदैनमाह व्रात्य यथा ते वशस्तथास्त्विति वशमेव तेनाव रुन्धे ॥८॥
ऐनं वशो गच्छति वशी वशिनां भवति य एवं वेद ॥९॥ (२)
यदैनमाह व्रात्य यथा ते निकामस्तथास्त्विति निकाममेव तेनाव रुन्धे ॥१०॥
ऐनं निकामो गच्छति निकामे निकामस्य भवति य एवं वेद ॥११॥ (३)

यत् । एनम् । आह । व्रात्य । यथा । ते । प्रियम् । तथा । अस्तु । इति । प्रियम् । एव । तेन । अव । रुन्धे ॥ ६ ॥

आ । एनम् । प्रियम् । गच्छति । प्रियः । प्रियस्य । भवति । यः । एवम् । वेद ॥ ७ ॥

यत् । एनम् । आह । व्रात्य । यथा । ते । वशः । तथा । अस्तु । इति । वशम् । एव । तेन । अव । रुन्धे ॥ ८ ॥

आ । एनम् । वशः । गच्छति । वशी । वशिनाम् । भवति । यः । एवम् । वेद ॥९॥

यत् । एनम् । आह । व्रात्य । यथा । ते । निऽकामः । तथा । अस्तु । इति । निऽकामम् । एव । तेन । अव । रुन्धे ॥ १० ॥

आ । एनम् । निऽकामः । गच्छति । निऽकामे । निऽकामस्य । भवति । यः । एवम् । वेद ॥

[१२] द्वादशः पर्यायः

(१-११) एकादशर्चस्यास्य पर्यायस्य (१) प्रथमर्चस्त्रिपदा गायत्री, (२) द्वितीयायाः प्राजापत्या बृहती, (३) तृतीयाया भुरिक्प्राजापत्यानुष्टुप्, (४) चतुर्थ्या भुरिक्साम्न्यनुष्टुप्, (५-६, ९-१०) पञ्चमीषष्ठीनवमीदशमीनामासुरी गायत्री, (७, ११) सप्तम्येकादश्योस्त्रिपदा प्राजापत्या त्रिष्टुप्, (८) अष्टम्याश्च विराड्गायत्री छन्दांसि ॥

तद्यस्यैवं विद्वान्व्रात्य उद्धृतेष्वग्निष्वधिश्रितेग्निहोत्रेतिथिर्गृहानागच्छेत् ॥१॥

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । उद्‌धृतेषु । अग्निषु । अधिऽश्रिते । अग्निऽहोत्रे । अतिथिः । गृहान् । आऽगच्छेत् ॥ १ ॥

XV.11.6 When he says to him ;"Vrātya, let it be as it pleases you," thereby he secures what is pleasing to him.

XV.11.7 To him comes the pleasing one; he, who knows thus becomes dear to his dear one.

XV.11.8 When he says to him :"Vrātya, let it be as you command", thereby he, verily, secures the command itself.

XV.11.9 To him comes the command; he, who knows it thus, becomes the Commander of Commanders.

XV.11.10 When he says to him : "Vrātya, let it be as you desire," thereby he, verily secures the desire itself.

XV.11.11 To him comes his heart's desire; he, who knows it thus, is set at the heart of his heart's desire.

PARYĀYA - XII

XV.12.1 So to whose dwellings comes such a knowledgeable vow-observing sage as a guest when the fires have been kindled up and the fire offering is spread over,

स्वयमेनमभ्युदेत्य ब्रूयाद्व्रात्यातिसृज होष्यामीति ॥२॥
स चातिसृजेज्जुहुयान्न चातिसृजेन्न जुहुयात् ॥३॥
स य एवं विदुषा व्रात्येनातिसृष्टो जुहोति ॥४॥
प्र पितृयाणं पन्थां जानाति प्र देवयानम् ॥५॥
न देवेष्वा वृश्चते हुतमस्य भवति ॥६॥
पर्यस्यास्मिँल्लोक आयतनं शिष्यते य एवं विदुषा व्रात्येनातिसृष्टो जुहोति ॥७॥
अथ य एवं विदुषा व्रात्येनानतिसृष्टो जुहोति ॥८॥

स्वयम् । एनम् । अभिऽउदेत्य । ब्रूयात् । व्रात्य । अति । सृज । होष्यामि । इति ॥२॥

सः । च । अतिऽसृजेत् । जुहुयात् । न । च । अतिऽसृजेत् । न । जुहुयात् ॥ ३ ॥

सः । यः । एवम् । विदुषा । व्रात्येन । अतिऽसृष्टः । जुहोति ॥ ४ ॥

प्र । पितृऽयानम् । पन्थाम् । जानाति । प्र । देवऽयानम् ॥ ५ ॥

न । देवेषु । आ । वृश्चते । हुतम् । अस्य । भवति ॥ ६ ॥

परि । अस्य । अस्मिन् । लोके । आऽयतनम् । शिष्यते । यः । एवम् । विदुषा । व्रात्येन । अतिऽसृष्टः । जुहोति ॥ ७ ॥

अथ । यः । एवम् । विदुषा । व्रात्येन । अनतिऽसृष्टः । जुहोति ॥ ८ ॥

XV.12.2 he himself should get up to greet him and say : "O Vrātya, grant me your permission. I shall perform sacrifice."

XV.12.3 If he permits, he may perform sacrifice; if he does not permit, he should not perform sacrifice.

XV.12.4 He, whoever permitted by such a knowledgeable vow-observing sage, performs sacrifice,

XV.12.5 He comes to know thoroughly the path traversed by the elders, (and) the path traversed by the enlightened ones.

XV.12.6 He is not cut off from the enlightened ones; his offerings are (regarded as duly) made.

XV.12.7 For him, whoever performs a sacrifice being permitted by such a knowledgeable vow-observing sage, there remains a secure place in this world.

XV.12.8 And now he, who performs a sacrifice without being permitted by such a knowledgeable vow-observing sage,

न पितृयाणं पन्थां जानाति न देवयानम् ॥९॥
आ देवेषु वृश्चते अहुतमस्य भवति ॥१०॥
नास्यास्मिँल्लोक आयतनं शिष्यते य एवं विदुषा व्रात्येनानतिसृष्टो जुहोति ॥११॥

न । पितृऽयानम् । पन्थाम् । जानाति । न । देवऽयानम् ॥ ९ ॥

आ । देवेषु । वृश्चते । अहुतम् । अस्य । भवति ॥ १० ॥

न । अस्य । अस्मिन् । लोके । आऽयतनम् । शिष्यते । यः । एवम् । विदुषा । व्रात्येन । अनतिऽसृष्टः । जुहोति ॥ ११ ॥

[१३] त्रयोदशः पर्यायः

(१-१४) चतुर्दशर्चस्यास्य पर्यायस्य (१) प्रथमर्चः साम्न्युष्णिक्, (२, ६) द्वितीयाषष्ठयोः प्राजापत्यानुष्टुप्, (३, ५, ७) तृतीयापञ्चमीसप्तमीनामासुरी गायत्री, (४, ८) चतुर्थ्यष्टम्योः साम्नी बृहती, (९) नवम्या द्विपदा निचृद्गायत्री, (१०) दशम्या द्विपदा विराड्गायत्री, (११) एकादश्याः प्राजापत्या पङ्क्तिः, (१२) द्वादश्या आसुरी जगती, (१३) त्रयोदश्याः सतःपङ्क्तिः, (१४) चतुर्दश्याश्चाक्षरपङ्क्तिश्छन्दांसि ॥

तद्यस्यैवं विद्वान्व्रात्य एकां रात्रिमतिथिर्गृहे वसति ॥१॥
ये पृथिव्यां पुण्या लोकास्तानेव तेनाव रुन्धे ॥२॥ (१)
तद्यस्यैवं विद्वान्व्रात्यो द्वितीयां रात्रिमतिथिर्गृहे वसति ॥३॥
येऽन्तरिक्षे पुण्या लोकास्तानेव तेनाव रुन्धे ॥४॥ (२)
तद्यस्यैवं विद्वान्व्रात्यस्तृतीयां रात्रिमतिथिर्गृहे वसति ॥५॥

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । एकाम् । रात्रिम् । अतिथिः । गृहे । वसति ॥१॥

ये । पृथिव्याम् । पुण्याः । लोकाः । तान् । एव । तेन । अव । रुन्द्धे ॥ २ ॥

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । द्वितीयाम् । रात्रिम् । अतिथिः । गृहे । वसति ॥३॥

ये । अन्तरिक्षे । पुण्याः । लोकाः । तान् । एव । तेन । अव । रुन्द्धे ॥ ४ ॥

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । तृतीयाम् । रात्रिम् । अतिथिः । गृहे । वसति ॥५॥

XV.12.9 does not know the path traversed by the elders, nor the path traversed by the enlightened ones.

XV.12.10 He is cut off from the enlightened ones; his offering is (regarded as) not duly made.

XV.12.11 For him, whoever performs a sacrifice without being permitted by such a knowledgeable vow-observing sage, there does not remain a secure place in this world.

PARYĀYA - XIII

Vrātyāḥ

XV.13.1 So he, at whose home such a knowledgeable vow-observing sage stays for one night as a guest.

XV.13.2 Secures thereby all the auspicious places that are on the earth.

XV.13.3 So he, at whose home such a knowledgeable vow-observing sage stays for the second night as a guest.

XV.13.4 Secures thereby all the auspicious places that are in the midspace.

XV.13.5 So he, at whose home such a knowledgeable vow-observing sage stays for the third night as a guest.

ये दिवि पुण्या लोकास्तानेव तेनाव रुन्धे ॥६॥ (३)
तद्यस्यैवं विद्वान्व्रात्यश्चतुर्थीं रात्रिमतिथिर्गृहे वसति ॥७॥
ये पुण्यानां पुण्या लोकास्तानेव तेनाव रुन्धे ॥८॥ (४)
तद्यस्यैवं विद्वान्व्रात्योपरिमिता रात्रीरतिथिर्गृहे वसति ॥९॥
य एवापरिमिताः पुण्या लोकास्तानेव तेनाव रुन्धे ॥१०॥ (५)
अथ यस्याव्रात्यो व्रात्यब्रुवो नामबिभ्रत्यतिथिर्गृहानागच्छेत् ॥११॥
कर्षेदेनं न चैनं कर्षेत् ॥१२॥
अस्यै देवताया उदकं याचामीमां देवतां वासय इमामिमां
देवतां परि वेवेष्मीत्येनं परि वेविष्यात् ॥१३॥

ये । दिवि । पुण्याः । लोकाः । तान् । एव । तेन । अव । रुन्द्धे ॥ ६ ॥
तत् । यस्य । एवम् । विद्वान् । व्रात्यः । चतुर्थीम् । रात्रिम् । अतिथिः । गृहे । वसति ॥
ये । पुण्यानाम् । पुण्याः । लोकाः । तान् । एव । तेन । अव । रुन्द्धे ॥ ८ ॥
तत् । यस्य । एवम् । विद्वान् । व्रात्यः । अपरिऽमिताः । रात्रीः । अतिथिः । गृहे । वसति ॥
ये । एव । अपरिऽमिताः । पुण्याः । लोकाः । तान् । एव । तेन । अव । रुन्द्धे ॥१०॥
अथ । यस्य । अव्रात्यः । व्रात्यऽब्रुवः । नामऽबिभ्रती । अतिथिः । गृहान् । आऽगच्छेत् ॥
कर्षेत् । एनम् । न । च । एनम् । कर्षेत् ॥ १२ ॥
अस्यै । देवतायै । उदकम । याचामि । इमाम् । देवताम् । वासये । इमाम् । इमाम् ।
देवताम् । परि । वेवेष्मि । इति । एनम् । परि । वेविष्यात् ॥ १३ ॥

XV.13.6 Secures thereby all the auspicious places that are in the sky.

XV.13.7 So he, at whose home such a knowledgeable vow-observing sage stays for the fourth night as a guest.

XV.13.8 Secures thereby all the places that are auspicious of the auspicious.

XV.13.9 So he, at whose home such a knowledgeable vow-observing sage stays for indefinite nights as a guest.

XV.13.10 Secures thereby all the indefinite auspicious places whatsoever.

XV.13.11 Now, he, to whose homes a non-vrātya (un-vow-observing), posting himself as a Vrātya, bearing only the name (of Vrātya), comes as a guest.

XV.13.12 Should he drag him? He may not drag him.

XV.13.13 I call for water for this deity; I accommodate this deity; I serve food to this deity: (saying thus) let him serve food,

तस्यामेवास्य तद्देवतायां हुतं भवति य एवं वेद ॥१४॥

तस्याम् । एव । अस्य । तत् । देवतायाम् । हुतम् । भवति । यः । एवम् । वेद ॥१४॥

[१४] चतुर्दशः पर्यायः

(१-२४) चतुर्विंशत्यृचस्यास्य पर्यायस्य (१) प्रथमर्चस्त्रिपदानुष्टुप्, (२, ४, ६, ८, १०, २०, २२, २४) द्वितीयाचतुर्थीषष्ठ्यष्टमीदशमीविंशीद्वाविंशीचतुर्विंशीनां द्विपदासुरी गायत्री, (३, ९) तृतीयानवम्योः पुर उष्णिक्, (५) पञ्चम्या अनुष्टुप्, (७) सप्तम्याः प्रस्तारपङ्क्तिः, (११) एकादश्याः स्वराड्गायत्री, (१२, १४, १६, १८) द्वादशीचतुर्दशीषोडश्यष्टादशीनां भुरिक्प्राजापत्यानुष्टुप्, (१३, १५) त्रयोदशीपञ्चदश्योः [(१७) सप्तदश्याश्च] आर्ची पङ्क्तिः, (१९) एकोनविंश्या भुरिङ्नागी गायत्री, (२१) एकविंश्याः प्राजापत्या त्रिष्टुप्, [(२३) त्रयोविंश्याश्च निचृदार्ची पङ्क्तिः] छन्दांसि ॥

स यत्प्राचीं दिशमनु व्यचलन्मारुतं शर्धो भूत्वानुव्यचलन्मनोऽन्नादं कृत्वा ॥१॥
मनसान्नादेनान्नमत्ति य एवं वेद ॥२॥ (१)
स यद्दक्षिणां दिशमनु व्यचलदिन्द्रो भूत्वानुव्यचलद्बलमन्नादं कृत्वा ॥३॥
बलेनान्नादेनान्नमत्ति य एवं वेद ॥४॥ (२)
स यत्प्रतीचीं दिशमनु व्यचलद्वरुणो राजा भूत्वानुव्यचलदपोऽन्नादीः कृत्वा ॥५॥
अद्भिरन्नादीभिरन्नमत्ति य एवं वेद ॥६॥ (३)

सः । यत् । प्राचीम् । दिशम् । अनु । विऽअचलत् । मारुतम् । शर्धः । भूत्वा । अनुऽव्यचलत् । मनः । अन्नऽअदम् । कृत्वा ॥ १ ॥

मनसा । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥ २ ॥

सः । यत् । दक्षिणाम् । दिशम् । अनु । विऽअचलत् । इन्द्रः । भूत्वा । अनुऽव्यचलत् । बलम् । अन्नऽअदम् । कृत्वा ॥ ३ ॥

बलेन । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥ ४ ॥

सः । यत् । प्रतीचीम् । दिशम् । अनु । विऽअचलत् । वरुणः । राजा । भूत्वा । अनुऽव्यचलत् । अपः । अन्नऽअदीः । कृत्वा ॥ ५ ॥

अत्ऽभिः । अन्नऽअदीभिः । अन्नम् । अत्ति । यः । एवम् । वेद ॥ ६ ॥

XV.13.14 To that very deity that becomes duly offered, whoso knows it thus.

PARYĀYA - XIV

Vrātyāḥ

XV.14.1 When he follows the course towards the eastern quarter, he follows it becoming the powerful cloud-bearing wind and making the mind enjoyer of food.

XV.14.2 With the mind as enjoyer of food, he enjoys food, whoso knows it thus.

XV.14.3 When he follows the course towards the southern quarter, he follows it becoming the rain-cloud (Indra) and making the strength enjoyer of food.

XV.14.4 With the strength as enjoyer of food he enjoys food, whoso knows it thus.

XV.14.5 When he follows the course to the western quarter, he follows it becoming the glittering ocean (Varuṇa) and making the waters enjoyers of food.

XV.14.6 With waters as enjoyers of food, he enjoys food, whoso knows it thus.

स यदुदीचीं दिशमनु व्यचलत्सोमो राजा भूत्वानुव्यचलत्
सप्तर्षिभिर्हुत आहुतिमन्नादीं कृत्वा ॥७॥
आहुत्यान्नाद्यान्नमत्ति य एवं वेद ॥८॥ (४)
स यद्ध्रुवां दिशमनु व्यचलद्विष्णुर्भूत्वानुव्यचलद्विराजमन्नादीं कृत्वा ॥९॥
विराजान्नाद्यान्नमत्ति य एवं वेद ॥१०॥ (५)
स यत्पशूननु व्यचलद्रुद्रो भूत्वानुव्यचलदोषधीरन्नादीः कृत्वा ॥११॥
ओषधीभिरन्नादीभिरन्नमत्ति य एवं वेद ॥१२॥ (६)
स यत्पितॄननु व्यचलद्यमो राजा भूत्वानुव्यचलत्स्वधाकारमन्नादं कृत्वा ॥१३॥

सः । यत् । उदीचीम् । दिशम् । अनु । विऽअचलत् । सोमः । राजा । भूत्वा । अनुऽव्यचलत् । सप्तर्षिऽभिः । हुते । आऽहुतिम् । अन्नऽअदीम् । कृत्वा ॥ ७ ॥

आऽहुत्या । अन्नऽअद्या । अन्नम् । अत्ति । यः । एवम् । वेद ॥ ८ ॥

सः । यत् । ध्रुवाम् । दिशम् । अनु । विऽअचलत् । विष्णुः । भूत्वा । अनुऽव्यचलत् । विऽराजम् । अन्नऽअदीम् । कृत्वा ॥ ९ ॥

विऽराजा । अन्नऽअद्या । अन्नम् । अत्ति । यः । एवम् । वेद ॥ १० ॥

सः । यत् । पशून् । अनु । विऽअचलत् । रुद्रः । भूत्वा । अनुऽव्यचलत् । ओषधीः । अन्नऽअदीः । कृत्वा ॥ ११ ॥

ओषधीभिः । अन्नऽअदीभिः । अन्नम् । अत्ति । यः । एवम् । वेद ॥ १२ ॥

सः । यत् । पितॄन् । अनु । विऽअचलत् । यमः । राजा । भूत्वा । अनुऽव्यचलत् । स्वधाऽकारम् । अन्नऽअदम् । कृत्वा ॥ १३ ॥

XV.14.7 When he follows the course to the northern quarter, he follows it becoming the shining Soma (cure-plant) offered by the seven-seers and making the offering enjoying of food.

XV.14.8 With the offering as enjoyer of food, he enjoys food, whoso knows it thus.

XV.14.9 When he follows the course to the nadir quarter, he follows it becoming the sacrifice (Viṣṇu) and making Virāj (cow) enjoyer of food.

XV.14.10 With Virāj (cow) as enjoyer of food, he enjoys food, whoso knows it thus.

XV.14.11 When he follows the animals, he follows them becoming the vital breath (Rudra), and making the herbs enjoyers of food.

XV.14.12 With herbs as enjoyers of food, he enjoys food, whose knows it thus.

XV.14.13 When he follows the elders, he follows them becoming the Controller Lord (Yama) and making the utterance of svadhā enjoyer of food.

स्वधाकारेणान्नादेनान्नमत्ति य एवं वेद ॥१४॥ (७)
स यन्मनुष्या३ननु व्यचलदग्निर्भूत्वानुव्य् चिलत्स्वाहाकारमन्नादं कृत्वा ॥१५॥
स्वाहाकारेणान्नादेनान्नमत्ति य एवं वेद ॥१६॥ (८)
स यदूर्ध्वां दिशमनु व्यचलद्बृहस्पतिर्भूत्वानुव्य् चिलद्वषट्कारमन्नादं कृत्वा ॥१७॥
वषट्कारेणान्नादेनान्नमत्ति य एवं वेद ॥१८॥ (९)
स यद्देवाननु व्यचलदीशानो भूत्वानुव्य् चिलन्मन्युमन्नादं कृत्वा ॥१९॥
मन्युनान्नादेनान्नमत्ति य एवं वेद ॥२०॥ (१०)

स्वधाऽकारेण । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥ १४ ॥

सः । यत् । मनुष्यान् । अनु । विऽअचलत् । अग्निः । भूत्वा । अनुऽव्य् चलत् । स्वाहाऽकारम् । अन्नऽअदम् । कृत्वा ॥ १५ ॥

स्वाहाऽकारेण । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥ १६ ॥

सः । यत् । ऊर्ध्वाम् । दिशम् । अनु । विऽअचलत् । बृहस्पतिः । भूत्वा । अनुऽव्य्-चलत् । वषट्ऽकारम् । अन्नऽअदम् । कृत्वा ॥ १७ ॥

वषट्ऽकारेण । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥ १८ ॥

सः । यत् । देवान् । अनु । विऽअचलत् । ईशानः । भूत्वा । अनुऽव्य् चलत् । मन्युम् । अन्नऽअदम् । कृत्वा ॥ १९ ॥

मन्युना । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥ २० ॥

XV.14.14 With the utterance of svadhā as enjoyer of food, he enjoyes food, whoso knows it thus.

XV.14.15 When he follows men, he follows them becoming the adorable leader and making the utterance of svāhā enjoyer of food.

XV.14.16 With the utterance of svāhā as enjoyer of food, he enjoys food, whoso knows it thus.

XV.14.17 When he follows the course to the zenith quarter, he follows it becoming the Lord of knowledge and making the utterance of Vaṣaṭ enjoyer of food.

XV.14.18 With the utterance of Vaṣaṭ as enjoyer of food, he enjoys food, whoso knows it thus.

XV.14.19 When he follows the enlightened ones, he follows them becoming the master (īśāna) and making the fervour enjoyer of food.

XV.14.20 With the fervour as enjoyer of food, he enjoyes food, whoso know it thus.

स यत्प्रजा अनु व्यचलत्प्रजापतिर्भूत्वानुव्य॑चलत्प्राणमन्नादं कृत्वा ॥२१॥
प्राणेनान्नादेनान्नमत्ति य एवं वेद ॥२२॥ (११)
स यत्सर्वानन्तर्देशाननु व्यचलत्परमेष्ठी भूत्वानुव्य॑चलद्ब्रह्मान्नादं कृत्वा ॥२३॥
ब्रह्मणान्नादेनान्नमत्ति य एवं वेद ॥२४॥ (१२)

सः । यत् । प्रऽजाः । अनु । विऽअचलत् । प्रजाऽपतिः । भूत्वा । अनुऽव्य॑चलत् ।
प्राणम् । अन्नऽअदम् । कृत्वा ॥ २१ ॥

प्राणेन । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥ २२ ॥

सः । यत् । सर्वान् । अन्तःऽदेशान् । अनु । विऽअचलत् । परमेऽस्थी । भूत्वा ।
अनुऽव्य॑चलत् । ब्रह्म । अन्नऽअदम् । कृत्वा ॥ २३ ॥

ब्रह्मणा । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥ २४ ॥

[१५] पञ्चदशः पर्यायः

(१-९) नवर्चस्यास्य पर्यायस्य (१) प्रथमर्चः (तृतीयादिषु 'तस्य व्रात्यस्य' इत्यस्य च) दैवी पङ्क्तिः, (२) द्वितीयाया आसुरी बृहती, (३) तृतीयायाः प्राजापत्यानुष्टुप्, (४, ७, ८) चतुर्थीसप्तम्यष्टमीनां भुरिक्प्राजापत्यानुष्टुप्, (५-६) पञ्चमीषष्ठयोर्द्विपदा साम्नी बृहती, (९) नवम्याश्च विराड्गायत्री छन्दांसि ॥

तस्य व्रात्यस्य ॥१॥
सप्त प्राणाः सप्तापानाः सप्त व्यानाः ॥२॥
तस्य व्रात्यस्य । योऽस्य प्रथमः प्राण ऊर्ध्वो नामायं सो अग्निः ॥३॥

तस्य । व्रात्यस्य ॥ १ ॥

सप्त । प्राणाः । सप्त । अपानाः । सप्त । विऽआनाः ॥ २ ॥

तस्य । व्रात्यस्य । यः । अस्य । प्रथमः । प्राणः । ऊर्ध्वः । नाम । अयम् । सः । अग्निः ॥ ३ ॥

XV.14.21 When he follows the creatures, he follows them becoming the Lord of the creatures and the vital breath enjoyer of food.

XV.14.22 With vital breath as enjoyer of food, he enjoyes food, who knows it thus

XV.14.23 When he follows the course of all the intermediate quarters, he follows it becoming the Lord dwelling in the highest abode and making the knowledge enjoyer of food.

XV.14.24 With the knowledge as enjoyer of food, he enjoys food, whoso knows it thus.

PARYĀYA - XV

Vrātyāḥ

XV.15.1 Of that Vrātya (the supreme being) -

XV.15.2 seven are in-breaths, seven out-breaths, (and) seven diffused breaths.

XV.15.3 Of that Vrātya; what is his first in-breath, called ūrdhva (upward), that is this fire.

तस्य व्रात्यस्य । योऽस्य द्वितीयः प्राणः प्रौढो नामासौ स आदित्यः ॥४॥
तस्य व्रात्यस्य । योऽस्य तृतीयः प्राणो३ऽभ्यूढो नामासौ स चन्द्रमाः ॥५॥
तस्य व्रात्यस्य । योऽस्य चतुर्थः प्राणो विभूर्नामायं स पवमानः ॥६॥
तस्य व्रात्यस्य । योऽस्य पञ्चमः प्राणो योनिर्नाम ता इमा आपः ॥७॥
तस्य व्रात्यस्य । योऽस्य षष्ठः प्राणः प्रियो नाम त इमे पशवः ॥८॥
तस्य व्रात्यस्य । योऽस्य सप्तमः प्राणोऽपरिमितो नाम ता इमाः प्रजाः ॥९॥

तस्य । व्रात्यस्य । यः । अस्य । द्वितीयः । प्राणः । प्रऽऊढः । नाम । असौ । सः । आदित्यः ॥४॥
तस्य । व्रात्यस्य । यः । अस्य । तृतीयः । प्राणः । अभिऽऊढः । नाम । असौ । सः । चन्द्रमाः ॥
तस्य । व्रात्यस्य । यः । अस्य । चतुर्थः । प्राणः । विऽभूः । नाम । अयम् । सः । पवमानः ॥६॥
तस्य । व्रात्यस्य । यः । अस्य । पञ्चमः । प्राणः । योनिः । नाम । ताः । इमाः । आपः ॥ ७ ॥
तस्य । व्रात्यस्य । यः । अस्य । षष्ठः । प्राणः । प्रियः । नाम । ते । इमे । पशवः ॥८॥
तस्य । व्रात्यस्य । यः । अस्य । सप्तमः । प्राणः । अपरिऽमितः । नाम । ताः । इमाः । प्रऽजाः ॥९॥

[१६] षोडशः पर्यायः

(१-७) सप्तर्चस्यास्य पर्यायस्य (१, ३) प्रथमातृतीययोर्ऋचोः साम्न्युष्णिक् (सर्वासु 'तस्य व्रात्यस्य' इत्यस्य दैवी पङ्क्तिः), (२, ४-५) द्वितीयाचतुर्थीपञ्चमीनां प्राजापत्योष्णिक्, (६) षष्ठ्या याजुषी त्रिष्टुप्, (७) सप्तम्याश्चासुरी गायत्री छन्दांसि ॥

तस्य व्रात्यस्य । योऽस्य प्रथमोऽपानः सा पौर्णमासी ॥१॥

तस्य । व्रात्यस्य । यः । अस्य । प्रथमः । अपानः । सा । पौर्णऽमासी ॥ १ ॥

XV.15.4 Of that Vrātya; what is his second in-breath, called prauḍha (nature), that is sun yonder.

XV.15.5. Of that Vrātya; what is his third in-breath, called Abhuḍha (concluded), that is the moon yonder.

XV.15.6 Of that Vrātya; what is his fourth in-breath, called Vibhūḥ (pervading), that is the purifying wind (or Soma)

XV.15.7 Of that Vrātya; what is his fifth in-breath, called Yoni (the womb), that are these waters.

XV.15.8 Of that Vrātya; what is his sixth in-breath, called priya (beloved), that are these animals.

XV.15.9 Of that Vrātya; what is his seventh in-breath. called Aparimita (limitless), that are these creatures.

PARYĀYA - XVI

Vrātyāḥ

XV.16.1 Of that Vrātya; what is his first out-breath, that is the night of full moon.

तस्य व्रात्यस्य । योऽस्य द्वितीयोऽपानः साष्टका ॥२॥
तस्य व्रात्यस्य । योऽस्य तृतीयोऽपानः सामावास्या ॥३॥
तस्य व्रात्यस्य । योऽस्य चतुर्थोऽपानः सा श्रद्धा ॥४॥
तस्य व्रात्यस्य । योऽस्य पञ्चमोऽपानः सा दीक्षा ॥५॥
तस्य व्रात्यस्य । योऽस्य षष्ठोऽपानः स यज्ञः ॥६॥
तस्य व्रात्यस्य । योऽस्य सप्तमोऽपानस्ता इमा दक्षिणाः ॥७॥

तस्य । व्रात्यस्य । यः । अस्य । द्वितीयः । अपानः । सा । अष्टका ॥ २ ॥
तस्य । व्रात्यस्य । यः । अस्य । तृतीयः । अपानः । सा । अमाऽवास्या ॥ ३ ॥
तस्य । व्रात्यस्य । यः । अस्य । चतुर्थः । अपानः । सा । श्रद्धा ॥ ४ ॥
तस्य । व्रात्यस्य । यः । अस्य । पञ्चमः । अपानः । सा । दीक्षा ॥ ५ ॥
तस्य । व्रात्यस्य । यः । अस्य । षष्ठः । अपानः । सः । यज्ञः ॥ ६ ॥
तस्य । व्रात्यस्य । यः । अस्य । सप्तमः । अपानः । ताः । इमाः । दक्षिणाः ॥ ७ ॥

[१७] सप्तदशः पर्यायः

(१-१०) दशर्चस्यास्य पर्यायस्य (१, ५) प्रथमापञ्चम्योः प्राजापत्योष्णिक् (सर्वासु 'तस्य व्रात्यस्य' इत्यस्य दैवी पङ्क्तिः), (२, ७) द्वितीयासप्तम्योरासुर्यनुष्टुप्, (३) तृतीयाया याजुषी पङ्क्तिः, (४) चतुर्थ्याः साम्न्युष्णिक्, (६) षष्ठ्या याजुषी त्रिष्टुप्, (८) अष्टम्यास्त्रिपदा प्रतिष्ठार्षी पङ्क्तिः, (९) नवम्या द्विपदा साम्नी त्रिष्टुप्, (१०) दशम्याश्च साम्न्यनुष्टुप् छन्दांसि ॥

तस्य व्रात्यस्य । योऽस्य प्रथमो व्यानः सेयं भूमिः ॥१॥
तस्य व्रात्यस्य । योऽस्य द्वितीयो व्यानस्तदन्तरिक्षम् ॥२॥

तस्य । व्रात्यस्य । यः । अस्य । प्रथमः । विऽआनः । सा । इयम् । भूमिः ॥ १ ॥
तस्य । व्रात्यस्य । यः । अस्य । द्वितीयः । विऽआनः । तत् । अन्तरिक्षम् ॥ २ ॥

XV.16.2 Of that Vrātya; what is his second out-breath, that is the eighth-night of the moon's quarter (āṣtaka).

XV.16.3 Of that Vrātya; what is his third out-breath, that is the night of new-moon.

XV.16.4 Of that Vrātya; what is his fourth out-breath, that is faith.

XV.16.5 Of that Vrātya; what is his fifth out-breath, that is Consecration.

XV.16.6 Of that Vrātya; what is his sixth out-breath, that is sacrifice.

XV.16.7 Of that Vrātya; what is his seventh out-breath, that are these sacrificial gifts.

PARYĀYA - XVII

Vrātyaḥ

XV.17.1 Of the Vrātya; what is his first diffused breath (Vyāna), that is this earth.

XV.17.2 Of that Vrātya; what is his second diffused breath, that is the midspace.

तस्य व्रात्यस्य । योऽस्य तृतीयो व्यानः सा द्यौः ॥३॥
तस्य व्रात्यस्य । योऽस्य चतुर्थो व्यानस्तानि नक्षत्राणि ॥४॥
तस्य व्रात्यस्य । योऽस्य पञ्चमो व्यानस्त ऋतवः ॥५॥
तस्य व्रात्यस्य । योऽस्य षष्ठो व्यानस्त आर्तवाः ॥६॥
तस्य व्रात्यस्य । योऽस्य सप्तमो व्यानः स संवत्सरः ॥७॥
तस्य व्रात्यस्य । समानमर्थं परि यन्ति देवाः संवत्सरं वा एतदृतवोऽनुपरियन्ति व्रात्यं च ॥८॥
तस्य व्रात्यस्य । यदादित्यमभिसंविशन्त्यमावास्यां चैव तत्पौर्णमासीं च ॥९॥

तस्य । व्रात्यस्य । यः । अस्य । तृतीयः । विऽआनः । सा । द्यौः ॥ ३ ॥

तस्य । व्रात्यस्य । यः । अस्य । चतुर्थः । विऽआनः । तानि । नक्षत्राणि ॥ ४ ॥

तस्य । व्रात्यस्य । यः । अस्य । पञ्चमः । विऽआनः । ते । ऋतवः ॥ ५ ॥

तस्य । व्रात्यस्य । यः । अस्य । षष्ठः । विऽआनः । ते । आर्तवाः ॥ ६ ॥

तस्य । व्रात्यस्य । यः । अस्य । सप्तमः । विऽआनः । सः । सम्ऽवत्सरः ॥ ७ ॥

तस्य । व्रात्यस्य । समानम् । अर्थम् । परि । यन्ति । देवाः । सम्ऽवत्सरम् । वै । एतत् । ऋतवः । अनुऽपरियन्ति । व्रात्यम् । च ॥ ८ ॥

तस्य । व्रात्यस्य । यत् । आदित्यम् । अभिऽसंविशन्ति । अमाऽवास्याम् । च । एव । तत् । पौर्णऽमासीम् । च ॥ ९ ॥

XV.17.3 Of that Vrātya; what is his third diffused breath, that is the sky yonder.

XV.17.4 Of that Vrātya; what is his fourth diffused breath, that are those constellations.

XV.17.5 Of that Vrātya; what is his fifth diffused breath, that are those seasons.

XV.17.6 Of that Vrātya; what is his sixth diffused breath, that are those groups of seasons.

XV.17.7 Of that Vrātya; what is his seventh diffused breath, that is the year.

XV.17.8 Of that Vrātya; the enlightened ones go around him with one and the same purpose, just as the seasons go around following the year as well as the Vrātya.

XV.17.9 Of that Vrātya; as they enter into the sun on the new-moon's night, so that do on the full moon's night as well.

तस्य व्रात्यस्य । एकं तदेषाममृतत्वमित्याहुतिरेव ॥१०॥

तस्य । व्रात्यस्य । एकम् । तत् । एषाम् । अमृतऽत्वम् । इति । आऽहुतिः । एव ॥ १० ॥

[१८] अष्टादशः पर्यायः

(१–५) पञ्चर्चस्यास्य पर्यायस्य (१) प्रथमर्चो दैवी पङ्क्तिः, (२–३) द्वितीयातृतीययोरार्ष्यौ बृहती, (४) चतुर्थ्या आर्च्यनुष्टुप्, (५) पञ्चम्याश्च साम्न्युष्णिक् छन्दांसि ॥

तस्य व्रात्यस्य ॥१॥
यदस्य दक्षिणमक्ष्यसौ स आदित्यो यदस्य सव्यमक्ष्यसौ स चन्द्रमाः ॥२॥
योऽस्य दक्षिणः कर्णोऽयं सो अग्निर्योऽस्य सव्यः कर्णोऽयं स पवमानः ॥३॥
अहोरात्रे नासिके दितिश्चादितिश्च शीर्षकपाले संवत्सरः शिरः ॥४॥
अह्ना प्रत्यङ्व्रात्यो रात्र्या प्राङ्नमो व्रात्याय ॥५॥

तस्य । व्रात्यस्य ॥ १ ॥

यत् । अस्य । दक्षिणम् । अक्षि । असौ । सः । आदित्यः । यत् । अस्य । सव्यम् । अक्षि । असौ । सः । चन्द्रमाः ॥ २ ॥

यः । अस्य । दक्षिणः । कर्णः । अयम् । सः । अग्निः । यः । अस्य । सव्यः । कर्णः । अयम् । सः । पवमानः ॥ ३ ॥

अहोरात्रे इति । नासिके इति । दितिः । च । अदितिः । च । शीर्षकपाले इति शीर्षऽकपाले । सम्ऽवत्सरः । शिरः ॥ ४ ॥

अह्ना । प्रत्यङ् । व्रात्यः । रात्र्या । प्राङ् । नमः । व्रात्याय ॥ ५ ॥

॥ इति पञ्चदशं काण्डम् ॥

[पञ्चदशकाण्डे पर्यायाः १८, ऋचः २२०]

XV.17.10 Of that Vrātya; that immortality of theirs is one; therefore is the offering.

PARYĀYA - XVIII

Vrātyaḥ

XV.18.1 Of that Vrātya (the wandering saint);

XV.18.2 What is his right eye, that is the sun; what is his left eye, that is the moon.

XV.18.3 What is his right ear, that is this fire; what is his left ear, that is this purifying wind (or the Soma).

XV.18.4 Day and night are his two nostrils; the finitude (diti) and infinity (aditi) are his two halves of his skull; the year is his head.

XV.18.5 During the day the Vrātya forces the west, during night, the east. Homage be to the Vrātya.

Here ends Kāṇḍa XV

Hymns 18, Verses 220